Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

C.NO 4012
291C
152K6



विवेकानन्दसंस्कृतविद्वद्गोष्ठी-
-स्मारकाञ्जलिः

स्वामि-अपूर्वानन्द-संकलितः

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Δ 8391
152K6

Swami Apurvanand.
Vivekanand Sanskriti
Vidwatgosthi sar kanjali

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

152 K6
298891

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

△
152K6 8391

Swami Apurvanand.
Vivekanand Sanskriti
Vidwatgosthi sarkan-
jali

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हिन्दू विश्वविद्यालय को सस्नेह

स्वामी अपूर्वानन्द

THE RAMAKRISHNA ADVAITA ASHRAM
VARANASI-1. (U. P.)
Date 16. X. 66 196

Shant Sharma Hiremath.
'काव्यतीर्थः' 'वेदान्त शास्त्री'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवेकानन्द-संस्कृत-विद्वद्गोष्ठी-स्मारकाञ्जलिः

(प्रथम-खण्डम्)

स्वामिना अपूर्वानन्देन सङ्कलितः

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No. ....

स्वामिविवेकानन्द-जन्मशतो-जयन्ती-स्मृति-प्रकाशनम्

मार्च, १९६६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकाशकः—
स्वामी अपूर्वानन्दः
अध्यक्षः, श्रीरामकृष्ण-अद्वैताश्रमः,
वाराणसी ।

△

152K6

प्रकाशकेन सर्वेऽधिकाराः संरक्षिताः ।
प्रथमं प्रकाशनम् मार्च, १६६६.

मूल्यम्—रूप्यकद्वयम् ।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8391

मुद्रकः—
काशीमुद्रणालयः
विश्वेश्वरगंज, वाराणसी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Shant Sharma Hiremath
'काव्यतीर्थः, वेदान्तशास्त्री'
84

निवेदनम्

श्रीमतो भगवतः असीमानुकम्पया "विवेकानन्द-संस्कृत-विद्वद्गोष्ठी-स्मारकाञ्जलिः" प्राकट्यमुपगतः। स्वामी विवेकानन्दः संस्कृतभाषायाः प्रणयी, तस्याश्च व्यापकं प्रचारं समीहते स्म। 'भारतस्य जातीयसमुन्नतिः चापि सुरसरस्वत्या बहुमुखं प्रचारं प्रसारञ्च विशेषतो निर्विभर्त्ति', इत्यपि तस्य आन्तरिको विश्वासः। अतस्तस्य महानुभावस्य सुप्रसादहेतवे सुरभाषाप्रचारमुद्दिश्य तदीय-पुण्यजन्म-शतवार्षिकस्मृतेः चतुरधिक - शतवार्षिक (१०४)-जन्मोत्सवोपलक्ष्ये भारतीयधर्म-संस्कृति-प्राचीनतमसर्वाभ्यर्हितकेन्द्रे अविमुक्तपुर्य्यां वाराणस्यां तद्द्वारा प्रवर्त्तिते श्रीरामकृष्णाद्वैताश्रमे एकस्य संस्कृत-विद्वद्गोष्ठी-सम्मेलनस्या-योजनमनुष्ठितम्। एतस्य संस्कृतसम्मेलनस्य आलोचनाविषयः "वेदान्तधर्म-प्रतिष्ठाता युगाचार्यो विवेकानन्दः" इत्यासीत्।

गतवर्षेऽपि श्रीमतः स्वामिमहोदयस्य शतवर्ष - जयन्तीस्मारक - रूपेण आश्रमेऽस्मिन् अस्माभिर्युगावतारस्य भगवतः श्रीरामकृष्णदेवस्य जन्ममहोत्सव-मुपलक्ष्य एवमेव संस्कृत-विद्वद्गोष्ठी-सम्मेलनमायोजितमासीत्। तदपि आशामतीत्य साफल्यमध्यगच्छत्। किन्तु तदानीं केनापि प्रकारेण स्मारकाञ्जलि-प्रकाशनस्य नावसरो लब्धः। साम्प्रतम् अनेकेषां धर्मपिपासूनां विद्वज्जनानां च सविशेषेण आग्रहेण अनुरोधेन च प्रस्तुतः स्मारकाञ्जलिः संकलितः प्रकाशितश्चाभवत्। परिशिष्टे च "स्वामिनो विवेकानन्दस्य वाणीरचनावली" चेत्यतो हिन्दुधर्मसम्बन्धनिबद्धाः स्वामिनः सदुक्तयश्च संगृह्य प्रकाशिताः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्र संकलने मुद्रणकार्ये च बहूनाम् अकुण्ठितं साहाय्यमधिगतमास्ते। विशेषरूपेण अध्यापकस्य साहित्याचार्य-पण्डित-टी० ए० भाण्डारकरमहोदयस्य तथा पण्डित-श्रीगोपालचन्द्र-वेदान्तशास्त्रि-महाशयस्य च साहाय्यं सह कृतज्ञतया संस्मरामः, सर्वेभ्यश्चान्तरिकान् साधुवादांश्च वितराम इति।

श्रीकाशीनरेशेन वाराणसेय-विश्वविद्यालयद्वयोपकुलपतिभ्यां, प्राध्यापक-चतुष्टयेन, पण्डितच्छात्रच्छात्राभिश्च स्वस्वभाषण-निबन्धादीनां प्रकाशनस्यानुमतिः प्रदत्ता। एतदर्थं तेभ्य आन्तरिकधन्यवादं विज्ञापयामः।

विनीतः संकलयिता।

मार्च १५, १९६६ ईसवी.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



चिकागो धर्ममहासभामें विवेकानन्द

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवेकानन्द-संस्कृत-विद्वद्गोष्ठी-स्मारकाञ्जलिः

शान्तिवचनं वेदानुशासनं च ।

ॐ सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः । —तैत्तिरीयोपनिषद् ।

ॐ आप्यायन्तु ममाङ्गानि, वाक्प्राणश्चक्षुः श्रोत्रमथ बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदम् । माहं ब्रह्म निराकुर्याम्, मा मा ब्रह्म निराकरोद, अनिराकरणमस्तु, अनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु, ते मयि सन्तु ।

ॐ शान्तिः शान्तिः शान्तिः ॥ —सामवेदीयशान्ति-वचनम् ।

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ —अथर्ववेदीयशान्ति-वचनम् ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ —शुक्लयजुर्वेदीयशान्तिवचनम् ।

❀ ❀ ❀

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ॥

—कठोपनिषत् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥

—मुण्डकोपनिषत्।

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥

—मुण्डकोपनिषत्।

नायमात्मा प्रवचनेन लभ्यो, न मेधया, न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥

—मुण्डकोपनिषत्।

तमेवैकं जानथ आत्मानम्, अन्या वाचो विमुञ्चथामृतस्यैष सेतुः।

—मुण्डकोपनिषत्।

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।

—मुण्डकोपनिषत्।

...सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।
...सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्।
कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्।

स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।...श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।...एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्।

—तैत्तिरीयोपनिषत्।

शृण्वन्तु विश्वे अमृतस्य पुत्राः, आ ये धामानि दिव्यानि तस्थुः। वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

—श्वेताश्वतरोपनिषत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नमः शंभवाय च, मयोभवाय च, नमः शंकराय च, मयस्कराय च, नमः शिवाय च शिवतराय च । —शुक्लयजुर्वेदः ।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा, मा गृधः कस्यस्विद्धनम् ॥
—ईशोपनिषत् ।

विवेकानन्द-संस्कृत-विद्वद्गोष्ठी-सम्मेलन-विवरणम् ।

वाराणसेय-श्रीरामकृष्णाद्वैताश्रमे स्वामिविवेकानन्द-महाभागानां चतुरधिकशततम-जन्मतिथिमहोत्सवे १९६३ ई० जनवरी-मासस्य १५-१६ दिनाङ्कयोरेकस्य महतो संस्कृत-विद्वद्गोष्ठी-सम्मेलनस्य आयोजनमभूत् । सम्मेलनस्य शुभारम्भः खलु श्रीमद्भिः माननीयैः काशीराज-श्रीविभूति-नारायणसिंहबहादुरमहोदयैः विहित आसीत् । तत्र प्रथमदिवसे सभापतिपदं वाराणसेय-संस्कृत-विश्वविद्यालयस्योपकुलपति-श्रीसुरति-नारायणमणित्रिपाठि-महोदयैरलंकृतमभवत् । द्वितीयदिने च तत्पदं हिन्दु-विश्वविद्यालयस्योपकुलपति-श्रीजस्टिस् एन० एच० भगवती-महाभागैर्विभूषितमभूत् ।

विद्वद्गोष्ठ्यन्तर्गत-भाषण-प्रतियोगितायां निर्णायकपदं वाराणसेय-संस्कृत-विश्वविद्यालये संस्कृताध्ययन-निर्देशकैः पण्डित-बलदेव-उपाध्यायैः काशी - हिन्दुविश्वविद्यालयान्तर्गत - संस्कृतमहाविद्यालये प्राध्यापक-मीमांसारत्न-सुब्रह्मण्य-शास्त्रिभिश्च परिशोभितमासीत् ।

अस्य विद्वद्गोष्ठीकार्यक्रमस्य प्रधानोंऽशः संस्कृत-लेख-भाषणप्रति-योगितास्वरूपोऽभवत् । प्रतियोगितायाः विषयः खलु "वेदान्तधर्म-प्रतिष्ठाता युगाचार्यो विवेकानन्दः" इति निर्धारितो जातः । अस्यां प्रतियोगितायां प्रविष्टानां संस्कृतविद्वच्छात्रच्छात्रीणां संख्या सप्तचत्वा-रिंशदभूत् (तत्र प्रबन्ध-प्रतियोगितायां पञ्चविंशतिर्भाषणप्रतिद्वन्द्वितायां च द्वाविंशतिरभवत्) । उभयोरपि दिनयोः कार्यक्रमस्य शुभारम्भो मङ्गलाचरणसहित-वेदमन्त्रपाठेन सार्धं जातः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतादृशं केवल-संस्कृत-भाषायामायोजितं विद्वद्गोष्ठीसम्मेलनं वाराणस्यां विगते वर्षे श्रीरामकृष्णाद्वैताश्रमे भगवतः श्रीरामकृष्ण-परमहंसदेवस्य जन्मतिथि-महोत्सवे सर्वप्रथममायोजितम्, तत् खलु पूर्णतया सफलीभूतमभूत्।

अस्मिन्वर्षे विद्वद्गोष्ठीसभायां स्वकीयस्वागतभाषणे अद्वैता-श्रमाध्यक्षः स्वामी अपूर्वानन्दः प्रतियोगिता-विषयमधिकृत्य उक्तवान् स्वामी विवेकानन्दः खलु वेदान्तधर्मं विश्वधर्मत्वेन, तस्य विश्वजनीनं प्रयोगस्वरूपं च प्रतिपादितवान्। सनातन-वैदिकधर्मो जगति विद्य-मानानां सर्वेषामपि प्रचलितधर्माणां पितृस्वरूपो विद्यते। वेदान्तस्तु न केवलं राष्ट्रियसंघटने, अपि तु सम्पूर्णविश्वमानवतायाः एकतासूत्रे ग्रन्थनसमर्थो महाशक्तिस्वरूपो विद्यते।

स्वामी पुनश्च उक्तवान्—संस्कृतभाषैव अस्या महत्याः शक्तिरूपायाः रत्नमञ्जूपायाः उद्घाटने समर्थास्ति। संस्कृतभाषाया अधिकाधिक-प्रचारमात्रेणैव भारतं स्वकीयामेकराष्ट्रियतां, प्राचीनसंस्कृतिगौरवं, अध्यात्मज्ञानभाण्डागारं, सनातन-कुल-धर्म-परम्परां च रक्षितुं समर्थयते।

विद्वद्गोष्ठी - शुभारम्भप्रसङ्गे महामान्य - श्रीकाशीराजमहाभागा दिवंगतमाननीय-प्रधानमन्त्रि - लालबहादुर - शास्त्रिणामाकस्मिकनिधन-विषये शोकप्रकाशप्रस्तावं विद्वद्गोष्ठीसभायाः पुरतः स्थापितवन्तः। स च प्रस्तावो द्विक्षणात्मकमौनेन सार्धं सर्वैरपि सभासद्भिरुत्थितै-र्दिवंगतात्मशान्त्यर्थं प्रार्थितोऽनुमोदितश्च।

अनन्तरं श्रीकाशीमहाराजाः संस्कृतप्रबन्ध-प्रतियोगिभ्यो योग्यता-क्रमानुसारं मूल्यवत्संस्कृतग्रन्थरूप-पारितोषिकाणि स्वकरकमलाभ्यां वितरितवन्तः। उच्चवर्गे प्रतियोगिच्छात्रच्छात्रीणां संख्या एकविंशतिः, मध्यमवर्गे चतस्र आसन्। पारितोषिकयोग्यप्रतिद्वन्द्विषु नवसंख्याका विदुष्यः छात्राश्च अभवन्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रथमदिवसे जनवरी १५ दिनाङ्के वाराणसेयसंस्कृतविश्वविद्यालयस्योपकुलपतयः सभापतयः स्वकीये संस्कृतभाषणे उक्तवन्तः—स्वामी विवेकानन्दो महत्-संस्कृतभाषानुरागी आसीत्। स्वामिमतानुसारं भारतस्य भविष्यन्ती उन्नतिरभ्युदयश्च केवलं संस्कृतभाषायाः अधिकाधिकाध्ययनं तथा प्रचारं चावलम्बेते। स्वामिमहाभागाः स्वकीये जीवने वेदान्तं समाचरितवन्तः प्रचारितवन्तश्च स खलु अस्मिन् जगति संकटपूर्णविश्वमानवजात्यर्थं नवीनजीवनमाशाङ्कुरञ्चोत्पादितवान्। स हि पूर्वपश्चिमभूखण्डयोरेकीकरणाय मानवतासमुद्धारार्थमात्मजीवनोत्सर्गं कृतवान्।

जस्टिस् एन० एच० भगवती-महोदयाः द्वितीयदिवसे स्वकीये सभापतिसंस्कृतभाषणेऽब्रुवन्—स्वामी विवेकानन्दो भारतस्य मार्गप्रदर्शनदीपस्वरूप आसीत्, स हि सनातन-वैदिक-धर्मस्य गौरवपताकामुत्तोलयन् भारतं जगत्यामखिलराष्ट्राणां मध्ये उच्चतमसिंहासने स्थापितवान्। स एव वेदान्तधर्मस्य मूर्तिमान् विग्रहः।

जस्टिस् भगवती-महोदयाः भाषण-प्रतियोगिता-प्रविष्टेभ्यो द्वाविंशति-संख्याकविद्वच्छात्रेभ्यः संस्कृतपुस्तकरूपपारितोषिकाणि स्वकरकमलाभ्यामर्पितवन्तः। प्रतियोगिषु मध्ये तिस्रो विद्वच्छात्र्यः तथा द्वौ प्रज्ञाचक्षुष्कौ पण्डितच्छात्रावास्ताम्।

अस्यां विद्वद्गोष्ठी-सभायां वाराणसेय-संस्कृत-विश्वविद्यालये संस्कृताध्ययननिर्देशकाः पण्डितबलदेवउपाध्यायाः काशीहिन्दुविश्वविद्यालयान्तर्गत-संस्कृतमहाविद्यालयप्राध्यापक-मीमांसारत्न-पण्डित-श्रीसुब्रह्मण्य-शास्त्रिणः काशीहिन्दुविश्वविद्यालयस्य यू-जी-सी-प्राध्यापकाः डा० एन० एन० चौधुरीशर्म-महोदयाः काशी-हिन्दुविश्वविद्यालये संस्कृतमहाविद्यालयाध्यक्षाः पण्डित-वी० एस० रामचन्द्र-शास्त्रिणश्च विद्वत्तापूर्णानि भाषणानि दत्तवन्तः।

उभयोरपि दिवसयोः धन्यवाददानं प्राध्यापक-पण्डित टी० ए०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भण्डारकर एम० ए० साहित्याचार्याः स्वरचितसुललित-पद्यैर्विहितवन्तः। एतत्खलु गोष्ठी-सम्मिलित-विदुषां समूहेन अतीव प्रशंसितम्। उभयोरपि दिनयोरस्या विद्वद्गोष्ठ्याः कार्यक्रमः सर्वतः विद्वद्गण-परिपूरित-सभामण्डपे होरात्रयाधिकसमयपर्यन्तं प्रचलित आसीत्।

विद्वद्गोष्ठी-सभाया इदं वैशिष्ट्यं यत् आदितोऽन्तं यावत् सम्पूर्णोऽपि कार्यक्रमः केवलं संस्कृतभाषायामेव सम्पन्नः तथा आलोचना भाषणान्यपि सूक्ष्मविचारपरिपूरितान्यभवन्।

स्वामी-विवेकानन्द-संस्कृतविद्वद्गोष्ठी-प्रबन्ध-प्रतियोगितायां प्रविष्टानां छात्रविदुषां योग्यताक्रमानुसारं नामानि—

उच्चवर्गः

१ ब्रह्मचारी आत्मचैतन्यशास्त्री, शास्त्रिद्वितीयवर्षम्, साधुवेला-संस्कृत-महाविद्यालयः, वाराणसी।

२ कुमारी सोमादासाभिधा एम० ए० फाइनल (संस्कृत), इण्डोलजी कालेज, हिन्दुविश्वविद्यालयः, वाराणसी।

३ श्रीचन्द्रभानुशर्मा वेदपाठी, नव्यव्याकरणशास्त्रिप्रथमवर्षम् वाराणसेयसंस्कृतविश्वविद्यालयः।

४ ब्रह्मचारी मुमुक्षुचैतन्यः, वेदान्ताचार्य-प्रथमवर्षम्। भोलानन्द-विद्या-भवनम्, वाराणसी।

५ श्रीगुरुसिद्धदेव हिरेमठः, रिसर्च-स्कालर-द्वितीयवर्षम्, संस्कृतमहा-विद्यालयः, हिन्दुविश्वविद्यालयः, वाराणसी।

६ श्रीचन्द्रशेखरदेवः शास्त्रि-तृतीयखण्डम्, संस्कृत-महाविद्यालयः, हिन्दुविश्वविद्यालयः, वाराणसी।

७ श्रीविनायकरामचन्द्ररटाटे, आचार्य-द्वितीय-वर्षम्, वाराणसेय-संस्कृत-विश्वविद्यालयः।

८ कुमारी आरती-चक्रवर्ती, एम० ए० प्रीवियस्, (संस्कृत), इण्डोलजी कलेज, हिन्दुविश्वविद्यालयः वाराणसी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

९ श्रीहृदयनारायणझा, शास्त्रि-द्वितीयवर्षम्, वाराणसेय-संस्कृत-विश्व-विद्यालयः।

१० श्रीदेवीप्रसादवटव्यालः शास्त्रि-प्रथमवर्षम्, काशीविद्यापीठ-विश्व-विद्यालयः, वाराणसी।

११ श्री वी० एस० आत्रेयः आचार्य-प्रथमवर्षम्, संस्कृत-महाविद्यालयः हिन्दुविश्वविद्यालयः वाराणसी।

१२ श्रीरामनगोनाशर्मा शास्त्रि-द्वितीयवर्षम्, काशीविद्यापीठ विश्व-विद्यालयः वाराणसी।

१३ श्रीरामसिंहासनमिश्रः, शास्त्रि-द्वितीयवर्षम्, वाराणसेय संस्कृत-विश्वविद्यालयः।

१४ स्वामी हरिप्रकाशदासजी, शास्त्रि-प्रथमवर्षम्, रामानुजवेदान्तः, स्वामीनारायणमन्दिरम्, वाराणसी।

१५ कुमारी कनकप्रभादेवी, एम० ए० प्रीवियस (संस्कृत), इण्डोलज़ी कालेज, हिन्दुविश्वविद्यालयः, वाराणसी।

१६ कुमारी मितारायचौधुरी, एम० ए० प्रीवियस, हिन्दुविश्वविद्यालयः, वाराणसी।

१७ पं० विश्वेश्वरभट्टाचार्यः, काव्यव्याकरणतीर्थः शास्त्रि-अंतिमवर्षम्, हिन्दुविश्वविद्यालयः, वाराणसी।

१८ श्रीबलरामदासः, शास्त्रि-प्रथमवर्षम्, आदर्श-रामानन्द-महाविद्यालयः, वाराणसी।

१९ कुमारी स्निग्धावसु, एम० ए० फायनल (दर्शनम्), हिन्दुविश्व-विद्यालयः वाराणसी।

२० श्रीमुन्नासिंहः बी० ए० द्वितीयवर्षम्, सेंट्रल-हिन्दु-कालेज, हिन्दु-विश्वविद्यालयः, वाराणसी।

२१ कुमारी कमलासिंहः बी० ए० द्वितीयवर्षम्, स्वामि-देवानन्द-स्नातकमहाविद्यालयः देवरिया।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मध्यम वर्गः

१ ब्रह्मचारी सेवाचैतन्यः, दर्शनमध्यमा, संस्कृत महाविद्यालयः हिन्दु-विश्वविद्यालयः वाराणसी ।

२ कुमारी गौरी बैनर्जी, मध्यमा द्वितीयवर्षम्, आनन्दमयी-कन्या-पीठम्, वाराणसी ।

३ कुमारी कमलाशर्मा, मध्यमा दर्शनविभागः पी यू० सी० साइन्स हिन्दुविश्वविद्यालयः वाराणसी ।

४ पं० कमलापतिशर्मा, मध्यमा द्वितीयवर्षम्, आदर्शवेद-महा-विद्यालयः वाराणसी ।

संकलनेन निबन्ध-प्रतियोगितायां प्रविष्टानां छात्राणां संख्या पञ्चविंशतिः ।

स्वामिविवेकानन्द-संस्कृत-विद्वद्गोष्ठी-भाषण-प्रतियोगितायां प्रविष्टानां छात्रविदुषां योग्यताक्रमानुसारं नामानि—

१ पं० विश्वेश्वरभट्टाचार्यः, काव्यव्याकरणतीर्थः, शास्त्रि-अन्तिमवर्षम् हिन्दुविश्वविद्यालयः वाराणसी ।

२ कुमारी कृष्णाबैनर्जी, एम०, ए०, फायनल, हिन्दुविश्वविद्यालयः वाराणसी ।

३ श्रीसुधाकरदीक्षितः, न्यायाचार्यद्वितीयवर्षम्, वाराणसेय-संस्कृत-विश्वविद्यालयः ।

४ श्रीचन्द्रभानुशर्मा, नव्यव्याकरणशास्त्री, वाराणसेय-संस्कृत-विश्व-विद्यालयः ।

५ श्रीराधेश्यामसिश्रः, रिसर्च - स्कालर, वाराणसेय-संस्कृत-विश्व-विद्यालयः ।

६ श्रीरामभद्रव्यासः, व्याकरणाचार्यः, वाराणसेय-संस्कृत-विश्व-विद्यालयः ।

७ श्रीराधेश्यामचतुर्वेदी, एम० ए० प्रीवियस् (संस्कृत), हिन्दुविश्व-विद्यालयः वाराणसी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

८ श्री वी० एस० आत्रेयः, आचार्य-प्रथमवर्षम्, हिन्दुविश्वविद्यालयः, वाराणसी ।

९ पं० रामनगीनाशर्मा, शास्त्रि-द्वितीयवर्षम्, काशीविद्यापीठ-विश्व-विद्यालयः वाराणसी ।

१० श्रीशिवजीउपाध्यायः शास्त्रि-प्रथमवर्षम्, वाराणसेय-संस्कृत-विश्व-विद्यालयः ।

११ कुमारी गीता बैनर्जी, उत्तरमध्यमा द्वितीयवर्षम्, आनन्दमयी-कन्यापीठम्, वाराणसी ।

१२ पं० रामरूपमिश्रः, शास्त्रि-द्वितीयवर्षम्, संस्कृत-महाविद्यालयः हिन्दुविश्वविद्यालयः वाराणसी ।

१३ श्रीमोतीलालपुरोहितः (प्रज्ञाचक्षुः) शास्त्रि-प्रथमवर्षम्, वाराणसेय-संस्कृत-विश्वविद्यालयः ।

१४ कुमारी कमलाशर्मा, बी० ए० प्रथमवर्षम्, हिन्दुविश्वविद्यालयः वाराणसी ।

१५ श्रीरामवल्लभ-त्रिपाठी, एम० ए० प्रीवियस (संस्कृतम्), हिन्दु-विश्वविद्यालयः वाराणसी ।

१६ श्रीशान्तशर्मा, हीरामठः शास्त्रि-तृतीयवर्षम्, संस्कृत-महाविद्यालयः हिन्दुविश्वविद्यालयः वाराणसी ।

१७ श्रीराधाकान्त झा, शास्त्रि-तृतीयवर्षम्, हिन्दुविश्वविद्यालयः वाराणसी ।

१८ कुमारी निर्मलासिंहः बी० ए० द्वितीयवर्षम्, सनातन-महाविद्या-लयः, देवरिया ।

१९ श्रीलोकनाथत्रिपाठी, व्याकरण-मध्यमा तृतीयवर्षम्, हिन्दुविश्व-विद्यालयः वाराणसी ।

२० श्रीविनायक रामचन्द्रशास्त्री, आचार्य-प्रथमवर्षम्, वाराणसेय-संस्कृत-विश्वविद्यालयः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२१ श्रीव्रजेशकुमारत्रिपाठी, उत्तर-मध्यमा द्वितीयवर्षम्, वाराणसेय-संस्कृत-विश्वविद्यालयः।

२२ श्रीरामकुमारअवस्थी (प्रज्ञाचक्षुः) व्याकरणाचार्यः, साहित्याचार्य-प्रथमवर्षम् वाराणसेय-संस्कृत-विश्वविद्यालयः।

संकलनेन भाषण-प्रतियोगितायां प्रविष्टानां छात्राणां
संख्या द्वाविंशतिः।

शोक-प्रकाशन-प्रस्तावः।

विश्वे शाश्वतिक-शान्ति-स्थापनार्थं भगीरथ-प्रयत्नशीलानां भारत-मातृसेवा-तत्पराणां अस्मदीय-प्रिय-प्रधान-मन्त्रिणां माननीयानां श्रीलाल-बहादुर-शास्त्रिणां प्रचलित-जनवरी-मासस्य दशमदिने ताशकन्दक्षेत्रे आकस्मिक-निधनेन भारतस्य अपूरणीया क्षतिः सञ्जाता, तदर्थं इयं संस्कृत-विद्वद्गोष्ठी दुःखममर्यादमनुभवन्ती, तत्कुटुम्बिभिः सार्धं समवेदनां च प्रकाशयन्ती दिवंगतात्मनः शान्तिसिद्धये द्विमिनिटा-त्मक-समयपर्यन्तं मानसिकीं प्रार्थनां करोति।

वाराणसेय-श्रीरामकृष्ण-अद्वैताश्रमाध्यक्ष-स्वामि-अपूर्वानन्दस्य स्वागत-
भाषणस्य सारः—

"ॐ शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद् वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वागतं समागतेभ्यो नरेभ्यो देवीभ्यश्च ।

अस्याः संस्कृतविद्वद्गोष्ठ्या आयोजनं अस्माभिः एतादृशे शोकाच्छन्नवातावरणे क्रियते यदा अस्माकं लोकप्रियप्रधानमन्त्रिणां माननीयलालबहादुरशास्त्रिणामाकस्मिक-निधनवार्ता श्रुता । अनेन मातृभूमिसेवातत्परेण विश्वस्मिञ्जगति चिरशान्तिस्थापकेन स्वकीये अत्यल्पे सार्धवर्षाधिकारसमये एव या असाधारणी स्वदेशसेवा कृता तस्याः सादृश्यं भारतस्येतिहासे दुर्लभम् । तस्यात्मनः शान्तिसिद्धये सर्वे वयं भगवन्तं प्रार्थयामहे ।

अतीव आनन्दपूर्णं खलु अस्माकं मानसं यदद्य युगाचार्यस्वामिविवेकानन्दस्य चतुरधिक-शततम-जन्मतिथि-महोत्सवोपलक्ष्ये आयोजितायां संस्कृत-विद्वद्गोष्ठी-सभायां स्वयं माननीयाः महानुभावाः श्रीकाशीमहाराजाः सानुग्रहं समुपागताः । ते च स्वकरकमलाभ्यां निबन्धप्रतियोगितायां प्रविष्टेभ्यो विद्वच्छात्रच्छात्रीगणेभ्यो योग्यताक्रमानुसारं पारितोषिकवितरणं विधास्यन्ति ।

वाराणसेय-संस्कृतविश्वविद्यालयस्य उपकुलपतयः श्रीपण्डित-सुरतिनारायणमणित्रिपाठिमहोदयाः प्रथमदिवसे अस्याः सभायाः सभापतिपदमलङ्करिष्यन्ति इत्यपि महान् प्रमोदस्य विषयः ।

द्वितीय-दिवसे खलु काशीहिन्दुविश्वविद्यालयस्य उपकुलपतयो माननीयाः जस्टिस् एन० एच० भगवतीमहोदयाः सभापतिपदं भूषितं करिष्यन्ति इत्यनेनापि वयं धन्याः ।

वाराणसेय-संस्कृत-विश्वविद्यालयस्य संस्कृताध्ययननिर्देशकाः प्राध्यापक-पण्डित-श्रीबलदेव-उपाध्यायमहोदयाः काशीहिन्दुविश्वविद्यालये संस्कृतमहाविद्यालयस्य मीमांसारत्नप्राध्यापक-पण्डित-श्रीसुब्रह्मण्यशास्त्रिमहोदयाश्च उभयदिनयोः भाषणप्रतिद्वन्द्वितायां निर्णायकपदमलङ्कुरुतः इत्यनेनापि अतीव सोत्साहा वयम् ।

अस्यां विद्वद्गोष्ठीसभायां विद्वांसो भाषणकर्तारः प्रबन्ध-भाषण-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतियोगितायां प्रविष्टाः पण्डितच्छात्रच्छात्रा अपि अस्माकं हार्दिकधन्यवादानर्हन्ति ।

स्थानीय-विविध-संस्कृत-शिक्षाकेन्द्राध्यक्षाः अस्मिन् प्रतियोगितारूप-प्रशंसनीय-कार्ये स्वस्वशिष्यान् प्रोत्साहितवन्तः । तेऽपि आदरार्हाः ।

न केवलमिदं साधारणं सम्मेलनं, अपि तु देवभाषां सनातनवैदिकधर्मसंस्कृतिं च प्रति आदरभावप्रोत्साहनार्थमिदमायोजनम् । यतः केवलं संस्कृतवाण्येव भारतीयार्यसंस्कृतेर्धारणवाहनकार्यसमर्था विद्यते । अपि च आर्यभूमेः भविष्यत्समुन्नतिरपि गीर्वाणवाण्या अधिकाधिकप्रचारमेव पूर्णतयावलम्बते ।

विवेकानन्दस्वामिनो देवभाषायां सविशेषश्रद्धा प्रीतिश्चास्ताम् ; किञ्च स तस्या भाषायाः प्रचुरप्रचारे विशेषगुरुत्वमादधानः आसीत् । तेन बहुधा प्रतिपादितमासीत् यत् भारतस्य एकता एकराष्ट्रत्वभावना च संस्कृतभाषाद्वारैव पूर्णतया सफला भविष्यतीति ।

तेन उक्तम्—"संस्कृतशास्त्रेष्वेव भारतीयधर्मसंस्कृतिमूलस्य तत्त्वं निहितमास्ते । संस्कृतशिक्षया संस्कृतशब्दानामुच्चारणमात्रेणैव भारतीयजातौ गौरवस्य शक्तेश्च भावो जागरां गमिष्यति" ।

स्वामिविवेकानन्दस्य मतानुसारं सनातनवैदिकधर्म एव आध्यात्मिकभावधारारत्नमञ्जूषास्वरूपः । लोककल्याणार्थं च तन्मञ्जूषागतविविधबहुमूल्यरत्नानां समग्रजगति वितरणं कर्तव्यमित्यपि तस्य हार्दिकोऽभिलाष आसीत् ।

अद्य विद्वद्गोष्ठीसभायां आलोचनायाः विषयः खलु—"वेदान्तधर्म-प्रतिष्ठाता युगाचार्यो विवेकानन्द" इति निर्धारितम् ; एतद्विषये विचारे क्रियमाणे अस्माकं आर्यवैदिकवाङ्मयमेव वैदिकधर्मस्य मूलमिति प्रतिभाति । वेदान्तविद्या-परम्परापि साक्षाद्भगवतो नारायणादेव प्रारभ्यते । यद्यपि कर्मज्ञानकाण्डात्मक-वैदिकधर्मस्य स्वरूपं क्रमबद्धरूपेण वेदचतुष्टये दृग्गोचरं न भवति तथापि उपनिषद्ग्रन्थेषु तद्विकासः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्पष्टतयावलोक्यते। तासामुपनिषदां समन्वयविधानार्थं भगवता व्यासेन ब्रह्मसूत्राणि विरचितानि। आचार्य-शङ्करेण च प्रस्थानत्रयोद्वारा वेदान्तशास्त्रं पूर्णतां प्रापितम्। आधुनिककाले च एतच्छास्त्र-प्रतिपादितवेदान्तधर्म एव विश्वधर्मस्य स्थानं ग्रहीतुमर्हति इति स्वामिना विवेकानन्देन यथार्थतया प्रतिपादितम्। तेनोक्तमासीत्—"सर्वे धर्माः सनातनवैदिकधर्मे एव निहिताः सन्ति। वेदान्तधर्मस्य द्वैतम्, विशिष्टाद्वैतम्, अद्वैतम् च इमानि त्रीण्यपि मतानि मानवजातेः आध्यात्मिकोन्नतेः तिस्रो भूमिकाः सन्ति। एतेषां मध्ये सर्वेषां प्रयोजनं विद्यते। आर्यभूमेः विभिन्नजातीयानां आचारव्यवहाराणामभ्यन्तरे प्रयोगफल-स्वरूपतः वेदान्तधर्मः यद्रूपमगृह्णात् तदेव यथार्थो हिन्दुधर्मः (अत्र इदं वक्तव्यम्—स्वामी हिन्दुधर्मस्य स्थाने वेदान्तधर्म-शब्दप्रयोगमुपादिशत्। यतः हिन्दुशब्दः अवैदिकः, कुत्रापि वैदिकसाहित्ये नोपलभ्यते। स शब्दस्तु प्रमादात् 'सिन्धुनदीतीरस्था हिन्दव' इति पाश्चात्त्यदेशीयैः प्रयुक्तः)।

वेदान्तधर्मस्य द्वैतवादरूपं प्रथमसोपानं यूरोपीयजातीयानां ईसाई-धर्मरूपेण, सेमिटिकजातीयानां मुस्लिमधर्मरूपेण च परिणतम्। तस्यैव धर्मस्य अद्वैतवादश्च ज्ञानयोगानुभूतिरूपो बौद्धधर्मे परिणतः।

अतः धर्म इत्युक्ते सनातनवैदिकधर्मस्य एव समुचितं ग्रहणम्। 'सर्वे पदा हस्तिपदे निमग्नाः' इति न्यायेन सर्वे धर्माः सनातनवैदिकधर्मे एव अन्तर्भवितुमर्हन्ति।

अस्मिञ्जगति मानवसमष्टेः ब्रह्मरूपेण ग्रहणम्। एतादृशस्य परमेश्वरस्य सेवैव ब्रह्मणः वास्तविको सेवा इति पर्यवस्यति। राष्ट्रजाति-मतमतान्तरविचारपरित्यागेन सनातनवैदिकधर्म एव विश्वधर्मपदवी-स्वीकारपूर्वकं जगति शाश्वतिकशान्तिस्थापनकारणं भविष्यति, इत्यपि स्वामिनः मतमासीत्। एतेन सनातनवैदिकधर्मो जगति प्रचलितानां सर्वेषामपि धर्माणां पितृस्थाने सुप्रतिष्ठितो भवति इति निर्विवादम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयं धर्मश्च सर्वस्मिन्काले विश्वे विद्यमानानि सर्वाण्यपि धर्मस्रोतांसि स्वकीये सागरवत् विशालस्वरूपे सम्मिलितानि कर्तुं समर्थः अस्ति, इत्यत्र न कोऽपि संदेहलेशः। स्वामिविवेकानन्दः विश्वकल्याणार्थं एतद्धर्मोपदेशद्वारेण जगति साम्यं मैत्रीं विश्वबन्धुत्वं च प्रतिष्ठापयितुं पाश्चात्त्य-भूखण्डे गत आसीत्। एतेन पुण्यकार्येण भारतीय-सनातनवैदिकधर्मः तेन जगद्गुरुपदे प्रतिष्ठापितः; तथा भविष्यत्कालीन-भारतीयान्प्रति एतादृश-विश्वधर्म-रक्षणार्थं स जगति तस्य समुचितप्रसारप्रचारार्थं च समुपदिष्टवान्।

अतिप्राचीनकालात् आर्यर्षिभिः प्रयुक्ता "कृण्वन्तो विश्वमार्यं" इति दिव्यवाणी विश्ववातावरणे प्रतिध्वनन्ती एव स्वामिभिः कर्णगोचरीकृता। तस्या एव दिव्यवाण्याः आधारात् आर्यसनातनधर्मस्य प्रतिनिधिभूतेन स्वामिना समुद्रयात्रानिषेधमपि अगणयता आर्यधर्म-सन्देशः पाश्चात्त्यदेशेषु श्रावितः। आशास्महे च अस्मिन्वैदिक-धर्मप्रचार-विषये स्वामिनः कल्पना तत्प्रदर्शितमार्गानुसरणद्वारा साकारा भविष्यति। इदानीं सभापतिमहोदयानामनुमत्या प्रबन्धप्रतियोगितायां सफलच्छात्रपण्डितानां योग्यताक्रमानुसारं नामानि पण्डितप्रवराः प्राध्यापकाः साहित्याचार्यभण्डारकरमहोदयाः पठिष्यन्ति। वस्तुतस्तु प्रतियोगिता-प्रविष्टाः सर्वेऽपि छात्रपण्डिताः पारितोषिकानि लप्स्यन्ते इति अस्माभिः निश्चितम्।

"मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिः मधुमानस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।"

शं नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरुरुक्रमः। ॐ शान्तिः शान्तिः शान्तिः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वेदान्त-धर्म-प्रतिष्ठाता युगाचार्यः विवेकानन्दः

प्रबन्धप्रतियोगितायामुच्चवर्गे प्रथमस्थानं प्राप्तवतः ब्रह्मचारि-आत्मचैतन्य (आत्मारामशास्त्री) (शास्त्रि द्वितीयवर्षम्) इत्येतस्य प्रबन्धस्य सारः—

विश्वेऽस्मिन् सर्वे प्राणिनो निर्विशेषात्यन्तिकसुखार्थमेवाहर्निशं प्रयतन्ते "सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः।" अत एव भारतीय-वैदिक-साहित्ये मानवानां सार्वाङ्गिकविकासो विस्तृतरीत्या निगदितोऽस्ति। तत्र कान्तदर्शिमुनिभिर्मानवजीवनसाफल्यार्थं श्रेयश्च प्रेयश्चेत्युभौ मार्गौ प्रदर्श्य यथा आध्यात्मिकोत्कर्षाय ब्रह्मजीवजगदादि-तत्त्वानां सूक्ष्मातिसूक्ष्मविचारः कृतः, तथैव तदुपयुक्तानां भौतिक-तत्त्वानामपि विहितः। श्रुत्यापि प्रतिपादिते तज्ज्ञानार्थं द्वे विद्ये।

द्वे विद्ये—"द्वे विद्ये वेदितव्य इति ह स्म यद्ब्रह्मविदो वदन्ति
परा चैवाऽपरा च।"

"अथ परा यया तदक्षरमधिगम्यते।"

अपरा विद्या भौतिकसाधनसमृद्धिद्वारा परविद्यायाः सहगामिनी जायते। तत्र अपरा—"ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।"

"विद्यां चाविद्यां च यद्स्तवेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥" (ई॰ उ॰)

भौतिकयुगे ये प्रगतिपथे नाग्रसरा अभवन् तेषां पारलौकिक-सुखकल्पना विडम्बनैव। अत एव शास्त्रकारैरैहिक-पारलौकिक-निःश्रेयसस्य प्राप्तेश्च विविधसाधनानि प्रदर्श्य तद्द्वारा परमशान्तेः शाश्वतमार्गः प्रकटीकृतः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शाश्वती शान्तिः—शाश्वती शान्तिरक्षयसुखानुभूतिश्च यथार्थात्मज्ञानादेव भवति, उक्तञ्च "ज्ञानादेव तु कैवल्यम्' । मुक्तेरसाधारणकारणं ज्ञानमेव प्रतिपादयति श्रुतिः—'तमेव विदित्वा अति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय', 'ऋते ज्ञानान्न मुक्तिरिति' । ज्ञानं विचारादेव सम्भवति । 'विचारेण विना किंचिद् ज्ञानं नोत्पद्यते क्वचित्, तस्माद् विचारः कर्तव्यः ज्ञानसिद्ध्यर्थमात्मनः' ।

को नाम विचारः—'कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते ।
उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥'

विचारो नाम—मम किं स्वरूपं ? इदं चित्रविचित्रं जगत् केन सृष्टम् ? तेन सह मम कः सम्बन्ध इत्यादिविषयाणां चिन्तनम् ।

उपनिषद्-ब्रह्मसूत्र-श्रीमद्भगवद्गीता - रामायणप्रभृतिषु विविधदार्शनिकग्रन्थेषु च अयमेव विचारः साकल्येन प्रतिपादितोऽस्ति, यो 'वेदान्त-विचार' अयं नाम्ना प्रसिद्धः ।

वेदान्तः—वेदानाम् अन्तो निर्णयो यस्मिन् स वेदान्तः । 'इष्टप्राप्त्यनिष्टपरिहारयोर्लौकिकालौकिकावुपायौ यो वेदयति स वेदः'; अथवा आत्मस्वरूपमस्तीति विद्यते येन स वेदः, वा विन्ते आत्मतत्त्वं येन स वेदः, यद्वा 'तदेव वेत्ति येन स वेदः, तच्च विन्दते लभते येन स वेद इति । स च वेदोऽधिकारभेदात् प्रयोजनभेदाच्च काण्डत्रयात्मकः, उक्तञ्च—

"कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात्" अर्थात् कर्मकाण्डम्, उपासनाकाण्डम्, ज्ञानकाण्डञ्चेति । तथा च—

'कर्माणि चित्तशुद्ध्यर्थम् ऐकाग्र्यार्थमुपासना ।
मोक्षार्थं ब्रह्मविज्ञानमिति वेदान्तनिश्चयः ॥

उक्तञ्च पूज्यपादैः श्रीशङ्कराचार्यैः—

'चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किञ्चित्कर्मकोटिभिः ॥'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्र ज्ञानकाण्डमुपनिषन्नाम्ना गीयते लोके। आध्यात्मिकाधिभौतिकाधिदैविकत्रिविधदुःखानामात्यन्तिकनिवृत्तिः निजानन्दस्वरूपप्राप्तिरेव ज्ञानस्य परमं प्रयोजनम्। अत एव उच्यते—"वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च"— वे० सा०

वेदान्ताधिकारी—"अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमातेति।"

अनेन ज्ञायते यत् वेदो वेदान्तधर्मस्याधिष्ठानम्।

वेदान्ताधिष्ठानम्—अयं च वेदो जगन्नियन्तुः परमेश्वरस्य श्वासप्रश्वासभूतः। उक्तञ्च—"अस्य महतो भूतस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वेदः सामवेद" इति वृ.। अत एव वेदोक्तसनातनधर्मः "वेदान्तधर्म" इति नाम्ना सम्बोध्यते। अयमेव दर्शनशास्त्राणां, धर्मशास्त्राणां नीतिशास्त्रादीनाञ्चाधारः। स च वेदान्तधर्मो ब्रह्मरूपः नित्यः ध्येयः एव, न तु अनुष्ठेयश्चापि यागादिवत्; यस्मिन् सर्वेषां धर्माणामन्तर्भावो भवति।

विश्वधर्मः—यद्यपि सन्ति जगतीतलेऽन्ये बहवो धर्माः—यथा ख्रिष्टधर्मः, पारस्यधर्मः, यवनधर्म इत्यादयश्च तथापि वेदान्तधर्म एव 'विश्वधर्मः' यस्मिन् निखिलानां मानवानामात्यन्तिकं कल्याणं निहितमस्ति।

भगवती भागीरथी त्रैलोक्यस्थानां पशु-पक्षि-मानवादीनामैहिकं पारलौकिकञ्च कल्याणं साधयति तथा वेदान्तज्ञानगङ्गापि अखिलमानवान् दुरितानि दूरीकृत्याखण्डसुखं प्रापयति; उक्तञ्च—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद् विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥
अतो ह्युपनिषदि वर्णितं वेदान्ततत्त्वमपि चिन्तनीयम्।

औपनिषत्कवेदान्ततत्त्वम्—उपनिषदि ब्रह्मण आत्मनो वा एकत्वं प्रतिपादितमस्ति, यथा, "एको देवो सर्वभूतेषु गूढ़ः सर्वव्यापी सर्वभूतान्तरात्मा" "सदेव सौम्येदमग्र आसीत् एकमेवाद्वितीयम्" छा० ६।२।१। अत एव तदेव ज्ञातव्यं नान्यत्। 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः'।

किन्तु एतत् सर्वे जना नावगन्तुं शक्नुवन्ति इति अवगम्य तत्र ब्रह्मणो निर्गुणं सगुणं निरुपाधिकं सोपाधिकञ्च रूपमपि वर्णितम्, यथा—

'द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च'
मूर्तं सगुणं, अमूर्तं च निर्गुणमिति।

तत्र मूर्तम्—'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद् ब्रह्मेति' तै० ३।१, 'यः सर्वज्ञः स सर्ववित्' 'सत्यकामः सत्यसंकल्प' इति।

अमूर्तम्—"सत्यं ज्ञानमनन्तं ब्रह्म" तै० १।२।१। "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययम्" मु० १।६।

तत्र सगुणब्रह्म मायोपाधिकमीश्वरः, निरुपाधिकं परं ब्रह्मेति च गीयते। ईश्वर उपासनाया उपयुक्तो वर्तते, निर्गुणं तु ध्यान एव वीक्ष्यते। अतो हि श्रुतिस्मृतिप्रभृतिषु द्विविधोपासना प्रतिपादिता दृश्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पौराणिक-वेदान्तस्वरूपम्—पौराणिकैः ऋषिमुनिभिरवलोकितं यत् उपनिषदि प्रतिपादितं ब्रह्मणः स्वरूपं तज्ज्ञानार्थं ये उपाया वर्णितास्ते न सर्वेभ्यः सुलभाः सुगमाश्च ।

तत्रैव ब्रह्मणः सुलभत्वं दुर्लभत्वं च प्रतिपादितम् ।

तत्र सुलभत्वम्—'त्यागेनैकेऽमृतत्वमानशुः' 'मनसैवेदमाप्तव्यम्' 'एषोऽणुरात्मा चेतसा वेदितव्यः' क० । 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' इति । क० उ०

दुर्लभत्वम्—'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' मु० । 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः" कठो० ।

एवमेव भगवान् श्रीकृष्णोऽपि दर्शयति—

'बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।' गी० ७,

'मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ।

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥' गी० ७,

एतादृशीं दुर्गमस्थितिमवगम्य पौराणिकैः श्रीराम - श्रीकृष्ण - विष्णु - शिवोपासना च प्रचालिता ।

सगुणोपासना—'वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते ॥'

यथा भागवते—'जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥' भा० १'

तत्र तत्प्राप्तेरुपाया अपि वर्णिताः सन्ति भक्तिर्ज्ञानं कर्म च ।

'योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म च भक्तिश्च नान्योपायोऽस्ति कश्चन ॥' भा० ११

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्रापि मोक्षसाधनभूतस्त्यागः वैराग्यं च सर्वतो विशिष्यते, एतदपि गीतायाम्—

'अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।' गी० ६

'अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥' गी० १२,

'श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥' गी० १२,

तथा च महाभारते—

सर्वे वेदाः सर्ववेद्याः सशास्त्राः सर्वे यज्ञाः सर्व इज्याश्च कृष्णः ।
विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये, तेषां राजन् सर्वयज्ञाः समाप्ताः ॥

कदापि काले सगुणभक्तिमाश्रित्य जनाः स्वैराचारपरायणा आत्मविचारहीनाश्च सञ्जाताः। बौद्धधर्मस्य प्राबल्यमभूत्। तदा भगवत्पूज्यपादैः श्रीशङ्कराचार्यैः अद्वैतवेदान्तधर्मः प्रतिष्ठापितः ।

श्रीशङ्कराचार्याणामद्वैतवादः—यज्ञियहिंसादीनां बहुलताम् अवगम्य बौद्धैरहिंसायाः पुरस्कारः कृतः । किन्तु कियद्दिनानन्तरं बौद्धधर्मोऽपि भ्रष्टाचारैरावृतोऽभवत् । तदा श्रीशङ्कराचार्यैरद्वैतं पुरस्कृत्योक्तम्—

'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।'

'आदौ ब्रह्माहमस्मीत्यनुभव उदिते खल्विदं ब्रह्म पश्चात् ।'
नानारूपेण प्रतीयमानस्य जगतो वस्तुतो नास्तित्वं, स तु नानारूपमय्या मायाया एव विलासः ।

'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ।' छा० उ०

'नेह नानास्ति किंचन' 'यत्र तु अस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् ?' इत्यादिश्रुत्या अविद्यामूलकोऽयं भेदः, तन्नाशे औपाधिक-भेदोऽपि विनश्यति ।

एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ मु० उ०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इतिवत् 'एकात्मवाद एव' श्रुतिस्मृतियुक्तिभिः स्वग्रन्थे संस्थापित इति स्पष्टं तद्ग्रन्थालोचकानां विचक्षणानाम् ।

नैष्कर्म्यस्थितिः—आत्मस्वरूपज्ञानमेव मानवानां परमं प्रयोजनम् । तज्ज्ञाते सति तस्य किमपि कार्यं नावशिष्यते, उक्तञ्च—

वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ क० वे०
समाधिमथ कर्माणि मा करोतु करोतु वा ।
हृदयेनास्तसर्वाशो मुक्त एव न संशयः ॥ क० वे०

भगवती श्रुतिरपि इममेवार्थमुपदिशति—

"न तस्य कार्यं करणञ्च विद्यते ।"

अनेन विचारेण अतत्त्वज्ञाः जनाः कर्तव्यपराङ्मुखा अभवन् । तान्सत्पथे आनेतुं तदुत्तरवर्तिभिराचार्यैः श्रीमाध्व-रामानुज-वल्लभादिभिर्द्वैतं विशिष्टाद्वैतं शुद्धाद्वैतं च प्रतिपादितम् ।

तत्र रामानुजवेदान्तमतम्—अचिन्त्य-ज्ञानघन-सर्वज्ञ - सर्वशक्तेः परस्मात् नारायणतः सृष्टिस्थितिप्रलयाः प्रवर्तन्ते । तदेव ब्रह्मेति । स एव सर्वशरीरेषु प्रकृतिप्रेरणया जीवभावं दुःखं च अनुभवति । तन्निवारणमीश्वरभक्त्या तत्प्रसादादेव भवति । अतो हि ईश्वरभक्तिरनुसरणीयेति ।

श्रीमाध्वमतम्—श्रीमाध्वानां हरिरेव परतरः परमात्मा अस्ति । एतत् सर्वं जगत्सत्यमेव वर्तते । जीवश्च हरेरेव भेदविशेषः । समेऽपि जीवास्तस्यैव परतरस्य हरेरनुचराः तद्भक्त्यैवामलनिजसुखानुभूतिरूपं मोक्षं लभन्त इति ।

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥ क० वे०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवंविध - विविधविचारप्रवाहैर्जनानां मतिः कुण्ठिता। सुदूर-पूर्वकाले वैदेशिकैरत्रागत्य स्वकीयधर्मस्य प्रचारः प्रसारश्च कृतः। फलतः परिभ्रष्टाः प्रलोभनैः सामान्यजनाः। तदा तदानीन्तनस्य तादृश-स्थिति - निवारणार्थं एकोनविंशतिशततमे ख्रिष्टीय-संवत्सरे सर्वधर्म-समन्वायकः श्रीरामकृष्ण-महाभागोऽवातरत्।

सर्वधर्मसमन्वयः—श्रीरामकृष्णैः समेषां धर्माणामनुष्ठानं विधाय तज्जनितनिजानुभूत्या तेषां समन्वयः संस्थापितः। तैरुक्तम्—एक-स्मिन् गन्तव्य-स्थाने केचित् संकीर्णया वीथ्या यानेन पद्भ्यां वा गच्छन्ति तथैव तेन तेन धर्मेण तया तया उपासनया च मानवा ब्रह्मस्वरूपं स्वात्मानुभवमेव प्राप्तुं प्रयतन्ते, तेषु केचित् प्राप्नुवन्ति च।

इत्येवमात्मैक्यवादः पूज्यपादैः भगवद्भिः श्रीरामकृष्णस्वामिपादैः प्रतिष्ठापितः प्रचारितोऽपि तदीयेषु शिष्येषु अन्यतमस्यान्तरङ्गस्य स्वामिश्रीविवेकानन्दस्य सन्तोषाय नालमभवदिति समस्ते भारतवर्षेऽ-स्मिंश्च जगति तमेवैकात्मवादं प्रचारयितुं स्वामिप्रवरो विवेकानन्दः प्रायतत।

विवेकानन्दस्याविर्भावः—सोऽयं स्वामी विवेकानन्दः १८६३ ईसवीय-जनवरी-मासस्य द्वादशदिनाङ्के वङ्गप्रदेशे अन्वितार्थनाम-धेयात् श्रीविश्वनाथदत्तात् सकलभुवनबीजभूतभुवनेश्वर्या इव मातु-र्भुवनेश्वर्याः समजायत। स कमनीयकान्तिमान् विलक्षणप्रतिभामण्डितो बाल्ये वयसि "नरेन्द्र" इति नाम्ना, तारुण्ये वयसि भगवता श्रीराम-कृष्ण-महाभागानामनुग्रहेण "विवेकानन्द" इति नाम्ना विश्वस्मिन् प्रसिद्धिमगमत्।

यो विवेकेन सारासारोपदेशात्मकेन जनान् आनन्दयति आनन्द-रूपतामापादयति वा स विवेकानन्दः।

एभिर्महाभागैर्जगति मानवेषु शाश्वतमहिमा, सत्यं, न्यायः, विश्वबन्धुत्वञ्च जागरितम्। निजाचारविचारैर्वेदान्तधर्मस्य प्रचारः प्रसारश्च कृतः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीगुरुप्रसादेन निजानुभूत्या च तैर्वेदान्तधर्म-विषये समये समये केचन विचाराः प्रकटीकृताः । ते यथा—

सर्वधर्माधिष्ठानम्—तद् यथा—"जगति यावन्तो धर्मास्ते न परस्परविरोधिनोऽपि तु ते सर्वेऽपि चिरन्तनशाश्वततत्त्वस्य विभिन्नानि रूपाणि सन्ति । सनातनमविनाशितत्त्वमेव समग्रविश्वस्याधारस्वरूपम् । तदेव नानादेशेषु विविधभावेषु प्रकाशते । वस्तुतस्तु विश्वस्मिन्नेक एव सनातनवेदान्तधर्मोऽनन्तकालादारभ्याक्षुण्णगत्या प्रचलितोऽस्ति" ।

यथा गङ्गा, यमुना, गोदावरी, नर्मदा, कृष्णा—इत्यादयो नद्यो विभिन्नपर्वततो निःसृत्य वक्रकुटिलगत्या सरलरूपेण वा सागरे सम्मिलिता भवन्ति तथैव विभिन्नधर्मा अन्ततो गत्वा एकस्मिन्नेवाविनाशितत्त्वे सम्मिलन्ति ।

"वेदान्तधर्मस्य प्रथमसोपानं द्वैतवादो यूरोपदेशे ईसाई-धर्मरूपेण परिणतो जातः । अद्वैतवादो योगानुभूतेर्बौद्धधर्मरूपे परिवृतोऽभवत् । संसारस्य सर्वे धर्माः वेदान्तदर्शनस्य विभिन्नशाखाः सन्ति । तेषां समष्टिरूपं वेदान्तदर्शनम् । 'द्वैतं' 'विशिष्टाद्वैतम्' 'अद्वैतम्' इमानि त्रीणि मतानि अतिलङ्घ्य किमपि धर्ममतं प्रभावितं भवितुं नार्हति । वेदान्तदर्शनस्य द्वैतं-विशिष्टाद्वैतम् अद्वैतञ्च सर्वाण्यप्यत्रैवान्तर्भवन्ति । इमानि मतानि मनुष्यस्य आध्यात्मिकोन्नतेस्तिस्रो भूमिकाः सन्ति । एतेषां प्रत्येकस्य प्रयोजनं विद्यते ।" भारतीयानां विभिन्नानां जातीनामाचारविचारेषु वेदान्तदर्शनमेव प्रतिबिम्बितमस्ति । शाक्तशैवगाणपत्यादिमतानि अपि एतस्यैव छायाभूतानि सन्ति ; अत एव भारतीयानां चेतांसि विश्वबन्धुत्वं शाश्वतीं शान्तिञ्च जागरयन्ति ।

विश्वबन्धुत्वं शान्तिश्च—अद्यत्वे विश्वस्मिन् सर्वत्राचारहीनता, धर्मविमुखता, कर्तव्यपराङ्मुखता, बुद्धिदौर्बल्यञ्चावलोक्यन्ते । आधि-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भौतिकादित्रिविधदुःखैः सर्वे मानवा आक्रान्ताश्च दृश्यन्ते। विलुप्तप्रायं सहभ्रातृत्वं सहमातृत्वं राष्ट्रस्नेहश्च सम्प्रति।

सत्सु च पुरोदितेषु दोषेषु आत्मनः समाजस्य देशस्य राष्ट्रस्य च समुन्नत्यवरोधकेषु न कथञ्चिदपि राष्ट्रस्य समुन्नतिः सम्भाविनीति। तद्दूरीकर्तुं दृष्टिपथमवतरति परस्परसौहार्दं सौमनस्यं च प्रतिष्ठापयितुं वेदान्तधर्मप्रचारः आधुनिकैरपि करणीयः। तथा च श्रुतिः—

"एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्॥
नित्यो नित्यानां चेतनश्चेतनानाम् एको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्॥"

क० उ०

"त्यागाच्छान्तिरनन्तरम्" "तत्-(ईश्वर-) प्रसादात् परां शान्तिम्" "ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति" इति स्मृतयश्च।

"अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥" पं० त०

इत्यादीनि बहूनि वचनानि वेदान्तधर्मोपयुक्तां शान्तिं विश्वभ्रातृत्वञ्च समर्थयन्तीति। अत एव वेदान्तधर्मस्य मानवानां वैयक्तिके, सामाजिके, राजनैतिके च जीवने समुचितं स्थानं विद्यते।

वैयक्तिकजीवने—वैयक्तिकजीवने आत्मनोऽविनाशित्वं प्रकाश्य निर्भयत्वञ्च वेदान्तविचारादेव लभते, यथा—

'न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥' गी० २

सामाजिकजीवने—"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥" गी०

"मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः॥" पं० तं०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इमानि वचनानि समाजे समदर्शनत्वं स्थापयन्ति यच्च एतस्मिन् युगे महदावश्यकम् ।

"हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।" गी० २

"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।" गी० ३

"सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।" गी० २

एतानि वचनानि समाजे राष्ट्रियतां राजनैतिकताञ्च द्रढयन्ति ।

एभिरेव भावैरोतप्रोताः श्रीस्वामिविवेकानन्दमहाभागा आसन्; अतश्च ते ज्ञानिप्रवराः ।

ज्ञानस्य चिह्नानि—वेदान्तदर्शने ज्ञानवत इमानि चिह्नानि प्रतिपादितानि । तथा हि—

'अक्रोधवैराग्यजितेन्द्रियत्वं, क्षमा दया सर्वजनप्रियत्वम् ।
निर्लोभदानं भयशोकहानं, ज्ञानस्य चिह्नं दशलक्षणञ्च ॥' क० वे०

इमानि सर्वाणि लक्षणानि स्वामिविवेकानन्दस्य जीवने परिस्फुरन्ति दृश्यन्ते—

अक्रोधः—'क्रुध्यन्तं न प्रतिक्रुध्येत् आक्रुष्टं कुशलं वदेत् ।
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ॥ क० वे०

श्रीविवेकानन्दमहाभागा यदा विदेशे गतवन्तस्तदा तत्र केचन बालकाः तत्परिच्छदं विधृत्य आकर्षन्ति स्म । केचित् करतालिकां ददति स्म, किन्तु ते सर्वमसहन्त ।

वैराग्यम्—यदा केनचिन्महाराजेन निजराजप्रासादकोष्ठे ते निवासार्थं प्रार्थितास्तदा तैरुक्तम्—"एतावद्भिः प्रकोष्ठकैः किं स्यात् ? पाद-प्रसारयोग्या स्वल्पा भूमिरेव शय्यार्थं पर्याप्ता अस्ति ।"

जितेन्द्रियत्वम्—विदेशे कृष्णवर्णो मनुष्योऽस्पृश्येभ्योऽपि गर्हितो मन्यते । अत एव शीतकालेऽपि तत्र वाष्पयानविश्रामस्थानीयपेटिकाश्रयेण येन केन प्रकारेण ते आत्मरक्षामकुर्वन् । सर्वत्र ते मिथ्यापमानम् असल्लाञ्छनं च प्राप्तवन्तोऽपि न मनागपि क्लेशमलभन्त ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किम्बहुना यत्र तत्र भृत्यैरप्यवमानिताः ताडिताश्चाभवन्। अथापि आत्मग्लानिं नान्वभवन्, नापि च स्वविचारप्रचारात् व्यरमन्। जितेन्द्रियतायाः परा काष्ठा जीवनतः परिस्फुरति तदीयजीवनचरित्र-पाठकानां पुरतः।

सर्वजनप्रियत्वम्—तैरुक्तम्—मूर्खा दीना ब्राह्मणाश्चाण्डाला भारत-वासिनो विदेशिनश्च सर्वे मम भ्रातरः, मम प्राणाः, ममेश्वराः सन्ति।

निर्लोभः—धर्मसभागमनसमये तैरुक्तम्—"सर्वजनसाधारणस्य दुःखमुक्तेरुपायान्वेषणार्थमेव मम सम्प्रति अमेरिकागमनम्।" तत्र गतः सन् सोऽभाषत यत्—"द्रव्यादिलाभार्थं नैवाहमागतोऽस्मि, अपि तु अन्नाच्छादनहीनेभ्यः स्वदेशीयेभ्यः युष्मत्सकाशाद् भिक्षार्थं समागतवान्।"

दानम्—"दानमेकं कलौ युगे" इति शास्त्रवचनमनुसृत्य दानधर्मं सेवाधर्मे परिणमय्य तेऽवदन्—"दानं चतुर्विधम्—धर्मदानं, विद्या-दानम् अर्थदानं प्राणदानञ्च। तत्र धर्मप्रार्थिभ्यो धर्मोपदेशदानम्, विद्याहीनेभ्यो विद्यादानं, क्षुधातुरेभ्योऽन्नदानं, मुमुर्षूणाम् औषध-पथ्याभ्यां सेवया च प्राणदानम्", इमानि चतुर्विधानि दानानि उप-दिष्टानि तैः स्वयमनुष्ठितानि च। तानि अद्यापि श्रीरामकृष्ण-मिशन-रूपेण परिस्फुरन्ति दृश्यन्ते यत्र तत्र नगरोपनगरेषु।

भयशोकहानम्—यदा हि विदेशे महामनसां स्वामिपादानामव-मानसमाचारं पत्रे दृष्ट्वा पठित्वा च तदीयाः शिष्या भारते क्लेश-मनुभवन्त आसन् तदापि तेऽमेरिकातः पत्रद्वारा परितप्तान् शिष्यान् समुपादिशन्, यथा—

"पवित्रतायाः प्रतापः, सत्यस्य प्रभावः, व्यक्तित्वस्य वैशिष्ट्यम् यावत्पर्यन्तमेतानि मन्निकटे निवसन्ति तावत्पर्यन्तं केऽपि ममानिष्टं कर्तुं न पारयन्ति। अतो भवन्तो मनागपि व्यथां न कुर्वन्तु। दुःख-परितप्तान् मानवान् तावन्न कोऽपि समुद्धर्तुमर्हति यावत् स्वयं क्लेशान्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परावज्ञाश्च न सहते। अहञ्च परोपकारव्रती न गणयाम्येवावज्ञादि-जनितदुःखं लोकसंग्रहार्थम्।

नरनारायणसेवा—लोकसंग्रहार्थं जनकादिभिर्महापुरुषैः कर्माणि अनुष्ठितानि, स्वयमाप्तकामेन सता भगवता श्रीकृष्णेनापि तानि आचरितानि। उक्तञ्च तेन गीतायाम्—

'न हि कल्याणकृत् कश्चित् दुर्गतिं तात गच्छति।' गी० ६,

'सक्ताः कर्माण्यविद्वांसो यथा कुर्वन्ति भारत।

कुर्याद् विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्॥' गी० ३,

स्वामिपादैश्च सदैव भगवद्वचनं निजगुरोराज्ञाञ्च साकल्येन हृदि रक्षद्भिः स्मरद्भिश्च नरनारायणस्य सेवा स्वयमाचरिता अन्यैश्चाचारिता, शिक्षिताश्च समेऽपि मानवाः। तथा हि—'मनुष्य एव भगवतः श्रेष्ठतमः प्रतीकः। तत्सेवैव तस्योत्तमा समर्चा। नरनारायणस्य सेवैव भारतस्य विभिन्नजातीयानां सदा विवादशीलसम्प्रदायानाम् एकतासम्पदानार्थं सहायिका भविष्यति।'

'प्राणिमात्रस्य सेवैव जगदीश्वरसेवा।' भगवान् कुत्रान्विष्यते ?—'दरिद्रा दुःखिनो दुर्बला घृणापात्रमस्पृश्याश्च किं देवा न सन्ति ?' सामाजिक - राजनैतिक - आध्यात्मिकप्रभृतिषु सर्वेषु क्षेत्रेषु मानवानां यथार्थकल्याणाय इदमेव सूत्रम्—'मानवो नारायणोऽस्तीति।'

अनया भावनया तैः साधवश्चौरा ब्राह्मणाश्चाण्डाला, धनिनो दरिद्राः पूजका ब्रह्मचारिणो मद्यपायिनश्च समे समभावेन पूजिताः। अनयैव नरनारायणसेवया लोका भुक्तिम् आत्मानुभूतिमन्ते मुक्तिञ्च प्राप्तुमर्हन्ति इति भावना लोकानां मनसि स्थापिता।

'यस्य चित्तं निर्विशेषं हृदयं यस्य शीतलम्।

यस्य मित्रं जगत्सर्वं तस्य मुक्तिः करस्थिता॥' क० वे०

मुक्ताः—अनया नरनारायणसेवया तैर्मुक्तिरपि प्राप्ता। यत्र तत्र तैरुच्यते स्म—'अहं स्ववक्तव्यानि हिन्दूरूपेण न प्रकटयिष्यामि, नापि ईसाईरूपेण अन्यस्य कस्यापि रूपेण वा, अपि तु निजरूपेणैव प्रकट-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यिष्यामि। मुक्तिरेव मम धर्मः। अतः स्वमोचनं प्राणिमोचनमेव च मम धर्मं' इति। एतैः उपदेशैस्ते मुक्ता एवासन् इति विश्वसिमः।

महात्मा—परिभ्रमतामेतेषां महामनसां यत्र क्वापि बुभुक्षया पिपासया च प्राणा उत्क्रमितुमिवाऽभवन् तदापि स्वसङ्कल्पात् ते महानुभावाः पर्वत इवाकम्प्या एवाभवन्। उक्तञ्च—

प्रलयस्यापि हुँकारैश्चलाचलविचालकैः।
विक्षोभं नैति यस्यात्मा स महात्मेति कथ्यते॥ क० वे०

शास्त्रप्रावीण्यम्—'वेदचतुष्टयादारभ्य वेदान्तदर्शनस्य उच्चतम-दार्शनिकशास्त्राणि नीतिशास्त्राणि योगशास्त्राणि पाश्चात्त्यकाव्यकला-विज्ञानस्य नूतना आविष्कारा राजनीतिः समाजनीतिश्चेत्यादिषु सर्वेषु विषयेषु ते प्रवीणा आसन्। तेषां गम्भीरपाण्डित्यं शास्त्रानुभूतिः त्यागो वैराग्यञ्च देशे विदेशे सर्वान्मानवान् प्रभावितानकार्षुः।

युगाचार्याः—तुलनात्मकभावेन ते स्वामिपादाः सांख्य-न्याय-वेदान्त-योगादिषड्दर्शनानां धर्मशास्त्रस्येतिहासविज्ञानादीनाञ्च विज्ञातारः समासन् शिक्षितारश्च। एतैर्महात्मभिर्ब्रह्मरूपो वेदान्तधर्मः समस्तायां भारतभूमौ अन्यत्रापि च पाश्चात्त्यदेशेषु दिक्षु विदिक्षु च समेषु मानवेषु अन्तःस्थापितः। अत एव तान् महात्मनः स्वनामधन्यान् वेदान्त-धर्मप्रतिष्ठातॄनाचार्यान् मुक्तकण्ठाः सन्तो वक्तुं वयमर्हामः इति न अतिशयोक्तिलेशोऽपि तु यथार्थवाद एव इति विद्वांसो विदांकुर्वन्तु। एते महानुभावा न कस्यापि एकस्या जातेः सम्प्रदायस्य वा आचार्या आसन् अपि तु मानवमात्रस्यैव ते समुपदेशकाः। अतो हि समेषां मानवानां पूज्यतमा आचार्या आसन् इति तत्राक्षरशः सङ्गतिमतस्त-ल्लक्षणतः विद्मः, तथा हि आचार्यलक्षणम्—

'आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्माद् आचार्यस्तेन चोच्यते॥' अ० सि०

इति शम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वितीयस्थानाधिकृतकुमारी सीमादासनामधेया एम० ए० छात्रा इत्येतस्याः प्रबन्धस्य सारः ।

विषयः—वेदान्तधर्मप्रतिष्ठाता युगाचार्यो विवेकानन्दः ।

'अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजनाति लोको मामजमव्ययम् ॥' गीता

'शृण्वन्तु विश्वे अमृतस्य पुत्रा
आ ये धामानि दिव्यानि तस्थुः ।
वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽति मृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥' (श्वेताश्वतरोपनिषद्)

❀ ❀ ❀

वैदिको धर्मः शिक्षयति—सर्वो मनुष्यः शुद्धबुद्धमुक्तस्वभाव आत्मस्वरूप एव, निखिलोऽपि 'सहस्रशीर्ष' - विराट्- पुरुषस्य अंशोऽस्ति । किन्तु जागतिक-विभिन्नावर्त्तघातप्रतिघातैर्नैव मानवः 'अहं ब्रह्मास्मी'ति परिज्ञातुं शक्नोति, मोहाच्छन्नस्तत्सम्बन्धे तद्विपरीतमेव भावयति ।

इयं भ्रान्तभावनैव धर्मग्लानिः । बहूनां मानवानामनात्मवादित्वं प्रवृत्तिमार्गाश्रयत्वमेव मानवसमाजे धर्मग्लानितायाः स्थितिः । वेद-पुराणतन्त्रप्रभृतिशास्त्रग्रन्थानां विद्यमानत्वेऽपि मानवसमाजेऽधर्मः प्रादुर्भवति । इतिहास - प्रसिद्धमिदं सत्यम् । प्रतियुगं धर्मग्लानिर्जायते । तत्प्रतिकारविधानमपि बोभवीति । श्रीमतो भगवतोऽपारकरुणा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चिराय मनुष्यान् विनाशपथेऽग्रेसारयितुं न समीहते, सा च भ्रान्त-विमूढविपथगामिनो मानवान् कालोपयोगिनमादर्शं दर्शयित्वा सत्यस्याश्रये समानयति, अमर-जीवनमार्गे परिचालयति च । भगवान् श्रीकृष्णो गीतामुखेन प्रतिजानीते—

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥' इति ॥

स च मानवरूपेणावतरति । युगप्रयोजनमनुसृत्य आदर्शजीवनेन स्वीयमहिम्ना सनातनं धर्मं राहुमुक्तं विधत्ते । पथिभ्रष्टान् दुर्बलान् मनुष्यान् कराभ्यां गृहीत्वा धर्मपथे प्रतिष्ठापयति, तदीयजीवनपूर्णतां प्रति दृष्टिं पातयन्तोऽवाचो विस्मयान्विता मनुष्यास्तं नरदेहधारिणं भगवद्रूपेण परिपूजयन्ति, जीवनस्यैकमात्रादर्शरूपेण गृह्णन्ति च ।

स्वामिविवेकानन्दो द्विषष्टिवर्षेभ्यः प्राक् अस्माज्जगतः प्रस्थितः, किन्तु तस्य जीवनस्य वाण्याश्च प्रेरणा साम्प्रतमपि संजीवितास्ति । स्वामिमहाभागः केवलं एकोनचत्वारिंशद्वर्षाण्येव भौतिकं शरीरमादा-यात्रावर्तत, एतस्मिन् स्वल्पे परिमिते जीवने स यत्किमप्यकरोत् तत् दैविककार्यमासीत् । स्वामिनः प्रादुर्भावोऽभवत् अनेक-शताब्दीभ्यो निपीडितानां भयत्रस्तानां विद्वेषघृणाभ्यां विच्छिन्नानां मानवानां मुक्तेः, अभयस्य एकतायाश्च आलोकं लोकयितुम् । अयं प्रकाशो यथा भारते आवश्यकस्तथैव संसारे सर्वत्र । स तं ज्ञानालोकं निजमहागुरोः श्रीरामकृष्णदेवस्य जीवनाद् भारतवर्षस्य वेदान्तमन्दरमथिताद् उप-निषत्क्षीरार्णवाच्च आनैषीत्—यत्र च मानवात्मनः शाश्वते महिमा-ध्वनि ध्वान्तं किमपि पिधानं नादधीरन् । प्रत्येकं मनुष्यः भगवतः प्रतीकः, भगवतः अंशः—'जीवः शिवः ।' मानवात्मा चिरमुक्तोऽस्ति, स च समस्तभयानां मोहस्य च परस्मिन् पारे वर्तते, मानवात्मनः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'काव्यतीर्थः, 'वेदान्तशास्त्री'

प्रतिष्ठा सर्वग्राहिण्याम् आत्मीयतायां प्रेम्णि च कृतपदा, स्वामिनो निजजीवनं उपनिषद्वाणीनामुज्ज्वलमुदाहरणं विद्यते।

स्वामी विवेकानन्दो यथा वंगदेशस्य तथैव समस्तस्य भारतस्य कृत्स्नस्य जगतोऽप्यासीत्। तस्य व्यक्तित्वम्, आध्यात्मिकसाधनं, परिव्रज्या, तदीयं पवित्रचरितं, गम्भीरपाण्डित्यं, प्रगाढं स्वदेशप्रेम, दीनहीनान् निर्यातितान् अवहेलितान् च प्रति तदीया उद्वेला सहानुभूतिः, तदीये वीर्यतेजसी, ज्ञानं, वैराग्यं, मानवसेवा, तत्कृतं भारतीयजातीयताया उद्बोधनं, विश्वहिते स्वात्मनियोगः, प्राच्ये प्रतीच्ये च चिन्ताजगति तदीयमवदानमित्यादयो गुणा निजमहत्तया, मनोहारितया गरिम्णा च अस्माकं मनः आकर्षन्ति, तदीयमपूर्वजीवनं सर्वदेशेषु सर्वकालेषु चानुशीलनार्हं विद्यते। तस्य जीवने कापि भौगोलिकी सीमरेखा नाविद्यत। चिन्तनं, भावुकता, कार्यस्य गाम्भीर्यम्, व्यापकत्वं च तच्चरित्रासक्तं यथा परिलक्ष्यते तथा तदन्यत्र दुरवापम्। स एकस्य नवयुगस्य मूर्तिमान् आदर्शमानव इव वर्तते। समाजस्य उच्चावचाः समेऽपि मानवास्ततः उद्दीप्तिं प्राप्तुं शक्नुवन्ति। एकाधिकरणस्था इयती शक्तिः एतावतां सद्गुणानामेकत्र सन्निवेशश्च सुतरां दुरवापौ। स्वामी विवेकानन्दो वस्तुत एव एकः पुरुपतल्लज आसीत्। तरुणेभ्यः प्रवीणेभ्यः पुरुषेभ्यः भारतीयेभ्यो वैदेशिकेभ्यश्च तस्य सुस्पष्टाः शताधिकाः कल्याणवाण्यः समुपलभ्यन्ते। तादृशा लोकशिक्षकाः संसारस्येतिहासे न तावद् भूयांसो लभ्यन्ते। स एको महान् युगप्रवर्तको महापुरुषः आसीत्।

१८६३ ईसवीयजनवरीमासस्य १२ तारिकायां कृष्णपक्षस्य सप्तम्यां तिथौ कलिकत्तास्थविश्वनाथदत्तस्य भुवनेश्वरीदेव्याश्च प्रथमपुत्ररूपेण एकः शिशुर्जन्मालभत। कमनीयकान्तिर्देवशिशुरसौ क्रमशः प्रियदर्शन प्रतिभामण्डित - शौर्यवीर्यपराक्रमनरशार्दूल - सौरभमयतरुणरूपेण रूपान्तरितोऽभवत्। अष्टादशवार्षिकं नरेन्द्रनाथं प्रथमतः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पश्यन्नेव श्रीरामकृष्णदेवः पर्यचिनोत्। सहैव च तदीययोगदृष्टिसम्मुखे नरेन्द्रनाथस्य सम्पूर्णमपि जीवनचित्रं भास्करप्रभावत् प्रकाशितमभूत्। स्वामिना विवेकानन्देन पाश्चात्यदेशतः स्वकीयं गुरुभ्रातरमेकमुद्दिश्य लिखितम्—"रामकृष्णावतारे ज्ञानं भक्तिः प्रेम च, अर्थात् अनन्तं ज्ञानम्, अनन्तं प्रेम, अनन्तं कर्म, अनन्ता जीवदयाप्यासीत्, युष्माभिरिदानीमपि नावधारितम् 'श्रुत्वाप्येनं वेद न चैव कश्चित्।' "What the whole Hindu race has thought in ages, he lived in one life. His life is a living commentary to the Vedas of all nations."

"समस्ताऽपि हिन्दुजातिर्युगसहस्रैर्यां यां चिन्तामकार्षीत् तेनैकस्मिन्नेव जीवने तत्र तत्र स्थितानां सर्वेषां भावानामुपलब्धिः कृता। तदीयं जीवनं सर्वजातीयवेदानां जीवित- भाष्यस्वरूपम्।" अन्यत्रापि तेन प्रोक्तम्—"सर्वभावानामेतादृशः समन्वयः संसारस्येतिहासे कुत्राप्यन्वेषणेनापि न लभ्यते, एतेनाप्यवधार्यतां यदसौ को देहं धृत्वा समागमत्। अवतारकथनं तदीयं लघुत्वसम्पादनमस्ति।" श्रीरामकृष्णदेवेन प्रोक्तम्—"नरेन्द्रः सहस्रदलकमलसमानः, अनेके जना अत्र समायान्ति, किन्तु नरेद्रतुल्य एकोऽपि नागच्छत्," अतः नरेन्द्रनाथः परवर्त्तिनि काले विवेकानन्दस्वामिरूपेण समस्तेऽपि भूमण्डले योगारूढपदमारुह्य कार्यमनुष्ठातुमशक्नोत्, यथा भगीरथः सुरनदीं पृथ्वीतलमवातारयत्, तथैव श्रीरामकृष्णो ज्योतिर्मण्डलस्य महान्तम् ऋषिं नररूपेण जगत्त्राणाय ध्यानभूमितोऽवतारयामास। श्रीविवेकानन्दस्वामिनो विषये श्रीरामकृष्णदेवव्याहरणमक्षरशः सत्यं प्रमाणितम्। स्वामिमहोदयः क आसीत्, विश्वकल्याणाय तेन किमनुष्ठितम्, सर्वेषामपि तेषामालोकनालोचनादिसमयः समायातोऽस्ति, तेन प्रतिपादितमिदं—"यदि कश्चिदन्योऽपि विवेकानन्दो भवेत् तदानीमसाववधारयेत् यद् विवेकानन्देन किमनुष्ठितम्।" तेनान्यदपि प्रतिपादितम्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"यन्मया प्रदत्तमस्ति तत्सार्धैकसहस्रसंवत्सरकालस्याशनमस्ति ।" जगति विश्ववासिनां कृते सार्धैकसहस्रवर्षस्य नवसंदेशस्तेन प्रदत्तः साम्य-मैत्री-स्वाधीनता-विश्वभ्रातृत्व-विश्वमानवतादीनां, विशेषतश्चाध्या-त्मिकक्षेत्रस्य कृते स्वामिना ये किल भावाः प्रदत्ताः, ते हि जगतः कल्याणाय विश्वशान्त्यै च विभिन्नधारातः कार्यकारितां प्रपद्यमाना भवन्ति, स्वामिनोऽमोघभावधारैव सांसारिक - समस्तचिन्ताशीलान् मानवान् समुद्दीप्तान् प्रकुरुते । स हि भावरूपेण सदैव जागर्ति सहस्रशो हृदयेषु चानुप्रेरणां प्रयच्छति च ।

बालको यथा यथाऽवर्धत, तथा तथा तस्य जीवनवैशिष्ट्यं प्राकट्यमवाप । शिशोरभ्यन्तरे या ब्रह्माण्डपरिचालनशक्तिरासीत् सा विभिन्नेषु छन्दःसु विविधरूपेषु च स्वीयं स्वरूपं प्रकाशयाञ्चकार, विवेकानन्देन स्पृश्यास्पृश्यविपरीता घोषणा कृता बभूव । बाल्यादेव तस्य जातिभेद - विचारविषये विशेष - कौतूहलमासीत् । परवर्तिनि काले स्वामिना प्रतिपादितम्—"आधुनिकहिन्दुधर्मो न विचारस्य, न वा ज्ञानस्य मार्गे वर्त्तते, स तु केवलं स्पृश्यास्पृश्यमार्गे एव जागर्ति । 'मां न स्पृश' एतावदेव । स्पृश्यास्पृश्यता चैकप्रकारतो मानसिको रोगः । स्पृश्यास्पृश्यविवेको न हिन्दु-धर्मः । अस्माकं शास्त्रेषु नास्त्यस्योल्लेखः । स एकोऽनादिः कुसंस्कारः, येन जातीयकर्मशक्तिः प्रत्येकस्मिन् क्षेत्रे निरुद्धा तिष्ठति । वस्तुतस्तु सम्प्रति धर्मोऽस्माकं भोजनगेहे प्रविष्टो-ऽस्ति ।" स्पृश्यास्पृश्यता किल ऐक्यबोधविरोधिनी वर्त्तते ।

अपूर्वया मेधया, तीक्ष्णया बुद्ध्या श्रुतधरत्वादि - सद्गुणैश्च साकं नरेन्द्रनाथो जन्म जग्राह । बाल्यादेव नरेन्द्रनाथः किं भयमिति न जानीते स्म । बाल्यकालादेव कस्यापि विषयस्य प्रत्यक्षप्रमाणप्राप्ति-मन्तरेण विश्वासमसौ नाकरोत् । नरेन्द्रनाथः क्रीडने कूर्दने च कुशलोऽभूत् । तस्याभ्यन्तरे संन्यासिनो रक्तमासीत् । कौमार्यादेव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संन्यासग्रहणसमीहा तस्मिन् स्वाभाविकी समभूत्। श्रीरामकृष्णदेवो यदा नरेन्द्रनाथं संन्यासधर्मे दीक्षितमकरोत् तदानीं तस्यावस्था चतुर्विंशतिवर्षदेशीया आसीत्। श्रीठाकुरस्य देहपरित्यागानन्तरं बराहनगरमठे आनुष्ठानिकभावेन तेन संन्यासदीक्षा गृहीता।

तस्याभ्यन्तरे यस्य विराट्पुरुषस्यावासः, तस्यैव सक्रियया शक्त्या प्रभावेण च बाल्यादेव स महान् तेजस्वी बभूव। सा शक्तिरनेक-प्रकारतः प्राकट्यमवाप। केवलं ज्योतिर्मण्डलस्य ऋषिरेव न हि, बुद्ध-शंकर-वाल्मीकि-व्यास - प्रभृतीनामात्मानो नरेन्द्रनाथस्याभ्यन्तरे समुदपद्यन्त इव। अत एव तस्याभ्यन्तरे विपुलाया अध्यात्मशक्ते-र्विकाशोऽभवत् न व्यष्टिमुक्तये, समष्टिमुक्तेः साधना-दया-उदारता-परदुःखकातरता-साम्य-मैत्री - स्वाधीनतात्मविश्वास-तेजो-वीर्य-स्थैर्य-धैर्य-दैहिक-मानसिकबल-प्रभृतीनामैहिकपारत्रिक-ज्ञानस्य सर्वाभ्यर्हित - प्रति-द्वन्द्विताया नेतृत्व-भावस्य च कृते समभूत्। भविष्यति समये धर्म-समाज-राष्ट्रेषु यद्विप्लवकरमान्दोलनमसावसृजत्, तस्य बाल्य-जीवन एव मुकुलितत्वमदृश्यत।

प्रतिभामण्डितः सदाऽऽनन्दमयो युवको नरेन्द्रनाथोऽल्पैरेवाहोभिः कालेजस्य विद्यार्थिनामध्यापकानां च विशेषप्रियपात्रतामगच्छत्। तस्यातुलनीया प्रतिभा, पाण्डित्यं, निर्मलस्वतन्त्रविचार-धारा, तर्क-शक्तिः, भावप्रकाशनरीतिः, सुमधुरसंगीतं चेति सर्वानेव मुग्धान् चक्रुः। पित्रोः शिक्षणमादर्शजीवनं च नरेन्द्रनाथस्य चेतसि प्रभूतप्रभाव-मकार्षीत्। यत्रासावगच्छत् तत्रैव तस्य व्यक्तित्वं प्रकाशितमभूत्। पवित्रतैवास्य चरित्रस्य श्रेष्ठो गुणः। वेषभूषायामसौ नितरां साधारणो बभूव। शरीरेण मनसा च पवित्रतैव तदीयजीवनादर्शः, अखण्डब्रह्मचर्यपालनस्य नियमितध्यानधारणा - प्रार्थनादीनां फल-स्वरूपं तस्य शरीरे मनसि चैतादृशमेकमाध्यात्मिकं तेजो विचकास, यस्याभिमुखं सर्वेऽपि जना नतमस्तका अभूवन्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्तर्द्वन्द्वघातप्रतिघातैः प्रपीडितो नरेन्द्रनाथः सत्यधर्मलाभाय ब्राह्मसमाजे समधिकगमागममकार्षीत्। किन्तु ब्राह्मसमाजस्य पद्धतिबद्धयोपासनया न तदीयं मनस्तृप्तिमासादयत्। केशवचन्द्रं प्रति तस्य श्रद्धा आसीत्। व्याख्यानादिश्रवणेन स तद्गुणमुग्धो बभूव, परमसौ यद् वस्तु समीहितवान् यस्यामवस्थायां स्थातुमैच्छत्—

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते॥

इत्येतस्या अवस्थाया अधिगतिं विना नैव तदीये मनसि शांतिरासादयितुं शक्यते स्म। ब्राह्मसमाजे न तेन तादृशी शान्तिरधिगता।

एतस्मिन्नन्तर्द्वन्द्वकाले तदाभ्यन्तरिको देवस्तदर्थं मार्गस्येङ्गितमकार्षीत्। औपनिषदा ऋषयस्तस्य हृदये समुपविष्टा इव तमशिक्षयन्—"न कर्मणा न प्रजया धनेन, त्यागेनैके अमृतत्वमानशुः।" अयममृतत्वलाभमार्गो हस्तेङ्गितेनेव तमाजुहाव। तस्य समयस्य किञ्चिदनन्तरं पूर्वं वा अपूर्वमेकं दर्शनं तदीयमनोराज्ये युगान्तरमुपास्थापयत्। तदानीमसौ सुदीर्घकालं ध्यानमकरोत्, सच्चिदानन्दस्य ब्रह्मणो ध्यानं तस्य प्रियमभूत्, तेनासौ महान्तमानन्दमलभत। बुद्धदेवस्य जीवनप्रभावो नरेन्द्रनाथस्योपरि विपुलभावेन पपात।

अतः नरेन्द्रनाथस्य मनोराज्ये प्रचण्डो झञ्झावातः प्राचरत्। देवेन्द्रनाथ-महर्षेर्वार्तया तस्य मनो न शान्तिं जगाम। सहैव भारतीया अनेकाः समस्यास्तस्य चिन्ताविषयीभूता अभूवन्। जातिगताधिकारस्य वैषम्यस्य चासौ पक्षपाती नासीत्। हिन्दुधर्मस्य संकीर्णतामपसार्य जातीयजीवनस्योज्जीवनमनुष्ठातुं तस्यैका परिकल्पना बभूव। ब्राह्मसमाजस्य प्रभावोऽपि तस्य चिन्तासमुद्रे महान्तमावर्त्तमुदपादयत्। जागतिका अनेकाः समस्यास्तस्य चिन्ताविषयीभूता बभूवुः। शतशश्चिन्तास्तदीयं तरुणमानसं व्याकुलीचक्रुः। रात्रिपर्यन्तं ध्यानानुष्ठानेन तदीयं सुन्दरनयनयुगलं रक्ताभमभवत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यो वै भूमा तत्सुखं, नाल्पे सुखमस्ति ।

भूमैव सुखं, भूमा त्वेव विजिज्ञासितव्यः ॥ (छा० उ० ७।२३।१)

आर्यमहर्षेरियं वाणी तदीयतरुणप्राणोपरि नैजमधिकारमकरोत् । भूमानन्दान्वेषणाय तस्य प्राणा व्याकुलत्वं प्रापुः, केवलमात्मचिन्ता, आत्मनो मुक्तिर्वा न, विश्वेषां मानवानां समस्तदुःखविमुक्तेरुपायोद्भावनहेतवे तेन सम्पूर्णा निजशक्तिर्नियोजिता ।

१८८१ ईसवीयो दिसम्बरमासः, नरेन्द्रस्य सर्वे विचारा वैपरीत्यं गताः । श्रीरामकृष्णस्य प्रत्येकं वचनं, व्यवहारश्च नरेन्द्रनाथस्य मनसि महान्तं विस्मयमुदपादयत्, एकदा श्रीठाकुरो नरेन्द्रस्य करं गृहीत्वा उवाच—"एतावद्दिवसानन्तरमागतोऽसि, अहं त्वां प्रतीक्षमाणो व्याकुलस्तिष्ठामि, अत्र किञ्चिद् अवधानं देयमासीत् ।" द्वितीयक्षणे करौ बद्ध्वा रुदन्नसौ प्रोवाच—"अहं जानामि प्रभो, त्वं स एव पुरातन ऋषिः, नररूपेण नारायणोऽसि, जीवानां दुर्गतिनिवारणाय पुनः शरीरं धृत्वा समागतोऽसि ।" भगवान् द्रष्टुं शक्यते न वा, इति प्रसंगे श्रीरामकृष्ण आशासमन्वितं वचनं श्रावयन् उवाच "ओम्, स द्रष्टुं शक्यते ।" श्रीरामकृष्णस्य वार्तालापेन व्यवहारेणाद्भुतेन च तस्य मनसि तुमुलो झञ्झावातः समुत्पादितः । यथा यथा स व्यचारयत्, तथा तथा तस्य अर्धोन्मादिमानवस्य जीवनं गूढतापरिपूर्णं प्रतीतमभवत् । रात्रिन्दिवं प्रतिक्षणं च श्रीरामकृष्णचिन्तनानि तमस्थिरमकार्षुः । एकमनिर्वचनीयमाकर्षणं तदीयं सुदृढमपि मानसमभ्यभवत्, नरेन्द्रनाथस्य मानसे युगान्तरमुपतस्थौ । किमियं सम्मोहिनी विद्या, इन्द्रजालं वा, किं वाऽन्यत् किमपि ? किन्तु नरेन्द्रनाथस्य मनस्तत्स्वीकर्तुं नैच्छत् । नरेन्द्रनाथेन सह श्रीरामकृष्णस्य सम्बन्धः समधिको गम्भीरः स्वतन्त्र इव चासीत् । श्रीरामकृष्णो नरेन्द्रनाथश्चोभावभिन्नात्मानौ आसाताम्, कतिचिद्दिनानन्तरं श्रीरामकृष्णस्याध्यात्मिकी शक्तिर्विद्रोहिणं नरेन्द्रं वश्यतामनयत् । तदानीमसौ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीरामकृष्णं पथप्रदर्शकगुरुरूपेण स्वीचकार। एतस्मिन् स्वीकारे श्रीरामकृष्णस्य विराडाध्यात्मिकी शक्तिरविद्यत। नरेन्द्रनाथस्य मन ईश्वरमधिगन्तुं व्याकुलीबभूव। तस्मिन्नवसरे श्रीरामकृष्णः दीर्घकालपर्यन्तं नरेन्द्रनाथं कठोरतपःसाधनासु नियोजितवान्। फलतश्च नरेन्द्र उत्तरोत्तरमाध्यात्मिकोन्नतिसोपानपरम्परामारुह्य अन्तेऽद्वैतात्मज्ञाने दृढप्रतिष्ठितो बभूव।

एकस्य मासस्य द्वयोर्मासयोर्वाऽभ्यन्तर एव नरेन्द्रनाथस्य पारिवारिकजीवने एको महान् संकटसंकीर्णो मुहूर्त उपतस्थौ। हृदयरोगाक्रान्तस्तदीयजनको विश्वनाथदत्तः शरीरमत्यजत्। पिता एकां वराटिकामपि न तत्याज, ऋणमपि किञ्चिदासीत्, इदानीं नरेन्द्रनाथचेत ईश्वरं प्रति विद्रोहशीलमभूत्। तेन यथार्थतः संसारपरिचयः प्राप्तः, परन्तु तदानीं बहुविधविघ्नबाधासंवलितकष्टाभ्यन्तरतः तदीयजीवनं गतिशीलं बभूव, दुःखकष्टदहनेन तस्य जीवनमौज्ज्वल्यमण्डितमभूत्। श्रीरामकृष्णस्य प्रार्थनया नरेन्द्रनाथस्य पारिवारिको धनाभावो कियदंशतो दूरं गतः, परन्तु पारिवारिकी समस्या नितरां जटिलत्वमापत्। नरेन्द्रो महता धैर्येण आत्मिकबलेन बलीयान् भूत्वा वीर इव एतस्या विकटस्थितेरभियानमकरोत्, श्रीरामकृष्णस्य लोकोत्तरजीवनं तं समधिकभावेन समाकर्षत्।

श्रीरामकृष्णो देहावसानस्य कतिचिद्दिनेभ्यः प्राक् जगद्धिताय, नरेन्द्रस्याभ्यन्तरे स्वकीयामाध्यात्मिकशक्तिं संचारयामास, स च श्रीठाकुरस्य विपुलाध्यात्मिकशक्तेरुत्तराधिकारी बभूव। एकस्य आध्यात्मिकदीपकस्य शिखया अन्यो दीपकः प्रजज्वाल, अनन्तरं शतशो हृदयेषु शिखासौ प्राज्वलत्। नरेन्द्रस्याभ्यंतरे शक्तिरूपेण श्रीरामकृष्णोऽनुप्रविष्टः, उभावेकतां गतौ। नरेन्द्रनाथहृदये या किल विश्वकल्याणसाधनसमीहा जागर्त्तिमभजत्, सापि श्रीठाकुरस्य इच्छयैव सम्बभूव। विवेकानन्दहेतुना संसार श्रीरामकृष्णं प्रति ऋणी वर्तते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वामिना विवेकानन्देन तस्य वेदमूर्त्तेः श्रीरामकृष्णस्य वाणी किल विश्ववासिनां निकटे प्रचारिता, तस्य गुरुः श्रीरामकृष्णः कस्यचिद्-विशिष्टदेशस्य, जातेर्धर्मस्य वा कृते नागच्छत्, स हि सनातन-वैदिक-धर्मजीवितस्वरूपः, नवतम - प्रकाशशाली, विश्वधर्मप्रतीको, द्वैत-विशिष्टाद्वैताद्वैत-शैव-शाक्त-गाणपत्यं - मुसलमान - ख्रैस्त-जरोथुष्ट्रिय-प्रभृतीनां सांसारिकसर्वधर्ममतवादानां युगोपयोग्याधुनिक-प्रकाशशीलः मानवसभ्यता - प्रगत्युन्नयनेन सह भविष्यत्युद्भविष्णूनां सम्भाव्य-मानोद्भवानां निखिलानामेव धर्माणां परिपूर्ण--विकासरूपेण समागतः, परमसत्यस्यास्य जगति विज्ञापनमावश्यकमासीत्। तदिदं विवेकानन्द-द्वारैव समभूत्।

आधुनिकयुगे स्वामी विवेकानन्दः केवलं पूर्वपश्चिमजगतः सम्मेलनस्यैव न हि, प्रत्युत भारतस्यातीतवर्त्तमानकालयोरपि सेतुरिव संबभूव। भारतीयसंस्कृतेः श्रेष्ठत्वविशिष्टत्वसम्बन्धे तेनानेके विषयाः प्रतिपादिताः, तेनेयमपि घोषणा कृता यत् समस्तेऽपि जगति साम्यमैत्री-संस्थापनाय भारतीया संस्कृतिरेव सर्वाभ्यर्हिता विचकास्ति। अतो भारतीयसंस्कृतेः संरक्षणं प्रथमं प्रयोजनम्। आसीदियं तदीया वाणी— "सांस्कृतिकजीवने पूर्णताविधानाय स्वीयां प्रकृतिमनुसृत्य अस्माभिरग्रे सर्तव्यम्। पाश्चात्त्य - समाज - प्रचलित - कर्मपद्धतेरनुसरणमस्माकं देशे व्यर्थमास्ते।

"वयं पाश्चात्त्या भवितुं न शक्नुमः। अतः पाश्चात्त्यजातीनाम-नुकरणमस्मदर्थं व्यर्थमेव, आध्यात्मिकतां विसृज्य यदि यूयं जडाश्रय-पाश्चात्त्यसभ्यताभिमुखमग्रे सरिष्यथ, तदा तृतीयपुरुषात्परमेतज्जाति-विलोपोऽनिवार्य एव, जातीयो मेरुदण्डो भग्नो भविष्यति, जातिस्वरूप-प्रासादस्याधारो नंक्ष्यति च, फलतः आस्माकीनः सामूहिको ध्वंसोऽ-वश्यम्भावी सम्पत्स्यते।"

सांस्कृतिक - सामञ्जस्यविधान - विषये तेनोक्तम्—"भारतं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बाह्यसंसारं परित्यज्य न संसर्तुमर्हति, अस्माकं सहस्रवर्षव्यापि दासत्वं तस्या बुद्धिहीनताया दण्डस्वरूपं विद्यते, भारतवासिनो भारताद् बहिर्न गमिष्यन्तीति धारणा नितरां बाल्यविजृम्भिता, यूयं यावदधिकं भारताद् बहिर्गत्वा भूतलनिवासिनीभिर्जातिभिः साकं मिलिष्यथ तावदेवाधिकं युष्माकं देशस्य कल्याणं भविष्यति।

भारतीय-संस्कृति-प्रचारमहत्त्व-सम्बन्धे तस्यायं निर्देशः—"अस्माकं जातीयप्राणशक्तिमुद्बुद्धां तेजोदीप्तां च विधातुमेकमात्रोपायो भारतीय-भावधारा-माध्यमेन पृथिव्यां सञ्चारः एव।...किन्तु यस्मिन् दिने धर्मक्षेत्रेऽपि पाश्चात्त्यदेशवासिनां हस्तेषु नैजमात्मानं समर्प्य भारत-देशवास्तव्यास्तच्चरण - समीपमुपविश्य धर्मं शिक्षितुमीहिष्यन्ते, तस्मिन् दिवस एव अधःपतित - भारतीयानां जातीयवैशिष्ट्यं सदा-कालकृते विलुप्तं भविष्यति। मया विश्वस्यते एतद्धर्मानुशीलनेन वेदांतस्य च व्यापकप्रचारेण देशोऽयं पाश्चात्त्यभूभागा अपि उभये किल लाभवन्तो भविष्यन्ति।" स्वामिमहोदयो निजजीवने महा-कार्यस्यैतस्य शुभसूचनां कृत्वा जगाम।

❀ ❀ ❀

श्रीरामकृष्णो नरेन्द्रनाथं मोहितमकार्षीदिव। श्रीठाकुर एव विवेकानन्दं विश्वप्रेमिरूपेण संघटितमकरोत्। स्वामी विवेकानन्द आन्तरिकैकांतप्रदेशे विवेकस्याह्वानमाकर्णयितुं प्राभवत्। तेनावा-बुध्यत यद् विश्वमपि प्रकम्पयितृ-विराट्कर्त्तव्यं तस्य प्रतीक्षां विधत्ते। तदीयविचाराभ्यन्तरे प्रतिभासिता अभूवन्—नवयुगस्योन्मादना, पाश्चात्त्यसभ्यतायाः सर्वग्रासिनी बुभुक्षा, तत्फलस्वरूप - दुःखवेदना, चतसृभ्यो दिग्भ्यः समुत्थितोत्पीडितमानवताया मूकमावेदनम्, भारतस्यातीताभ्युदयस्य भविष्यत्समुत्थानस्य शक्तेश्च समारोहः। तच्च पुनरभ्युत्थानं श्रीरामकृष्णं केन्द्रीकृत्य सम्पत्स्यते। भारतवर्षेण सर्व-जनीन - कल्याणाय जीवितेन स्थातव्यम्। यतः समस्तविश्वस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आध्यात्मिकभावधारायाः पुनरुद्दीपनेन सह भारतस्य कल्याणं संहतमास्ते, विश्वकृते एव भारतेन जीवितव्यमस्ति ।

स्वामिनो विवेकानन्दस्य जीवने ऐक्यब्रह्मज्ञानस्य विशेषतः प्रयोजनमासीत् । सर्वोऽपि बाह्यप्रकाशः ईश्वरस्यैवांशः—एतस्यामनुभूत्यां प्रतिष्ठितो भूत्वा एवासौ संसारस्यागणितनरनारीणां शिवज्ञानेन सेवां कर्तुमशक्नोत् । तेन प्रतिपादितम्—"ईश्वरस्तव सम्मुखेऽनेकरूपेण विराजते । तं परित्यज्य कुत्र त्वम् ईश्वरम् अन्वेषयिष्यसि ? जीवेषु यः प्रेम करोति स एव यथार्थतः ईश्वरस्य सेवां कुरुते । प्राणिमात्रस्य सेवैव जगदीश्वरसेवा । तस्य ब्रह्मदृष्टिः केवलं मनुष्येषु सीमिता नासीत्, तदीया करुणा सर्वेषु जीवेषु अतिष्ठत्; अत एव तेन 'जीव-प्रेम्णः' मन्त्रः श्रावितः ।

स्वामिनं विवेकानन्दं प्रति श्रद्धांजलिं समर्पयन् **श्रीमानरविंदः प्रोवाच**—"'शक्तिमान् पुरुषः' इति कथनयोग्यः यदि कश्चिदस्ति तदाऽसौ स्वामी विवेकानन्द एव । विवेकानन्दः पुरुषसिंह आसीत् । वयमनुभवामः, स्वामिनो विवेकानन्दस्य शक्तिः प्रभावश्च प्रचण्डभावेन कार्यं कुरुतः । वयं ब्रूमः—दृश्यतामसौ विवेकानन्दो यो भारतमातुः तत्संतानानामन्तरात्मसु इदानीमपि निवसति ।"

एकदा हिमालयस्याह्वानं स्वामिनं व्याकुलमकरोत् । स आत्मानं मानवसमाजतः पृथग् विधाय, सांसारिक - सर्वविधदायित्वमुक्तोऽभवत् हिमालयस्य निर्जनताभ्यन्तरे आत्मानन्दे निमग्नतामैच्छत् । स्वामिना प्रोक्तम्—"यावदहं आत्मज्ञाने दृढप्रतिष्ठितो न भवामि न तावत् परावर्तिष्ये ।"

परिव्राजकरूपेण देशपर्यटनसमये दरिद्र-पददलित-तथाकथित-निम्नश्रेणीनां दुःखदशायाश्चित्रं यत्तेन दृष्टं तदपि तस्य मनसि अङ्कितमभवत् । अन्या अपि बहुविधाः समस्यास्तदीयचेतसि समुदिता बभूवुः । भारते नारीजातेर्विषयेऽपि स्वामिना विभिन्न-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थानेष्वालोचना कृता वर्तते। "....किं त्वं निजमातृजातिदशां समुन्नतिं नेतुं शक्नोषि ? यद्येवं तदैव तव कल्याणाय आशा कर्तुं शक्यते। मातरो यदा समुन्नता भवेयुः, तदानीमेव तदीयानां योग्य-सन्तानानां महती कीर्त्तिर्देशमुखमुज्ज्वलयिष्यति। तदानीमेव च देशे संस्कृतिपराक्रमज्ञानभक्तीनां पुनरुत्थानं भवितुं शक्नोति। मनुनापि प्रोक्तम् "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।" ...वैदिक्य औपनिषदिक्यो मैत्रेयी-गार्गी-प्रभृतयः पुण्यवत्यः स्त्रियः ब्रह्मवादिन्यो भूत्वा ऋषिस्थानं प्राप्नुवन्।...प्राचीनसमये स्त्रीणां ज्ञानार्जनाधिकार आसीत्। वर्तमानयुगे ताः तदधिकारवञ्चिताः कथं भविष्यन्ति ?"

❀ ❀ ❀

कदाचित् स्वामी स्वस्य अभ्यन्तरे एकस्या महाशक्तेः स्फुरणा-नुभवं चकार। तेन जीवनस्य महत्तर-कर्त्तव्य-संधानमपि प्राप्तम्। संकल्पे दृढो भूत्वा स एकस्मिन् दिने गुरुबन्धून् आहूय प्रोवाच,— "मम जीवनस्य व्रतं स्थिरमभूत्। अधुना सर्वबन्धनमुक्तो भूत्वाऽहं एकाकी भ्रमणं कर्तुमिच्छामि, मया सह केवलं भगवान् एव स्थास्यति।" १८९१ ईसवीयजनवरीमासस्य अन्तिमभागे स एकाकी निर्जगाम।

परिव्राजकजीवनेऽपि स्वामिनः प्रधानकार्यमभवत्—'वाणीप्रचारः'। तस्यैकस्मिन् पत्रे लिखितमासीत्—"मया जगति किमपि सन्देष्टव्य-मस्ति। तदहं निजभावेन वदिष्यामि, अहं स्ववक्तव्यानि हिन्दूरूपेण न प्रकटयिष्यामि, नापि ईसाईरूपेण, अन्यस्य वा कस्यापि रूपेण। अहं निजरूपेणैव प्रकटयिष्यामि, मुक्तिरेव मम धर्मः"।

तस्याभ्यन्तरे भारतस्य भविष्यद्विषये या कल्पना आसीत् तस्याः सम्बन्धे सोऽब्रवीत्—"...भावि भारतं प्राचीनभारतात् उन्नततरं भवितुमर्हति। यस्मिन् दिने रामकृष्णो जन्म लेभे तस्माद् दिवसादेव वर्तमाने भारते सत्ययुगस्याविर्भावोऽभवत्। यूयमपि तस्य सत्ययुग-स्योद्बोधने विश्वासं मनसि निधाय कार्यक्षेत्रेऽवतीर्णा भवत"।

❀ ❀ ❀

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवेकानन्दस्वामी प्राच्य-पाश्चात्त्यदेशेषु यं वेदान्तप्रचारं चकार तस्य संक्षिप्तः परिचयः तस्यैकस्मात् पत्रात् ज्ञायते—"…सर्वे धर्माः वेदान्ते निहिताः सन्ति, अर्थात् वेदान्तदर्शनस्य द्वैतम्, विशिष्टाद्वैतमद्वैतम्, इमानि त्रीण्यपि मतानि तिसृणां कक्षाणामथवा भूमिकानामन्तः सन्ति तथा एकस्मात् परमपरमायाति। इमानि त्रीण्यपि मनुष्यस्याध्यात्मिकोन्नतेः तिस्रो भूमिकाः सन्ति। एतेषां सर्वस्य प्रयोजनं विद्यते, इदमेव धर्मस्य वक्तव्यम्। भारतस्य विभिन्नजातीयानाम् आचारव्यवहाराणामभ्यन्तरे प्रयोगफलरूपतः वेदान्तदर्शनं यद् रूपमगृह्णात् तदेव यथार्थो हिन्दूधर्मः। वेदान्तधर्मस्य प्रथमसोपानं द्वैतवादः यूरोपीयजातीयानां भावान्तरतः ईसाईधर्मरूपेण परिणतो जातः। सेमिटिकजातीयानां भावाभ्यन्तरात् मुस्लिमधर्मस्य रूपेण स एव परिणतो बभूव। अद्वैतवादः योगानुभूतिरूपेण बौद्धधर्मे परिवृत्तो जातः इत्यादि। इदानीं 'धर्मः' इत्युक्ते वेदान्त एव प्रतीयते। विभिन्नजातीयानां विभिन्नप्रयोजनैः पारिपार्श्विकतया अन्यान्यावस्थानुसारं च तस्य प्रयोगः विभिन्नरूपः अवश्यमेव भविष्यति। यूयं जानीत यत् मूलं दार्शनिकतत्त्वमेकमस्ति यद्यपि, तथाऽपि शाक्तशैवादिसाम्प्रदायिकाः स्वस्वविशेष-धर्ममतस्य अनुष्ठानपद्धतेश्च अभ्यन्तरे तस्मै (वेदान्ताय) नैजं रूपं प्रायच्छन्। ··

"अद्यावधि संसारे यावतां धर्माणामभ्युदयो जातः सर्वे वेदान्तधर्ममूलकाः, अथवा वेदान्तधर्मस्य विभिन्नाः शाखाः सन्ति। तेषां शाखाधर्माणां समष्टिरूप एव वेदान्तधर्मोऽस्ति, भविष्यत्यपि कियतामपि धर्माणामभ्युदयः कुतो न भवेत्, सर्वे वेदान्तधर्ममूलका भविष्यन्ति। द्वैतं, विशिष्टाद्वैतम्, अद्वैतम्, इमानि त्रीणि मतान्यतिलंघ्य किमपि धर्ममतमुत्पन्नं न भविष्यति। श्रीरामकृष्णः तस्यैव वेदान्तधर्मस्य मूर्तिः अस्ति। स सर्वभावमयः तथा सर्वधर्मस्वरूपो वर्तते।"

स्वामिमहोदयस्य कीदृग जीवनव्रतमवर्तत तत् तस्यैस्कमात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पत्रादाभासते— ···"एकतस्तु भारतस्य तथा विश्वस्य भाविधर्मसम्बन्धे मामकीना परिकल्पना, अपरतस्तु येषामुपेक्षितानां बहूनां नरनारीणां दिनानि दुःखान्धतमसे क्रमशो निमज्जन्ति। येषां साहाय्यप्रदाता यद्वा येषां सम्बन्धे किमपि विचारयिता वा कश्चिदपि न विद्यते।··· ये दीनहीनास्तथा पीडिता वर्तन्ते, तेषां पीडा-प्रतिकारेषु सुख-सौभाग्यनीतिधर्मशिक्षायाश्च प्रापणं मदीयं व्रतं मनोरथो वा वर्तते, अस्याहं पुरश्चर्यामनुष्ठातुमभिलषामि, अथवा मृत्युं वरिष्यामि।" विश्वकल्याणवेदिकायां तस्य हृदयमुत्सृष्टमासीत्।

विवेकानन्दस्वामी स्वोद्देश्यं प्रकटयन् आह—"देशस्य कार्यमेव मम कार्यम्। अहं मन्ये यदस्माकम् आध्यात्मिकभावं—वेदान्तधर्मं पाश्चात्त्याः गृह्णन्तु।·तस्य विनिमये पाश्चात्त्येभ्यः कृषिः शिल्पं विज्ञानं च ऐहलौकिकोन्नतये यदप्यावश्यकं भवेत् तत् सर्वं अस्माभिः शिक्षणीयं भविष्यति। एवं प्राच्य-पाश्चात्त्यसभ्यतयोः सम्मेलनेन नवीनायाः सभ्यताया उद्भवो भविष्यति। तेनैव संसारस्य कल्याणं सम्पत्स्यते, श्रीरामकृष्णस्य जीवनादर्शेन प्राच्य-प्रतीच्य-सभ्यतायाः सङ्गमभूमिं प्रस्तोतुम् अहं निजजीवनं समार्पयम्।"

स्वामिना हृदयस्यावेगेन प्राच्य-प्रतीच्यानां सभ्यतयोः भावयोश्च आदानप्रदाने कर्तुं पाश्चात्त्यदेशेषु वेदान्तवाणी प्रचारिता। सोऽवदत्— ···"तस्माद् यूयं ज्ञातुं पारयथ यदस्माभिः विदेशगमनं करणीयमेव। अस्माभिः द्रष्टव्यं यत् अन्यदेशानां समाजयन्त्रं कथं परिचालितं भवति, एवं यद्यस्माभिः पुनरेकजातिरूपेण परिणतैर्भवितव्यं चेत् तदा अन्यजातीयानां विचारेण साकम् अबाधः सम्पर्कः स्थापनीयो भवेत्।···हे प्रभो! कदा एको मनुष्यः अपरं मनुष्यं भ्रातृसाम्येनं पश्येत्?"

कुमारिकान्तरीपे मातृकुमारीमन्दिरे अश्रु स्रावयन् स्वामी विवेकानन्दः देशमातुः पादयोः प्रणम्य संकल्पमकरोत्—"जननि! न त्वहं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कामये भोगान् न सुखं नापुनर्भवम्, कामये दुःखतप्तानां प्राणिनामार्त्तिनाशनम्"।

श्रीरामकृष्णदेवस्य अभिप्रेतं मत्वा भारतीयानां दुःखविमुक्तये स पाश्चात्त्यदेशगमनस्य दृढं संकल्पमकरोत्। यात्राया दिनं ३१, मई-मासस्य, प्रस्थानं बम्बई-नगरतः इति निर्धारितम्। ...स्वामिविवेकानन्दस्य समुद्रयात्रा एका विशिष्टा गुरुत्वपूर्ण-घटना आसीत्। अस्याः सम्बन्धे श्रीमानरविन्दोऽलिखत्—"विवेकानन्दस्य विदेशयात्रया सर्वप्रथममिदमेव सुस्पष्टतया सूचितं भवति—भारतं केवलं जीवितुं न प्रबुद्धम्, प्रत्युत आध्यात्मिकभावधारया संसारं विजेतुं भारतेन प्रशंसनीया भूमिका ग्राह्या भविष्यति।"

विवेकानन्दस्य पाश्चात्त्याभियानमादितोऽन्तं यावत् अतीव विपत्संकुलमासीत्। प्रतिपदमेव सुदीर्घचतुर्वर्षाणि प्रत्यहं बहूनेव बाधा-विघ्नानतीत्य सोऽग्रेसरोऽभूत्। सम्प्रति प्रायशः सप्ततिवर्षेभ्यः परं सर्वत्रैव स्वामिमहोदयस्य विजयगीतिः श्रूयते। किन्तु एतस्यैव विजयस्य मूल्यरूपेण तेन सोढव्यमासीत् आघातबहुत्वं, निर्यातनं, उत्पीडनञ्च। सोऽरोदीत्, क्षतविक्षतो भूत्वा मनःक्षोभेण मृतप्रायोऽभवत्। किन्तु तस्य अश्रुजलं सकलं पाश्चात्त्यभूखण्डमेव ज्ञानाङ्कुर-जननोपयोगि चकार। स रणे आहतो जातः, किन्तु न अम्रियत, अन्तं यावत् स विजयी संजातः। देवानां विशिष्टाशीर्वादस्तस्मिन्नासीत्।

१८९३ ईसाब्दीय-सितम्बरमासस्य एकादशदिनं सोमवासरो जगतो धर्मेतिहासस्य एकं स्मरणीयं दिनम्—प्राच्यप्रतीच्ययोर्मिलनदिनम्, सर्वस्मिन्नेव जगति विश्वभ्रातृत्व-प्रतिष्ठायाः सूत्रपातनम्। स्वामि-विवेकानन्दं यन्त्ररूपेणावलम्ब्य विश्वस्य धर्ममहासम्मेलने प्राचीन-भारतस्य वेदान्तधर्मः सर्वोच्चे आसने प्रतिष्ठितो जातः। विश्वस्य शान्तेः मैत्र्यस्य च पन्थाः संस्थापितो बभूव। स्वामि-विवेकानन्दो न कस्यापि धर्मसम्प्रदाय-विशेषस्य, किन्तु स एव समग्रभारतवर्षस्यैव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सनातन-धर्मप्रतिनिधिरासीत्। प्रतिनिधीनामाह्वानमात्रेणैव समागत्य क्रमशः सर्व एव स्व-स्व-धर्मस्य परिचयं विवृत्य पूर्वमेव प्रस्तुतवक्तृतां संक्षिप्तभावेन विवव्रुः। अन्तिमसमये स्वामिमहोदय उत्तिष्ठन् प्रथममेव—"भोः ! अमेरिकावासिभगिन्यः भ्रातरश्च" इति सभायाः सम्बोधनम् अकरोत्। एतत्सम्बोधनवचनमध्ये एतादृशी विपुला शक्तिरासीत् या सर्वेषामेवान्तःकरणमस्पृशत्। स्वामिमहोदयस्य तत्सम्बोधनवाक्यमध्ये विश्वभ्रातृत्वस्य बीजं निहितमासीत्। अपि च विश्वमानवताया झंकारः, वैदिकऋषीणां वाणी, सौभ्रात्रस्य च स्पर्शोऽपि आसीत्। द्वि-सहस्र-वर्षेभ्यः प्राक् "यीशुः" अपि अवदत्—"भगवान् यदि मानवजातीयानां पिता स्यात् तदा वयं तस्य सन्तानाः"। खृष्टानस्य देशे खृष्टीयान् प्रति स्वामिमहोदयकण्ठात् निःसृता सैव विश्वभ्रातृत्वस्य मानव-कल्याणस्य च वाणी ध्वनिता असीत्। यदा सभा स्तब्धा जाता तदैव स संक्षिप्तमेकं भाषणं कृतवान्। संक्षिप्तमपि तस्य भाषणम् उदार-विश्वजनीनभावेन पूर्णमासीत्।

स जगतां सर्वधर्मस्य जनकरूपेणैव सनातन-वैदिकधर्मं सभायामुपास्थापयत्। एवञ्च अवदत्, "यो धर्मः पृथिव्यां चिरं समदर्शनं सर्वविधमतवादग्रहणं च शिक्षयति, अहं तस्यैव धर्मस्यान्तर्वर्त्तीति स्वं गौरवान्वितं मन्ये। वयन्तु न केवलं भिन्नधर्मावलम्बिनं समदृष्ट्या पश्यामः, अपि तु सर्वस्मिन्नेव धर्मे सत्यरूपेण विश्वसिमः। या एव जातिः पृथिव्याः सर्वस्यैव धर्मस्य जातेश्च उपद्रुतं त्रस्तम्, आश्रयलिप्सुं जनगणं चिरम् अकातरम् आश्रयदानमकरोत्, तस्या एव जातेरन्तर्भुक्तोऽहमिति आत्मानं गौरवान्वितं मन्ये।"

अनन्तरं विभिन्नदिनेषु सप्तसहस्रविद्वच्छ्रोतृगणस्य पुरतः द्वादशसंख्याकानि भाषणानि दत्वा सार्वभौमसनातनवैदिकधर्मस्य महत्त्वपूर्ण-मूलतत्त्वानां व्याख्यां विधाय च स सर्वानपि चमत्कृतमानसानकार्षीत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्ममहासम्मेलनं तं तरुणं संन्यासिनमभिनन्दितं चकार, एकेनैव दिनेन तस्य यशः समस्तायामेवामेरिकायां प्रसारितं जातम्। अमेरिका-सवादपत्राणि धर्मसम्मेलने समागतेषु जनेषु विवेकानन्दमेव सर्व-श्रेष्ठमघोषयन्। स्वामिना विश्वधर्ममहासम्मेलने हिन्दूधर्मस्य यत् श्रेष्ठत्वं प्रतिपादितं तन्न कदापि म्लानतां गमिष्यति।

❀ ❀ ❀

विवेकानन्दस्य विजयेन समग्रमेव भारतम् उल्लसितं प्रदीप्तं च जातम्। वस्तुतः शिकागोधर्म्मसम्मेलने स्वामि-महोदयः यदेव महासत्यं प्रचारितवान्, यामेवाशात्राणीमश्रावयत् तत् भविष्यति काले सर्वजागतिकस्यैवाध्यात्मज्ञानस्य प्रशस्यतममवलम्बनं भविष्यति।

तज्जागरणविषये रोमारोलां समलिखत् "—इयमेव सर्वतः प्राक भारतस्य अग्रगतिः समारब्धा, तदेव दिनमारभ्य अतिकायस्यैव कुम्भकर्णस्य निद्राभङ्गः प्रारभत....।"

विवेकानन्दो भारतीय-गणजागरणस्य महायज्ञस्य ऋत्विक् आसीत्, स्वाधीनतासंग्रामस्य च अग्रवर्त्ती दौत्यनिष्णातः।

विवेकानन्दस्य प्रभावविषये धर्ममहासभाङ्गीभूताया विज्ञान-सभायाः सभापतिः मि० स्नेल अलिखत् "—अन्यः कोऽपि धर्मो धर्ममहासभायां हिन्दूधर्मवत् प्रभावविस्तारे न समर्थो जातः, एवम-स्यैव धर्मस्य प्रतिनिधिः स्वामी विवेकानन्दः"। देशेऽस्मिन् हिन्दुत्वस्य कार्यकारिशक्तिः स्वामिनो विवेकानन्दस्यैव परिश्रमेण विशेषतः प्रेरणा-मलभत। हिन्दूधर्मस्य एतादृशः सुविश्वस्तः कोऽपि प्रतिनिधिरितः प्राक् अमेरिकायाः तत्त्वानुसन्धित्सूनामग्रे नैव समुपस्थितो जातः।

अख्यातः अज्ञातः स्वामी विवेकानन्दः विश्ववरेण्योऽजायत। तस्य शतशः पूर्णाकाराणि चित्राणि शिकागो-नगर्यां विभिन्न स्थानेषु शोभायमानानि बभूवुः। अमेरिकायाः योरपस्य च समाचारपत्राणि अनुदिनं तत्प्रशंसाभिः पूर्णानि दृश्यन्ते स्म। न केवलमाङ्गलीयेष्वेव,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वामिनः प्रचारात् समस्ते 'आङ्गलोसेकसन्'-जात्यभ्यन्तरे भारतीयस्य धर्मस्य तथा तत्संस्कृतेश्च सम्बन्धे ज्ञातुम् एवं तज्जातीयजीवने परिणमयितुं चेष्टा बलवती प्रावर्तत ।

❀ ❀ ❀

स्वामिनः श्रेष्ठदानसम्बन्धे विश्वकविः रवीन्द्रनाथः प्राह— "... स्वल्पदिवसेभ्यः पूर्वं वङ्गदेशे यस्य महात्मनः लोकान्तरगमनमभूत् स स्वामी विवेकानन्दः पूर्वपश्चिमदेशौ वामदक्षिणयोर्निधाय तन्मध्ये स्थातुं समर्थोऽभूत् । ग्रहणस्य मेलनस्य तथा सर्जनस्य प्रतिभैव तस्मिन्नवर्तत । ...स भारतवर्षस्य साधनां पश्चिमे तथा पश्चिमस्य साधनां भारतवर्षे दातुमादातुञ्च पन्थानं रचयितुं निजजीवनमुत्ससर्ज ।"

वस्तुतः स्वामिविवेकानन्दः प्राच्यप्रतीच्ययोः सम्मिलनसेतुस्वरूप आसीत् । स समस्ते संसारे साम्य-मैत्र्योः स्थापनस्य गुरुदायित्वं निजस्कन्धे गृहीतवान् । तस्येयं शुभा प्रचेष्टा कियद्दूरं सफला बभूव इति इतिहासः प्रमाणयिष्यति । पाश्चात्यभूखण्डे वेदान्तसंदेशं सुप्रतिष्ठितं कर्तुं स्वामिनो जीवनशक्तिः समाप्तप्राया जाता । सोऽक्लान्तरूपेण दिनानि, मासान्, वर्षाणि च अमेरिकायाः एकस्मात्प्रान्तादपरप्रान्तपर्यन्तं अनेकेषु प्रतिष्ठानेषु, सभासमितिषु, गिरिजासु, चरित्रशोधनागारशिक्षासंस्थासु, विश्वविद्यालयेषु, विशिष्टव्यक्तीनां भवनेषु शतशो भाषणानि दत्तवान् ।

तथा तत्रत्यविशिष्टदार्शनिकैर्वैज्ञानिकादिभिश्च वेदान्तविचारविनिमयं कृतवान् यत्प्रभावतः समस्तपाश्चात्यजगतः धर्मचिन्तायां युगान्तरमुपस्थितम् । सोऽनेकाननुरागिभक्तान् मुमुक्षूंश्च वेदान्तधर्मदीक्षितानकार्षीत् ।

ततः यूरोपे आंग्लदेशे अन्यान्यभूभागेषु च वेदान्तविषये भाषणानि दत्त्वा प्रसिद्धैर्मोक्षमुल्लार-पाल-डायसन-प्रभृतिभिर्विद्वद्भिः सह वेदान्तधर्मविषयकालोचनामकरोत् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्मिन् समये स्वामी भारत-प्रत्यागमन-सम्बन्धे निश्चयमकरोत्, धर्मभूमेर्भारतस्य महिमानं संकीर्त्य स ऊचे—"यदि पृथिव्यां कोऽपि तादृशो देशः अस्ति यः पुण्यभूमिरिति कथयितुं शक्येत,'' तर्हि अहं सनिर्धारणं वक्तुं शक्नुयां यत् स अस्माकं मातृभूमिः—इयं भारतभूमिरेवास्ति ..."

इत्थं पाश्चात्यदेशेषु वेदान्तप्रचारस्य अश्रुतपूर्वं साफल्यमवाप्य पूज्यपाद श्रीविवेकानन्दस्वामी कतिपयैः आङ्ग्लशिष्यैः सह भारतभूमौ पदार्पणमकरोत्। कोलम्बोतो मद्रास-पर्यन्तं तथा ततः परं, कलिकात्तायां देशवासिनां पक्षतः स्वामिनो राजोचितम् अभिनन्दनमभवत्। अनन्तरं अस्माद् विजयाभियानात् तथा भाषणादितः आत्मानं मोचयित्वा स संघटनमूलके कार्ये धृतव्रतोऽभवत्।

श्रीरामकृष्णेन सर्वत्र सार्वभौमवेदान्तधर्म एवानुष्ठितः। तेन विभिन्नधर्मसाधनायाः, सर्वधर्मसमन्वयस्य, "यावन्ति मतानि तावन्तो मार्गाः" इति सत्यस्य च प्रतिष्ठया विविधधर्माणामेकाऽऽध्यात्मिकी भित्तिः संस्थापिता।

"स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे।
अवतार-वरिष्ठाय रामकृष्णाय ते नमः॥"

इति प्रणाममन्त्राभ्यन्तरे श्रीविवेकानन्देन स्वामिना श्रीरामकृष्णदेवस्य समस्तमपि जीवनचरितं सूत्ररूपेण प्रकाशितमास्ते।

एवं वयं पश्यामः यत्—आङ्ग्लाधिकृते भारतवर्षे आङ्ग्लशिक्षाकवलितेषु भारतीयजनेषु यो वैदिकसनातनधर्मस्य महिमोद्घोषणपूर्वकं वेद-वेदान्तभित्तिकं सर्वभारतीयानामैक्यं प्रतिष्ठापितवान् स तु वेदान्त-केशरी विवेकानन्द एव, नान्यः।

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तृतीयस्थानाधिकृत—श्रीचन्द्रभानुशर्मा-वेदपाठी नव्यव्याकरण-शास्त्रि-प्रथमवर्षम् इत्येतस्य प्रबन्धस्य सारः।

विषय—वेदान्त-धर्म-प्रतिष्ठाता युगाचार्य-विवेकानन्दः"

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत"

भू-मण्डले भारते को नु जनो भूधर इव अप्रतिहतां विपुल-विमलां विस्तृतां विपश्चित्सुलभाम् ऋषिपरम्परया सुपरिचितां चिरन्तनीं परमार्थ-प्रतिपादन-पुरस्सर-स्वेष्ट-सकलार्थ-दापयित्रीमिमां राष्ट्राभिरक्षिणीं, भारतस्य गौरववर्द्धिनीं नियतिं, किं वा भागवत-संस्कृतिं न वेत्ति।

अतो हेतोः किमस्या माहात्म्यं कोऽपि वर्णितुमलमस्तीति? पुरः प्रतीयमाने जगतीतले सावकाशतया किमुत निरवकाशतया सैषा, चिरात् प्रकामं विश्रान्तापि विलक्षणविचारधारा नवघनपटलीव इतस्ततो दिशि दिशि, विलुप्तसूक्ष्मकथा शक्त्या, आहोस्विद् दिष्ट्या एव केवलं चङ्क्रम्यमाणा, असङ्ख्यलोकान्, जीवनरससंवर्षणेन सन्तर्प्य साधयति सकलान्मनोरथान् शमयति च लोकत्रितापान्।

इत्थं विदन्ति वा न वा, सर्वेऽपि पुमांस इति नाभिमतमेव अस्तीत्यस्माकम्।

तथापि कुतूहलमेतदेवोत्पद्यतेऽन्तःकरणे, यन्मनुष्यः स्वभावतो मननशीलः प्राणी विद्यते। मत्वा कर्माणि सीव्यतीति, तन्निरुक्तिरपि पूर्वोक्ताऽनुकूला। स हि कोऽहं, कस्मादहमित्यादि समस्याः सततं भावयित्वा "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति दर्शनबीजमुद्भावितवान्। आत्मदर्शनायैव सर्वाणि दर्शनानि प्रवृत्तानि। आत्मदर्शनं दुःखनिवृत्तयेऽपेक्षितं, दुःखनिवृत्तिरेव च सर्वैरभीप्सिता।

पाश्चात्यदेशेषु आचारविचारयोः किमपि सामञ्जस्यं नासाद्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनानि कण्ठस्थीकृत्यापि नाटकेषु पात्राणां प्रसाधने इव व्याप्रियन्ते तत्रत्याः। तत्रत्यं दर्शनं ज्ञानमात्रम्। फिलासफी-शब्दस्य मौलिकोऽर्थोऽपि तदनुकूल एव।

भारतवर्षे तु विचारस्यानुसारेणैव आचारोऽपि नियम्यते प्रायशः। भारतस्य विचार-प्रधानदेशत्वं सर्वैरभ्युपगतम्। अन्येषां देशानां जीवनसंग्राम एव तथा भीषणो यत् तत्रत्या जना जीवन-साधनेषु एव सर्वं समयं यापयितुं विवशा भवन्ति। भारतीयास्तु प्रकृति-प्रदत्तानां जीवनसाधनानां सौलभ्येन ऐहिकीं चिन्तां विमुच्य पार-लौकिकीं चिन्तामेव सततमाचरन्ति। सर्वप्रधानमत्र देशे अध्यात्म-ज्ञानमेव। भगवानपि "अध्यात्मविद्या विद्यानाम्" इत्युक्त्वा विद्यामिमां प्रधानतया योजितवान्।

भारते दर्शनस्योदयो वेदकाल एवाजायत। ऋग्वेदे प्रजापतिः परमेष्ठी जगतो मूलतत्त्वं मीमांसमानः प्राप्यते। स हि "आनीदवातम्" इत्यादिमन्त्रेषु तदेव तत्त्वं विमृशन् दृश्यते। अपरोऽपि संवननआङ्गिरसो नामर्षिः "सङ्गच्छध्वं, सम्वदध्वं, सं वो मनांसि जानताम्" इत्यादि-मन्त्रैस्तस्यैव तत्त्वस्यान्वेषणाय लोकान् प्रेरयन् प्रतिभाति।

अनयोः ऋष्योश्चिन्ताधारयोर्द्वयी दिशा,—प्रथमा चिन्तनप्रवृत्तिः, द्वितीया तर्कप्रवृत्तिः। इमे द्वे अपि मिलित्वा दर्शनान्यङ्कुरयितुं प्राभवताम्।

वेदसंहितायामङ्कुरितस्य दर्शनद्रुमस्य उपनिषत्काले पल्लवितत्वं जातम्। "तत्त्वमसि" इति मन्त्रेण तदेव तत्त्वं प्रकटं प्रतिपादितम्। तदनन्तरं सूत्रकाले दर्शनद्रुमस्य शाखाः विभक्ताः।

सोऽयं दर्शनद्रुमः शाखाभेदेन बहुधा विभक्तः। तत्र स्थूल-रूपेण प्रथमं द्वौ भागौ—वैदिकानि च दर्शनानि, अवैदिकानि च दर्शनानि। अवैदिकानि दर्शनानि नास्तिकदर्शनपदेन व्यवह्रियन्ते। वैदिकानि च आस्तिकदर्शनपदेन व्यवह्रियन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्र अवैदिकदर्शनानि—चार्वाकदर्शनम्, बौद्धदर्शनम् जैनदर्शनञ्च। वैदिकदर्शनानि च—वैशेषिकदर्शनम्, न्यायदर्शनम्, साङ्ख्यदर्शनम्, योगदर्शनम्, पूर्वमीमांसादर्शनम्, वेदान्तदर्शनञ्च ।

वेदान्तो वेदस्य अन्तः अवसानभागः इति विग्रहेण उपनिषद उच्यन्ते। उपनिषद एव प्राचीनैर्वेदान्तशब्देनोक्ताः। उपनिषदोऽनेकाः, तासु क्वचिदापाततो विरोधोऽपि प्रतिभासते। तस्यैव विरोधस्य दूरीकरणाय व्यासेन ब्रह्मसूत्राणि रचितानि।

एषामेव ब्रह्मसूत्राणां व्याख्याभेदेन बहवो वेदान्तस्य शाखाः प्रचलिताः।

श्रीशङ्कराचार्यस्य अद्वैतमतप्रतिपादकं भाष्यम् (७०० खीष्टाब्दे), ततः श्रीकण्ठश्रीपत्योश्च, भास्करस्य, रामानुजस्य, मध्वाचार्यस्य, निम्बार्कस्य, वल्लभाचार्यस्य च भाष्येषु वेदान्तसूत्राणि स्वस्वमतसमर्थनायाचार्यैः व्याख्यातानि। रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषामाचार्याणां सिद्धान्तान् व्याख्यातुं, तदनुयायिनोऽपि प्रावर्तन्त। एषु प्रागुल्लिखितेषु भाष्यकारेषु श्रीकण्ठश्रीपत्योर्भाष्ये शैवमतं पोषयतः। विज्ञानभिक्षोर्भाष्यं साङ्ख्यपक्षपाति। बलदेव-वल्लभाचार्य-निम्बार्क-मध्व-रामानुजाचार्याणां भाष्याणि तानि तानि वैष्णवमतानि प्रवर्तयन्ति। भास्करस्य भाष्यं सम्प्रदायासम्पृक्तम्, शङ्करस्यापि तथैव।

परमिमे सर्वेऽपि वेदान्ता निम्न-विषयेषु मतैक्यं व्रजन्ति।

१ अनादिरनुवर्तमानोऽयं संसारोऽपास्य एव।

२ ज्ञानापेक्षया कर्मणो गौणत्वम्, कर्मणां चित्तशुद्धिजननद्वारा ज्ञाने सहायकत्वमात्रम्, व्यवहारे कर्मापेक्षा।

३ ब्रह्म व्यापकं नित्यञ्चेतनञ्च।

४ ब्रह्मैव जगज्जन्मस्थितिप्रलयकारणं, [illegible] प्रकृत्यादि।

इयति साम्येऽपि वेदान्तेष्ववान्तरसि[illegible] एव।

मूलकारणाज्जातेयं सृष्टिः किं मूलकारणेनाभिन्ना, उत मूलकारण-

LIBRARY
ACC No. 8391

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सञ्जातरूपाऽऽहो मूलकारणपरिणामभूता, आहोस्विन्मूलकारणविवर्तभूतेति मीमांसायां प्रवृत्ताः पूर्वे मुनयश्चतुरो वादान्प्रातिष्ठिपन् यथा संक्षेपशारीके—

आरम्भवादः कणभक्षपक्षः, संघातवादस्तु भदन्तपक्षः।
साङ्ख्यादिपक्षः परिणामवादो, वेदान्तपक्षस्तु विवर्तवादः॥

श्रीशङ्करानुगानामद्वैतवादिनां वैयाकरणानां च कारणस्य अन्यथाभावः अतात्त्विकः कार्यमित्येष विवर्तवादः सिद्धान्तितः—अयमेवार्थः कैश्चिदेवं निरूप्यते स्म—

'सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः॥'

इत्थं दृढभूमिको दृढोपपत्तिकश्च विवर्तवादः, इति प्रसिध्यतितराम्।

गुरुमनुमान्याश्रमात्प्रस्थितः श्रीशङ्कराचार्यः सर्वत्र देशे वेदान् वेदान्तांश्च प्राचीचरत्। इदं च अजूघुषद्, अनादिनिधनस्य ब्रह्मणो विवर्त एष लोकः, मायाप्रपञ्च एवायमवास्तवो व्यवहारमात्रसत्ताकः, ब्रह्मैवैकमद्वितीयं परमार्थं सदिति।

निरीश्वराणां सौगतानां च विविधानि मतान्यपूर्वेण स्वेन प्रेक्षाबलेनासौ निरास्थत्। तान्त्रिकाणां कदाचारांश्च बलवज्जगर्हे। शिवभागवतानां भागवतानां च बाह्यलिङ्गेषु धर्मबुद्धिं प्रत्याचख्यौ। प्रभावस्तु तदानीमिह देशे सौगते मते स्थितस्य श्रीसुधन्वनामधेयस्य शून्यवादं निरीश्वरवादं च तत्र शङ्कराचार्यवर्य्यो अखण्डनीयैस्तर्कैर्दुरुत्तराभिश्च वाचो युक्तिभिः, निराचकार। ततो निरालम्बं युक्तिविरहाद् दुर्बलं च सौगतं मतमिति व्यवसाय श्रीसुधन्वा वैदिकं मतं शिश्राय, श्रीशङ्करे च दृढभक्तिर्बभूव।

"अदृढाः प्लवा ह्येते यज्ञरूपा" इति मते स्थितोऽपि स भगवान् शङ्कराचार्यो न [illegible]चित् प्राकृतस्य कर्मसु प्रवृत्तिं न्यषेधीत्। इत्थं हि [illegible]कम्, "अलङ्कारो ह्यस्माकं यद् ब्रह्मात्मावगतौ .... [illegible]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति" तेन अतीतव्यवहाराव-स्थितिकानां नैष्कर्म्यं नोपादिशत् सः। तस्माद् यदत्र केचिदाहुरा-चार्यशङ्करः सर्वं लोकमविशेषेण प्रव्रज्यायै प्राचूचुदन्मर्यादांश्च सर्वाः समकिरदिति तन्निरुक्तेन वचनेन प्रत्याख्यातपूर्वमिति वचनान्तरं नापेक्ष्यते।

भगवतः शङ्करस्य कृतयोऽपि महतोऽमहतश्च सर्वस्य लोकस्य पूजिताः सन्त्येव, सर्वं हि पदवाक्य-विन्यासेनापूर्वेण व्याकरण-महाभाष्येण बृहदारण्यकेन च संवदतीति प्रतिपन्नं पण्डितैः प्रतीच्यैः प्राच्यैश्च। किम्बहुना आदि कवेर्वचः किञ्चित्परिवर्त्य प्रकृते शक्यमिदं भणितुम् यत् "तावद्धि शाङ्करं भाष्यं लोकेषु प्रचरिष्यति" इति। कस्यचिदुक्तिं समालिख्य "वेदान्तोरुवनाश्रयस्तदपरं द्वैतं वनं भज्यति" प्रतिपादितो भवति एषः प्रचारितः शङ्कराचार्याचारितो वेदान्तधर्मः।

अनया रीत्या वेदान्तः स्वीय-सार्वभौमिकीं सत्तां स्थापयति, सर्वत्रैव वेदान्तोऽयं प्रकाशपुञ्जितो भासते।

जगति प्रचलितानां समेषां विविधधर्माणां विचारचरमावधौ अन्तर्लीनः प्राणसदृश एव विभाति वेदान्तः। येन केनापि रूपेण अस्मिन्नेव धर्मे सर्वे तिरोहिता वोभूयन्ते, इत्यत्र नास्ति विवादा-वकाशः। यतो हि कस्मिन्नपि धर्मे स्वारस्योद्भावनाय अन्यापेक्षया वेदान्त एव श्रेयान्। अमुना विना अन्यो धर्मः शवायते समाजे, पूर्वतोऽद्यापि न केनापि धर्मेण जगति चिरायुष्ट्वं लभ्यतेऽनेन विना, प्रत्युत क्षीयते केवलमतो हेतोः सर्वैः स्वस्वधर्मप्रवर्त्तकैः आचार्यैः विषयतया पूर्वमेवावश्यं गृह्यते। एवमयं सर्वत्राभ्यर्च्यमानो वेदान्त-धर्म एव विविधजागतिकसमस्यानिरसन-पूर्वकं शान्ति-समन्वय-विश्व-बन्धुत्व-संस्थापनेऽपि योग्यतम इति समवगम्यते। यतो हि—

"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्, तेन त्यक्तेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भुञ्जीथा मा गृधः कस्य स्विद्धनम्" इत्यस्मिन्मन्त्रे वैदिके कियदर्थ-वैशिष्ट्यं गाम्भीर्यञ्च वरीवर्त्तीति। वस्तुतोऽनेनैकेनैव मन्त्रेण प्रतिपाद्यं यदस्ति, तद्बलेन शक्यं वक्तुमस्माभिः, यल्लोके शान्ति-समन्वयाय अपरो रामबाणो वेदान्तः इति। यदि जनैः सर्वजनीनमस्य भावं मनसि समासाद्य व्यवहरिष्यते, नूनं तर्हि भूमण्डले शान्त्योपस्थीयेत। अथ च "दृते दृं हमा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्तां, मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे, मित्रस्य चक्षुषा समीक्षामहे" इत्यादिभिर्वैदिकैर्मन्त्रैः सुनियतमेतत् यद्विश्वे बन्धुत्व-संस्थापनेऽपि अस्य धर्मस्य महान् योगः सार्वलौकिकः इति विज्ञायते।

पुनरपि "सहनाववतु, सहनौ भुनक्तु, सहवीर्यं करवावहै, तेजस्विनावधीतमस्तु, मा विद्विषावहै।" इत्यनुसरद्भिर्लोकैः कियती सरसता सहिष्णुता पारस्परिकबन्धुभावो विश्वैक्यञ्च समभिलषितमिति स्मारं स्मारं मनसि, अत्र विषये वेदान्तगरिमाणं महिमानं चेदानीमिदमेव निश्चीयते। यन्निखिलेऽपि संसारे शान्तिपूर्वकविश्वबन्धुत्वसंस्थापनाय वेदान्तधर्मः परमावश्यकः, स एव धर्मः समये समये लोकेभ्यः सुतरां यथोपयुक्तप्रकाशदायकोऽज्ञानान्धकारप्रच्छन्नेभ्यः सुमार्गप्रदर्शकः।

अन्ये धर्मास्तु

"विषमोऽपि विगाह्यते नयः, कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः, सदुपन्यस्यति कृत्यवर्त्म यः॥"

इतिवद् विद्यन्ते, परमयं वेदान्तस्तु वस्तुतः कृत्यवर्त्म सदुपन्यस्यति एव। वेदान्तधर्मावलम्बिनामुदारहृदयानामेव एषा विश्वबन्धुत्वपरिपूर्णा विश्वजनीना हृदयस्पर्शिनी भावना एवं सूक्तिरूपेण विश्वमनुरञ्जयन्ती सर्वत्र गहने संसारे नरीनृत्यमाना दरीदृश्यते।

"सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्"॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादिभिः ऋग्भिः सूक्तिभिश्च पल्लवितोऽयं वेदान्तः किं जागतिक-समस्या - समाधान - पूर्वकं शान्ति - समन्वय-विश्व-बन्धुत्व-संस्थापने अशक्यः स्यात्? यदि हि स्यात्, तर्हि "विन्ध्यस्तरेत् सागरम्" इत्यस्यापि चारितार्थ्यं स्यात्, इति सुधियो विभावयन्तु।

यदा यदा लोके राष्ट्रे वा धार्मिकी सङ्कीर्णता प्रोद्भाव्यते, तदा तदा पृथ्व्यां समुद्भूय कोऽपि महापूरुषो वेदान्तमिषेण तां सङ्कीर्णतां समाजाद् बहिर्निस्सारयति, यथा गीतोपदेष्टा श्रीकृष्णः, शङ्कराचार्यः, अन्येऽपि यथा रामकृष्णपरमहंसः, श्रीविवेकानन्दः। एभिर्महानुभावैः बहूपकृतं लोकस्य, तत्रापि श्रीविवेकानन्दः इदानीन्तने समाजे नूतनो महापुरुषः।

अयं महाशयः १८६३ ईस्वीये वर्षे जनवरी-इत्याख्य-मासस्य द्वादश-तारिकायां दैविक-भौतिकैश्वर्य-समवेत-सुखालये परमानन्ददवंशे दत्त-परिवारे, धर्मनिष्ठायाः भुवनेश्वरीत्याख्यस्वमातुः कुक्षितः, सूर्योदयात् पूर्वं प्रभाते ब्राह्ममुहूर्त्ते, सामन्तनोति-विलुण्ठित-कम्पायमान-प्रजा व्रततीनामनुरञ्जनाय, दीनहीन-भावापनोदनाय, नव-जागर्तेः संस्फोरणाय, रागद्वेष-तमोविनाशाय, विपथगामिपथि-प्रदर्शनाय, वरेण्योऽयं वदान्योऽरुणांशुमालीव भगवच्छिवप्रसाद - महिम्ना प्रादुर्बभूव।

एवमयञ्चपलो नरेन्द्रः स्वकीये नन्दनवने वंशे, प्रोल्लसन् उद्वेलयन्, क्रीडन्, नानाविधानाश्चर्यान् प्रकटयन्, स्वलोकोत्तरतां चोद्भावयन् निखिलबान्धवानातिथेयांश्च कर्मकरानपि विस्मयिनश्चकार।

समागते यौवने श्रीरामकृष्णपरमहंसस्यैकाच्छिष्यः प्रियदर्शनः विपुलकायः, पीनवक्षाः, विवेकानन्दः, प्रवृत्तिपराङ्मुखो, धृतकषायवस्त्रो, मेघज्योतिरिव देदीप्यमानः, अपरदिगम्बर इव जगद्विषं पायं पायं, वैदेशिकैरङ्ग्रेजेत्याख्यैः समाक्रान्ते दुरासदे भारते, तमोलीने, अश्रुमये, विस्मृतमार्गे, गहनतमे, दुर्भेद्य-विपिने, विजातीयजन्तुपरिवृते.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किङ्कर्तव्यविमूढे, करिकलभे इव मानवसमाजे, सहसा अलौकिकोऽयं नरेन्द्रनाथोऽवतीर्णश्चारुपूर्णचन्द्र इव ।

नातिचिरसमये, सर्वतन्त्रस्वतन्त्रेणानेन वीतरागेण स्ववचनामृतेन, सकलान् जीवान् उपदिश्य, वस्तुतत्त्वं सन्दर्श्य, सरसतया तर्कबुद्ध्या दूषितप्रायं परधर्म-विवादमवमन्य साम्यवादेऽपि यथोपयुक्तपथेन "वसुधैव कुटुम्बकम्" इति स्वाभिप्रेतमुखेन सर्वाङ्गीणः स्वमतप्रचारो व्यधायि ।

परमहंसः श्रीरामकृष्णः समाधिना याः याः धर्मानुभूतीः प्रापयति स्म, विवेकानन्दस्ता व्यावहारिकान् सिद्धान्तान् अनैषीत् । रामकृष्ण-विवेकानन्दावेकस्यैव जन्मनः अंशद्वयमास्तामेकस्यैव सत्यस्य पक्ष-द्वयञ्च । रामकृष्णो यदि अनुभूतिमयः, तर्हि तदीयानुभूतिव्याख्यान-रूपोऽयं विवेकानन्दो जगति भगीरथ इव धर्मगङ्गां प्रवाहयामास ।

नरेन्द्रेण देवभाषायाम् आंग्लभाषायाम्, उद्भटेन प्रतिभापन्न-वैदुष्यङ्गतेन, यूरोपीय "वर्डस्वर्थ" "हर्बर्ट-स्पेंसर" "जान स्टुअर्ट मिल" इत्यादितार्किकाणां परमदार्शनिकानां विद्यावारिधौ परमनिष्णातेन, तेषां सर्वात्मवादे, वस्तुनिष्ठात्मकादर्शवादे, अतीवानुरक्तमनस्केन बभूवे । वस्तुतो नरेन्द्रनाथो यदा रामकृष्णस्य शरणं प्राव्रजत्, तदानीं प्रतीयते स्म, यन्नवीनोऽयं भारतदेशः प्राचीनभारतस्य शरणे, किं वा यूरोपदेशो भारतस्य सन्निधाने ससाद ।

एतयोः पूर्वोक्तयोः पारस्परिक-सम्मेलनं यस्मिन्क्षणे समजनि, तस्मिन्क्षणे बुद्धिश्रद्धयोः, रहस्यवादबुद्धिवादयोश्च शान्तिमयः स्वच्छन्दः समाश्लेषः सम्भवति स्म, इति मन्ये । तत्रैको महाशयस्तु पौराणिकै-र्विचारैः परिवेष्टित आसीदपरश्च तर्क-बुद्ध्या धर्मस्य बाह्यपरिधिमति-क्रम्य प्राचीनतायाः धर्मान्धतायाः रूढिवादितायाः बहिर्निस्सर्तुं व्याकुलो बोभूयाञ्चक्रे । शक्यते वक्तुं, यद् रामकृष्णविवेकानन्दयोः सम्मेलनेन प्राच्यप्रतीच्ययोः जगतोरेव सम्मेलनं सुसम्पन्नमिति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

औपनिषदकालतो भारतवर्षं निवृत्तिवादिनां देशोऽभूत्, वैदिका "हिन्दू" इत्याख्याः प्राणिनः प्रवृत्तिमार्गिणः आसन्। तेषां ऋषयो धर्माचार्याश्च गार्हस्थ्यधर्माणः श्रमजीविनश्च बभूवुः, तथा गोपाला अतिथिपूजकाः नितरां विद्यन्ते स्म, एवं कृषकाः विद्वांसः सर्वेपि वैदिक-काले कर्मरता एव। तत उपनिषत्समये पण्डितंमन्यैः इत्थं सिद्धान्तितं "यज्जन्मनः साफल्याय सर्वोत्तमो लक्ष्यो मोक्ष एव"। तदवाप्त्यर्थं परमवश्यको लोके स्वर्णकामिन्योस्त्याग इति।

जैनबौद्धाचार्यैः बहूपवर्णितमिमं सन्न्यासधर्मम्, परिणामत भारत-समाजः संन्यासिभिः परिपूर्णः, अतिक्रान्तेऽपि बहुकाले निवृत्तिविमुखो बोभवाञ्चकार। संक्रान्ते भक्तिकाले निवृत्तिरूपः वृक्षः काञ्चित्क्षीणतां गतः। तथा द्वैत-विशिष्टाद्वैतरूपस्य वेदान्तधर्मस्य प्रचारो वावर्ध्यते स्म।

कबीरादयो निर्गुणवादिनस्तेषामुपदेशाः सुनिश्चितं प्रवृत्ति-निवर्त्तकाः. निवृत्तिसाधका एव।

प्रत्येकं जनः स्वमातृगर्भादेव "परलोकसाधनं सर्वश्रेष्ठं सुकर्म इह लोके", इति प्रबलं विश्वासं मनसि समाकलय्य लोकमनादृत्य ध्याना-वस्थिततद्गतेन मनसा भगवच्चरणारविन्दयोर्दत्तचेताः सन्, स्वीयां निर्धनतां पराधीनतां दैशिकपारतन्त्र्यं च विनाशयितुं न मनागपि प्रयतते स्म, नापि विकलायते स्म।

एकोनविंशतितमे ईसाब्दे, आंग्लभाषामधीयानाः हिन्दूजातीयाः भारतीयाः स्वकीयधर्मस्य कुपरिणामतां शनैः शनैः किञ्चित् किञ्चित् समवगच्छन्ति स्म, अत एव तेषां समेषां स्वधर्मात् श्रद्धा तिरोभवितुं प्रारभत।

तदानीं विवेकानन्दस्य पुरतः कतिपयानि जगत्कल्याणाय उद्देश्यानि दरीदृश्यमानानि भासन्ते स्म। तत्र सर्वेभ्यो महत्कार्यं सर्वजनीनधर्मस्य पुनः संस्थापनरूपम्। द्वितीयं च हिन्दूधर्मे न्यूनातिन्यूनमपि हिन्दूनां श्रद्धापरिवर्धनम्। तृतीयं च भारतीयानामन्तःकरणे स्वात्मगौरवस्वदेश-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गौरवयोः विषये सुषुप्तायाः भावनायाः जनमनोनिकाये समुद्बोधनम्, स्व-संस्कृतीतिहासाध्यात्मिक-परम्परायां योग्यतमाधिकारिणो भारतीयान् सम्पादयितुं भारतदेशं सोन्नतं कर्तुं स सिसाधयिषाञ्चकार।

अतो हेतोः, स हिमगिरिशेखरां सागरमेखलामिमां भरतभुवं भ्रमितुं प्रचक्रमे। भ्रामं भ्रामं स्वल्पायुषि एव व्यावर्तमानेन वीतरागेण विवेकानन्देनोपर्युक्तं कार्यजातं सम्पाद्यते स्म।

देशहित-चिन्तकैः राममोहन-केशवसेन-दयानन्द-रानाडे-एनीवेसंट-प्रभृतिभिः समाजसुधारकैः धर्मवृक्षारोपणाय योर्वरा भूमिर्विनिर्मिता, तस्याम्भूमावयं धर्मवृक्षो विवेकानन्दोऽश्वत्थायते स्म।

अभिनवेन भारतेन यद्वक्तव्यं, तद् विवेकानन्दस्य वराननादुद्गीर्णमासीत्। यस्यां दिशि भारतेन यातव्यं, तस्या एव आशायाः स्पष्टः सन्देशो विवेकानन्देनादायि। असौ विवेकानन्दः सोऽयं समुद्रो, यस्मिन् धर्मः राजनीतिः राष्ट्रियता अन्ताराष्ट्रियता च, तथोपनिषद्-विज्ञानञ्च निश्शेषं साम्यत्वेन विलीयन्ते नानाविधजलतरङ्गवत्। स सेतुः अयं परिव्राट्, यत्र प्राचीननवीनौ भारतावन्योऽन्यमाश्लिष्यते स्म।

एभिरेव स्वामिमहोदयैः स्वीयवाणीविलासेन व्यक्तित्वेन च भारतीयाः प्रबोध्यन्ते स्म, यद्वयं चिरन्तन्याः सभ्यताया उत्तराधिकारिणः स्म। अस्मदीया धार्मिकग्रन्था अमुष्मिन्संसारे सर्वतः समुन्नताः, अस्माकमितिहासः सर्वेभ्यः श्रेष्ठो महीयांश्च वर्त्तते।

अस्माकं संस्कृतभाषा विश्वस्मिन् समधिकप्राक्तनी, साहित्यञ्च अस्माकं सर्वेषु साहित्येषु समुन्नतं श्रेष्ठतमं गौरवास्पदं चकास्ते। एतदेव नास्ति, प्रत्युतास्माकं धर्मोऽपि एतादृशोऽस्ति, यल्लोके वैज्ञानिकानां निकषे हेमवत् विशुद्धायते, अथ च विश्ववर्त्तिनां समेषामेव धर्माणाम् आधारभूतोऽपि सर्वाधिको महीयान् विद्यते।

इत्थम्भूतैः स्वामिवर्य्याणां सदुपदेशवचोभिः आप्यायमाने भारत-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समाजे दृढीभूतोऽयं विश्वासो यदस्माभिः कस्मिन्नपि क्षेत्रे कस्मादपि न्यूनैर्न भाव्यमिति। भारते पूर्वं सांस्कृतिकराष्ट्रियता प्रसूता, ततस्ततो राजनैतिकराष्ट्रियतायाः प्रसवः। तथा च सांस्कृतिकराष्ट्रियताया आसीज्जनको विवेकानन्दः इति समामनन्तु ऐतिह्यज्ञाः।

सन १८९३ ईस्वीय-वर्षे शिकागो (अमेरिका) इत्याख्यनगरे, निखिलविश्वधर्माणामभूतपूर्वमेकं महासम्मेलनं समभूत्। तत्र भारतवर्षस्य प्रातिनिध्येन स्वामिनोऽपि गतवन्त आसन्, तत्र तैर्महासम्मेलने महज्ज्ञान-संसिक्तमौदार्यसंयुतं विवेकविपुलं सनातनवैदिकधर्मसारगर्भितं भाषणं प्रदाय महती स्वीया वाग्मिता प्रादर्शि।

अस्य प्रभावेणैव तत्र वास्तव्याः पश्चिमीया मन्त्र-मुग्धा इव प्राथमिके दिवसे तेषां शिष्यताङ्गताः, तथा च ते श्रीमत्स्वामिनं गुरुवत् अभिनन्दयामासुः। तत्रत्येन पश्चिमीय-"न्यूयार्क हेराल्ड" अभिधेयेन समाचारपत्रेण तदानीमेव महता कण्ठरवेण विज्ञापितम्, यदसौ, निखिलधर्माणां महासम्मेलने सर्वतोऽधिकं महीयान् विवेकानन्दः, संश्रुते सति सुभाषिते भाषणे तेषामनाश्वासेनान्तःकरणे अनेन प्रश्नेनोपस्थीयते स्म, यदित्थम्भूतस्य गुरुषु गरिष्ठस्य दूरेषु दविष्ठस्याध्यात्मनिष्ठस्य सज्ज्ञानशीलस्य भारतदेशस्य, धार्मिकोन्नत्यै धर्मप्रचारकाणां सम्प्रेषणं कियल्लज्जास्पदं विभाव्यते इति। कियत्प्रभावः समजनि हिन्दूधर्मस्य श्रीविवेकानन्दस्वामिनः इति तु समवगतमेव।

रूढिवादिताया बाह्याचारान्धविश्वासस्य चान्धकूपाद् बहिर्निस्सार्य धर्मं लोके कियती विलक्षणा बन्धुत्वपोषिका विश्वासपरिमला व्याख्या धर्मस्य प्रास्ताविं, "यद्धर्मो मनुष्यस्य अन्तर्निलीयमानस्य देवभावस्य विकासरूपः" "धर्मो न तिष्ठति पुस्तकेषु, नापि संतिष्ठते धार्मिकसिद्धान्तेषु, स तु तिष्ठति केवल-मनुभूतिपुञ्जे" "धर्मो नास्ति अन्धविश्वासः, नापि अलौकिकः पदार्थः, स तु जीवनस्यात्यन्तं स्वाभाविकं तत्त्वम्" इत्यादि, स्वात्माभिव्यक्तिभिः भाषणैः, लेखैः, कविकर्मभिः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वादविवादैश्च सर्वत्र शुभ्रवियद्गङ्गेव हिन्दूधर्मसारो व्यस्तारि। प्रायः सार्धशताधिकवर्षेभ्यः समारभ्य "ईसाई" इति धर्मप्रचारकाः संसृतावस्यां अनेन हिन्दूधर्ममवमन्य तस्यान्यथासिद्धत्वं प्रचारितवन्तस्तेषु अनेन स्वामिना स्वलोकोत्तरप्रतिभापन्नकर्तृत्वेनैव स्वीयसिद्धान्तभूतो हिन्दूधर्मः संस्थापितः। एवं हिन्दूधर्मस्य जिघांसया यः "अंग्रेजी" भाषाप्रभावजन्यः "ईसाई"-धर्मो यूरोपीय-बुद्धिवादरूपो प्रबलो झञ्झावात उत्थितः, स भूधरोत्तुङ्गशिखरस्येव विवेकानन्दस्य विशालवक्षसः प्रतिघातेन स्वयमेव विनश्य निवृत्तः।

तथा तदानीमेव पाश्चात्त्येषु राष्ट्रेषु व्यवहारनिपुणेन स्वामिना निवृत्तिमार्गमध्यात्मपथेनोपदिदिशे, परम्भारतीयानां कृते आधिभौतिकोन्नतिमयं धर्मोद्बोधनमादिदेश स्वामी, संवीक्ष्य भारतीयार्थिकदुरवस्थां, सदीशोपासनेयमस्ति, "वसुधैव कुटुम्बकम्" इति रीत्या "एकमात्मरूपं ब्रह्म अनन्तं प्रतिबिम्बमात्रम्" इति दृष्ट्या सर्वत्रैव भासते सः, एवं मानव-बन्धूनां मनसा वाचा कर्मणा विधीयमानायां सेवायां स्वोत्सर्गः कर्तव्यः। नाहं मन्ये तं परमात्मानं यः परलोकदानमिषेण ऐहलौकिकशुष्ककरपट्टिकाभ्यो वञ्चनया मां निवर्तयति, यः सौभाग्यविरहिणीनां ललनानामश्रुप्रोञ्छनं न समर्थयति, यः पितृविहीनस्य बालकस्य वात्सल्यमये ललितानने ग्रासमेकमपि करपट्टिकाया दातुं न प्रभवति।" इति भावनया तैः केवलं स्वस्वकर्तव्यनिष्ठमानवेषु भगवत्स्वरूपे निश्चित्य नरनारायणापेक्षया जनताजनार्दनस्य सेवायाः परमं माहात्म्यमुपस्थापितम्।

तेषां बलवतीच्छास्ति स्म, यत्, शक्ति-पौरुष-क्षात्रवीर्य-ब्रह्मतेजसां समन्वयेन भारतवर्षे अभूतपूर्वा मानवता निर्मापयितव्या। यद्बलेन वयं भारतीयाः सर्वत्र कुशलिनो भवेम। एवं भारतवर्षे तेषामुपदेशाः—"उन्नति-साहस-सेवाकर्मणां महत्तां संसाध्य प्रवृत्तिमुखा दृष्टिपथे समायान्ति। तैः कृतकृत्योऽयं देशोऽद्यापि तेषां कृतज्ञतां भजते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नारीः प्रति तेषु महौदार्यभावो वर्तते स्म, एकदा ते मानसिक-सरसभावनां प्रकटयन्तो जगदुः, यत् संन्यासिनां पारिवारिकाणाञ्च न भाति कोऽपि भेदो, भवतु नाम संन्यासी गृहस्थो वा यत्र मया हृदयविशालता चारित्रिकपवित्रता. महत्ता च विलोक्यन्ते, रमते तत्रैव मे मनः। अतो नारीणाम्विपत्तिकालेऽपि असौ महात्मनाः तद्विपत्ति-संशोधनार्थमनवरतं प्रायततेति।

भारतीयाया एकताया महत्त्वं जनतायाः समक्षमत्यन्तं सुस्पष्टतया एवं निदर्शितं, अथर्ववेदीये मन्त्रेऽयमर्थो व्याख्यायते, "यन्मनसा ऐक्यं भावय, विचारत ऐक्यम्भावय" मनसा ऐक्यसम्पादनं समाजस्यास्तित्वं भावयति, अतः सर्वदैव स्मर्यताम्, शक्तिसञ्चयः, सङ्कल्पैक्यम्, एतयोरेव भारतस्य भविष्यत्समुन्नतिर्निर्भरा। यावदेवं न विधीयते, तावद्धि भो! भो! भारतीयाः, युष्माकं कल्याणमपि खपुष्पमिव।

भारतस्य पार्श्वे यो दीर्घकालिकः कल्पतरुरिवानुभवस्तेन निखिलस्यापि विश्वस्य सन्तुष्टिर्भवितुं पार्यते, कल्याणेन चापि शक्यते भवितुम्। यतो हि जीवनस्य धर्मस्तदादानप्रदानमिति। पश्चिमतः अस्माभिर्यन्त्रवादशिक्षा ग्रहीतव्या, अन्या अपि बह्व्यः शिक्षाः विद्यन्ते, यासां संग्रहणं परमावश्यकम्, प्रतिदानरूपे वयं तेभ्यः आध्यात्मिकधर्मस्य च शिक्षां प्रदास्यामः।

अधुनाऽपि विश्व-सभ्यतार्ध-विकासः, पूर्णो भवितुं सतृष्णनयनेन भारतसाहाय्यमपेक्ष्यमाणो विकलायते स तामाध्यात्मिकभारतीयसंपत्तिं प्रतीक्षते, या भ्रष्टाचारमय-पतनशीलभारतस्य हृदये जोगुप्यमाना चेतनाशीलाऽक्षुण्णा विराजते। अतः सङ्कीर्णतां विहाय, विश्वबन्धुत्व-भावनां मनसि समासाद्य पश्चिमीयैः सह पारस्परिकविनिमयो विधेय एव, आध्यात्मिकताया धर्मस्य च विकासे पश्चिमीयानां साहाय्य-मस्माभिः कर्तव्यम्, भौतिकोन्नति-विकासे तैरस्माकं साहाय्यं विधीय-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ताम्, तदानीमेव सर्वं सम्पत्स्यते, "ययोरेव समं वित्तं तयोरेव…" इत्यादिना सर्वत्रैव अपेक्ष्यते समानता।

अतो मानवजातेः सर्वाङ्गीणाभ्युन्नतौ विशालहृदयैः प्रशान्त-बुद्धिभिर्भारतजनैः स्वस्वांशदानं तेभ्यस्तेभ्यः प्रदातव्यमेव। एवं प्रसुषुप्तस्य भारतस्य शैथिल्यभावङ्गतस्यालसस्य प्रोद्बोधनपुरस्सरं पुनरुद्धारायाधुनिकीं परिस्थितिं विज्ञाप्य पश्चिमदेशैः सह विनिमयाय कियान् प्रयासो विहितोऽनेन महापुरुषेण इति सार्वलौकिकम्।

प्रबलसमर्थकोऽयं विवेकानन्दो हिन्दूधर्मस्य, तथापि न स्तोकमपि "इस्लाम"-धर्ममद्विपत्।

शिक्षितयवनाः प्रायः "सूफी" - मतावलम्बिनो भवन्ति, येषा-माध्यात्मिकभावाः हिन्दूधर्मावलम्बिनामाध्यात्मिकभावानां बहुशः समानुकूल्यमेव भजन्ते, न तु वैभिन्न्यं, यवनसंस्कृतेः गर्भेऽपि हिन्दू-धर्म-विचाराः प्रावीविशन्। विख्यातो यवनसम्राडकबरः स्वधर्मवत् हिन्दूधर्ममपि संमेने। काल-क्रमेणावश्यं पश्चिमीयदेशेष्वपि भारतस्य हिन्दूधर्मप्रभावे समेधिष्यते। प्रौढविचारधारयोभयोर्धर्मयोरेकत्रात्यन्तं सान्निध्यमुपस्थाप्यते। यत् सामान्यतो वेदान्तो ज्ञानस्यैव विषयो, यत्र त्यागविरागस्य प्राबल्येन विचारः प्रचार्यते, किन्तु इस्लामधर्मः केवलं भक्तिविषयकः, अत एव "यवनपैगम्बरहजरतमुहम्मद"-इत्याख्य-स्येस्लामधर्मप्रवर्तकस्य मतेन समाधिना देहदंडनं, संन्यासाश्रमो वैराग्यञ्चेति स न बहु मन्यते। एवं स्वामिना विवेकानन्देन निवृत्ति-पराङ्मुखं शुद्धप्रवृत्तिमयं वेदान्तस्वरूपं प्रतिपादितमाचरितञ्च। अतस्तत्त्वतः इस्लामधर्मस्य प्रवृत्तिमार्गेण सार्धं न कोऽपि तेषां विरोधः। अत एव स्वामिवर्य्यैः समुद्घोषि, यत् "इस्लाम"-धर्मस्य सार्वभौम-ताया व्यावहारिकतायाश्च आत्मन्यारोपेणैव वेदान्तराद्धान्ता जनतायै परमोपयोगिनः सन्तीति सिद्ध्यति, नान्यथा"। १८९८ ईस्वीये वर्षे तैरेकस्मिन्दल अलेखि यत्, "अस्मदीयजन्मभूमेः कल्याणं त्वत्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्निहितमस्ति, यत्र द्वावपि धर्मौ हिन्दुत्वरूपः, इस्लामरूपो मिथः चेदैक्येन वेविद्येत, वेदान्तिमस्तिष्कं, इस्लामशरीरञ्च, द्वयोः संयोगेन, यो धर्मरूपः समायास्यति, स एव भारतस्य परमाभिलषितः" अतो हेतोरद्वैतवेदान्तधर्मस्य वैदिकधर्मस्य च जगति सार्वत्रिकः प्रभावः प्रतिपादितो भवति।

अद्वैतवेदान्तवादिनो विवेकानन्दस्वामिनो हिन्दूधर्मस्य सार्वभौमरूपस्येतोऽधिकं व्यापकत्वेन विस्तारं विहितवन्तः। संसारे ये अनेके धर्माः विस्तृताः सन्ति, तेषामनिवार्यतां व्याहरन्नसाववोचत्, यद् भक्षयति च सर्वत्रान्नं मनुष्यः, किन्तु देशे देशे, नानाप्रकारेण पृथक् पृथक् पाकनिर्माणविधयो भवन्ति, तथैव धर्मो मनुष्यस्यात्मनो भोजनमस्ति, एवञ्च राष्ट्रे राष्ट्रे तस्यापि अनेकरूपाणि भवन्ति।

भारतवर्षे बहवो धर्मभेदाः प्रचलिता वर्त्तन्ते, तानुद्दिश्य स्वामिमहोदयः प्रणिगदति स्म प्रायः यदस्माभिः केवलमिमे धर्माः सोढव्या एव न हि, अपि तु ते सर्वेऽपि धर्माः अस्माकं स्वीया धर्मा एव, इत्येवं हार्देन भावेन ते सर्वेऽपि अस्माकमङ्गीकरणीयाः।

अत एव श्रीरामकृष्णपरमहंसेनापि अयमेव डिण्डिमघोषः समुद्घोषितो यदस्य समस्तस्य संसारस्य सर्वेऽपि धर्मा एकरूपाः, तेषु धर्मेषु, केनाऽपि रूपेण भेदभावो नानेतव्य इति। अतो विदाङ्कुर्वन्तु, यज्जगति प्रचलिता अपि विविधधर्माः केवलं वेदान्तधर्मस्य शाखास्वरूपा एव, वेदान्तधर्मः सर्वेषामेव धर्माणां पितृस्वरूपः, इत्याकारकमेव ज्ञानं प्रमा, इति च निश्चीयते।

सांसारिकेषु धर्मेषु एकता कथमानेतव्या, अस्य विधानं न हि लभ्यते, प्राक्तने काले सर्वे जना एवं मन्यन्ते स्म यद् यो धर्मः सर्वतः सुकरस्तस्मिन्नेव धर्मे सर्वैर्दीक्षितैर्भवितव्यम्। अस्यायं परिणामोऽभूत्, यत्प्रत्येकधर्मावलम्बिनो जनाः स्वस्यैव धर्मस्य व्यापकत्वेन प्रचारं प्रारब्धवन्तोऽत एव "शिकागो"-इत्यत्र यद् विश्वधर्मसम्मेलनं संपन्नं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्याप्ययमेवाशयो यत् संसारे कोऽयं धर्मः सर्वोत्तम इति निर्णेतव्यः खलु विषयः, किन्तु तत्र सम्मेलने स्वामिमहोदयेन स्वीयोभावो यदोपस्थापितस्तदानीं तेन सर्वे धर्मप्रतिनिधयो विस्मिताः। स्वामिभिस्तत्र प्रोक्तं यद्धार्मिकैकतया कथं भवितव्यम् एतद्विषयेऽत्र बहुविचिकित्सोद्भाविता, एतत्सम्बन्धे मदीयो यो मतवादस्तं प्रस्तोतुं मया साहसोऽत्र न करणीयस्तथाप्येतावद् वक्तव्यमावश्यकं यत्कोऽपि जनो धार्मिकैकतायै यत्नमनुतिष्ठेत्।

एकेन धर्मेण विजित्य सर्वान्ततः सर्वे धर्माः परिभाव्याः, तेन तदानीं मया स पुरुष एवं सन्तोष्यो, यद्बन्धो! त्वदीयाशात्र न पूरणीया, किं मयेदं काम्यं यत् सर्वैः ईसाई-मतावलम्बिभिः हिन्दू-धर्मावलम्बिभिर्वा भवितव्यम्, भगवन्! एवं मा विधेयम् अनावश्यकोऽत्र धर्मव्यत्ययः। इदं परमावश्यकं प्रत्येकस्य कर्तव्यं, यत्, अन्यधर्मसारस्तेन मनसा संग्राह्यस्तथा स्वीयधर्मस्य वैयक्तिकतां पूर्णरूपेण संरक्ष्य तन्नियमानुसारेण स्वीयो विकासोऽनुसन्धेयो ये तदात्मीया नियमाः।

अथ चात्मनो भाषैका एव, किन्तु जातीनां भाषानेकधा भवति, धर्मस्तु आत्मनो वाणी, सा एव वाणी जातीनां बहुभाषासु आचार-विचारेषु अभिव्यक्ता भवति सर्वत्र।

धर्मं स्वामिमहाभागाः व्यक्तिहिताय, समाजहिताय च, परमोपयोगिनममन्यन्त। संसारे धर्मविरुद्धा या प्रतिक्रिया जागर्ति तस्या निदानमिदं स्वामिना दत्तं, यन्नास्ति दोषो धर्मस्य, अपि तु धर्म-प्रयोक्तॄणान्दोषो, यथा विज्ञानोत्थापितानां विभीषिकाणामुत्तरदायित्वं विज्ञाने न हि, अपि तु तेषु जनेषु ये विज्ञानोपयोक्तारः। स्वामिनामेष विचारो यद्धर्मो यया प्रणाल्या समाजे समारोपयितव्यस्तया प्रणाल्या न समारोपितः, हिन्दुः स्वकीयाः समस्तधार्मिकयोजनाः कार्यरूपे परिवर्तितुं भवतु नाम अशक्तः, किन्तु "जातुचिदपि विश्वधर्मसदृशो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्मः संभूतश्चेत्, तर्हि स हिन्दुधर्मसदृश एव, यो देशे काले च न क्वापि सीमित आहोस्वित निबद्धो न भवेत्, यो सर्वव्यापकः प्रभुः सदृशोऽनन्तो निर्बाधो भव्यश्च, तथा यस्य धर्मस्य सूर्यप्रकाशः कृष्णस्य, "ईसा"-इत्याख्यस्यानुयातृषु तथा सत्सु अभियुक्तेषु च समानतया सन्दीप्येत, अयं धर्मो न ब्राह्मणः, न बौद्धः, न ईसाई, न यवनः, प्रत्युत स धर्मः एतेषां समेषां योगरूप एव"।

एवंरूपेण विवेकानन्दमहापुरुषैः हिन्दूधर्मस्य भारतीयसंस्कृतेश्च यादृशी प्राणपणेन सेवाऽकारि, तस्याः मूल्यं केन शक्यते अनुमातुम् ? तेषामुपदेशैर्भारतीयानां हृदये भविष्यद्भारतं प्रति समुज्ज्वलाशा समुद्वेलिता, "साहससूर्यः उदितप्रायः, भारतोत्थानमवश्यम्भावि, कोऽपि न शक्तोऽधुना भारतमवरोद्धुं, भारतं पुनर्न शास्येत, अयं विशालकायो देशः, पुनः स्वशक्तौ संतिष्ठमानो दृश्यते" अथ च वर्त्तमान-देशो भारतो यद्ध्येयमुद्दिश्य, भौतिकाध्यात्मिकोन्नतिमार्गे संतिष्ठमानो वर्धते, तद्विषयकं समस्तमपि व्याख्यानं परमपूज्य-श्रीस्वामिवर्य्यैः पूर्वमेव लोके विततमेव ।

विश्वधर्म-सम्मेलने गते सति स्वामिनि भारतवर्षस्य गौरवसूर्यः पश्चिमदिशि उदेति स्म, अत एव हर्षोल्लासमयं भारतवर्षं संवीक्ष्य सर्वे आत्मनिष्ठाः गौरवान्विताश्चासन्, यतो हि स्वामिवर्यैस्तत्र सम्मेलने एतादृशो विशिष्टसत्ताकः प्रौढविचारगर्भितः हिन्दुत्वपक्षस्य प्रचारो व्यधायि यो न भूतो न भविष्यति च ।

स्वामिनां विदेश-यात्रा-सम्बन्धे बहून्युद्देश्यानि आसन्, एकन्तु, भारतवासिनां हृदये बहुकालात्समाविष्टोऽन्ध-विश्वासस्तं विनाशयितुं चेष्टमानैः स्वामिभिः तत्र गम्यते स्म, इत्याकारकोऽन्धविश्वासः, यत् "समुद्र-यात्रा पापमयी, वैदेशिकानां पाणिभ्यामन्नोदकसंग्रहणेन स्वजातिर्विनश्यति" तथा द्वितीयम् आंग्लभाषामधीयानान् जनान्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदमपि प्रदर्शयितुं, यद् भारतीयाः स्वस्यात्मीयस्य जनस्य वा स्वयमेव समादरं न कुर्वते, परन्तु तेषां सांस्कृतिकपश्चिमीयगुरवस्तु प्रभाविताः भवितुं शक्नुवन्ति। स्वामिनामयं दृढो विश्वास आसीत्, यद् भारतवर्षस्याध्यात्मिकविचाराणामादर्शानाञ्च प्रचारो यदि पश्चिमराष्ट्रेषु क्रियेत, तर्हि तत्रत्या जना अवश्यं प्रभाविता भवेयुस्तथा पृथ्व्यामेका अभिनवा कल्पनोद्भवेत्, एकस्य नूतनस्य जीवनस्य सूत्रपातः प्रारभेत, तथा च तृतीयं. निखिलेऽपि संसारे धार्मिकैकताया भावः समुद्बोधनीयः. इति श्रीरामकृष्णपरमहंसस्य संदेशं लोके श्रावयितुं गुरूणां मनःसन्तोषाय च सन्देशवाहको विवेकानन्दः तत्र जगाम।

एतादृशं संस्कृतिमयं विवेकानन्दस्य क्रियाकलापं अन्तश्चक्षुषा दर्शं दर्शं महामानस-रवीन्द्रनाथ-ठाकुरमहोदयैः प्रोक्तं, यत् "कोऽपि पुरुषः भारतं समवगन्तुकामस्तर्हि तेन विवेकानन्दः समध्येतव्यः।"

तथा श्रीमदरविन्द-महाभागेन प्रोच्यते स्म, यत् "पश्चिमीये जगति विवेकानन्देन यत्साफल्यं प्रापि, तदेवात्र प्रमाणं, यद् भारतेन केवलं मृत्योः संरक्षणायैव न हि व्यवसीयते, प्रत्युत विश्व-विजयी भूत्वैव विरमणं कुर्यात् एष भारतदेशः।"

अन्यदपि श्रीसुभाषचन्द्रबोस-नेतृ-महोदयेनास्य महाशयस्य विषये स्वमतम्प्रख्यापितं यत् "स्वामिविवेकानन्द-महोदयानां धर्मो राष्ट्रियतायाः समुत्तेजक आसीत्, नवयुवकेषु भारतं प्रति तैर्भक्तिरस उद्भावितः भारतस्यातीतं प्रति गौरवं प्रसूतं, भविष्यत् प्रति आस्थाश्च प्रसाधिता, तेषां हार्दभावाः मानवेषु आत्म-निर्भरतां, तथा च स्वाभिमानस्य भावान्समुद्भावयन्ति। स्वामिवर्यैर्विस्पष्टतया राजनीतेरेकोऽपि सन्देशो नादायि, किन्तु योऽपि तेषामथवा तदीयरचनानां सम्पर्कं समागात्, तस्मिन् देशभक्तिः राजनीतिनिपुणता च स्वयमेव समुत्पद्येते स्म"।

इत्थं वस्तुतत्त्वसमवगमनेन अस्माभिः प्रख्याप्यते, यदयं "वेदान्त-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्म-प्रतिष्ठाता युगाचार्यो विवेकानन्दः" विजयतेतरामिति। तथा चायं हिन्दूजातेधर्मः, यावत्पर्यन्तं जीवन्तोभिर्जातिभिः वृत्यते तावत् तादृक्श्रद्धया, यादृक्श्रद्धया वेदव्यासः वाल्मोकिश्च स्मर्यते, तथैवायं विवेकानन्दोऽपि, आजीवनं स्मर्यताम्—इति तं श्रीविवेकानन्दं श्रद्धापूर्वकं स्मार स्मारं विरमामि। अस्तु शम्।

"ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते, पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।"

अध्यापक-डॉक्टर-श्रीनरेन्द्रनाथशर्मा चौधुरी (यू० जी० सी० प्रोफेसर हिन्दुविश्वविद्यालयः वाराणसी) इत्येतेषां भाषणस्य सारः।

मान्याः सभापतिमहोदयाः! देव्यः, सज्जनाश्च—स्वामिश्रीविवेकानन्दस्य जन्मतिथिमहोत्सवे भक्तिनिवेदनार्थमागमनाय श्रीरामकृष्ण-अद्वैताश्रमेण मह्यं निमन्त्रणं दत्तम्। मया च सानन्दं स्वीकृतं समागतं च।

संघेनानेन जगतो हिताय कार्यं सदैव क्रियते। एतत्कार्यं न केवलं भारतवर्षस्य, अपि तु विश्वस्य जगतः कृते महान्तमुपकारमावहति।

स्वामि-श्रीमदपूर्वानन्दस्य संस्कृतं प्रति महानादरो दरीदृश्यते। संस्कृतस्य प्रचाराय प्रसाराय च अनेन सुतरां प्रयत्नः क्रियते। कार्यमेतत्सर्वथा धन्यवादमर्हति। अस्मिन्स्वतन्त्रे भारते संस्कृतस्य समुन्नतिः खलु अस्माकं देशस्य, विश्वस्य जगतश्च सुखाय, शान्तये, समृद्धये च ध्रुवं भविष्यति।

स्वामि-श्रीविवेकानन्दाय श्रद्धा-पुष्पाञ्जलिप्रदानार्थं सर्वे जनाः समागताः, पुष्पाञ्जलिश्च दत्तः। मयाऽपि स्वामि-महोदयाय सभक्तिश्रद्धापुष्पाञ्जलिः प्रदीयते। प्राचीनोऽयमाचारः। अनेन महतां पावनं चरित्रं कार्यजातं च स्मर्यते। तच्चास्माकं जीवने प्रतिपदं हस्तावलम्बनं च प्रयच्छति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्प्रत्यस्माकं देशस्य समवस्था न समीचीना वर्तते। नात्र सम्यक्तया शान्तिमैत्रीभ्रातृभावो वा विद्यते। परंतु साम्प्रतमेव स्वर्गतस्य श्रद्धार्हस्य लालबहादुरशास्त्रि-महोदयस्य प्रयत्नेन महत्परिवर्तनं भविष्यतीति मन्यामहे वयम्। किन्तु स्वामि-श्रीविवेकानन्देन दर्शितस्य पथः समनुसरणेन विश्वस्मिन् जगति शान्तिमैत्री भ्रातृभावः परमानन्दश्च सर्वथा भूयो भवेदिति महानस्माकं विश्वासः। तदर्थमद्य स्वामिमहोदयमधिकृत्य भवतां पुरतः किञ्चिन्निवेद्यते।

स्वामि-श्रीविवेकानन्दः खलु युगाचार्यः, परमात्मनस्तावदंशभूतश्च विराजते। स्मर्यते च श्रीमद्भगवद्गीतायां 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्'। अपि च "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम-तेजोंऽशसंभवम्"। एवं चायं वेदनिबद्ध-वेदान्तधर्मस्य प्रवर्तयिता विद्यते।

सम्प्रति प्रश्नोऽयं समुदेति, कोऽयं वेदान्तो नाम? उच्यते। अस्माकं खलु चतस्रः संहिताः, ब्राह्मणानि, आरण्यकानि, उपनिषदश्च सन्ति। तत्र उपनिषदि प्रतिपादिता परा विद्या एव वेदान्तविद्येति परिगण्यते। व्यासप्रणीतं वेदान्त-दर्शनमेव वेदान्तविद्यात्वेन प्रसिद्ध्यति। तस्य वेदान्तदर्शनस्य ब्रह्मसूत्रस्य वा बहूनि व्याख्यानानि सन्ति। यथा वेदानां विश्वतोमुखत्वं तथा ऋषीणामपि विश्वतोमुखत्वमस्ति। ऋषिभिर्यद्यद्वर्ण्यते तस्य प्रायेण सर्वस्य सुश्लिष्टा बहवोऽर्था भवन्ति। अत एव ब्रह्मसूत्रग्रन्थस्य अद्वैतभाष्यं, द्वैतभाष्यं, वैष्णवभाष्यं, शाक्तभाष्यं च दृश्यते। तत्र ऋषीणां विश्वतोमुखत्वमेव कारणं प्रतिभाति। इत्थं स्वामि-श्रीविवेकानन्दस्य सरलमुपनिषन्मतमेव वेदान्तमतमिति परिज्ञायते। तन्मतं समासेनाधस्तात् यथाबुद्धि यथाश्रुतं च मया वर्ण्यते। यदि किञ्चिदन्याय्यं स्यात्तर्हि क्षन्तव्योऽयं जनः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ ब्रह्माधिकृत्य श्रूयते खलु ऋग्वेदे—'एकं सद्विप्रा बहुधा वदन्ति"। ब्रह्म खलु तत्त्वतस्तावदेकमेव । परंतु विप्रा यथादृष्टं यथाश्रुतं च तस्य बहुधा व्याख्यानं कुर्वन्ति । तत्र कारणं ब्रह्मणो महाभाग्यं कर्मपृथक्त्वं च प्रतिभाति ।

अथ सर्वभूतेष्वेव ब्रह्म विद्यते । श्रूयते च केनोपनिषदि - 'भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति' । एवं यदा सर्वेषां भूतानामात्मनि दर्शनं, आत्मनश्च सर्वेषु भूतेषु दर्शनं भवति तदैव तत्त्वतो ब्रह्मदर्शनं जायते । श्रूयते च ईशावास्योपनिषदि—"यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते"। अयं खलु श्रुत्यर्थो भगवता श्रीकृष्णेन गीतायामपि स्पष्टतया व्याख्यातः । तथा हि—"यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति"। अत एव श्रीरामकृष्ण-सेवा-संघस्य वरेण्यानां कर्मणां साक्षान्मूलमन्त्रः खलु "यत्र यत्र जीवस्तत्र तत्र शिवः"। "नरो नारायणः स्वयम्" "जीवसेवैव शिव-सेवा" इत्यादिरूपः सर्वत्रैव श्रूयते ।

अथास्य वेदान्तधर्मस्य यथार्थप्रतिपत्तये के नामोपायाः सन्ति? कथं वात्र सम्यक् सिद्धिर्जायते ? श्रूयताम् । तत्रोपायाः खलु बहवो वर्तन्ते । तत्र प्रथमं तु चित्तशुद्धिरावश्यकी । चित्तशुद्धये च निष्कामं कर्म दानं तपश्चावश्यकम् । उक्तं च श्रीमद्भगवद्गीतायाम्-- "यज्ञदान-तपःकर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्"। अथ ब्रह्मज्ञानसिद्धये त्यागस्य वर्तते महत्प्रयोजनम् । श्रूयते च ईशावास्योपनिषदि— 'ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्"। परमात्मा खलु सर्वमेव वस्तु सम्यग् व्याप्नोति । तस्य तावदस्य महतः सत्यस्य ज्ञानाय अलोभस्य त्यागस्य च परमं स्थानं वर्तते । अलोभेन त्यागाय शक्तिर्वर्धते । त्यागशक्त्या च परमात्मनः सर्वत्र दर्शनं सञ्जायते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परमत्र सर्वथा विभाव्यं यद् ब्रह्मज्ञानाय सर्वेषां वस्तूनां त्यागो भवतु नाम, परंतु सत्यस्य त्यागो मा भूत्। अस्य सत्यस्य बलादेव कामधेनु-हरण-प्रयासवृत्तमधिकृत्य वशिष्ठो विश्वामित्रं राजानं पराजयत।

अथ ब्रह्मज्ञानाय भक्तिः पतिपदमपेक्ष्यते। भक्त्या भगवतस्तत्त्वतो ज्ञानं दर्शनं तत्र प्रवेशश्च सम्भवति। उक्तं च गीतायाम्—'भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप"। अथानया भक्त्या एव शरणागतिराविर्भवति। इयमेव शरणा-गतिः परमात्मज्ञानाय श्रेष्ठं साधनमस्ति। अस्याः शरणागतेः प्रभावात् परमा शान्तिः परमपदप्राप्तिश्च सुखेन सञ्जायते। पाण्डववधूर्द्रौपदी खलु अस्याः शरणागतेर्बलादेव वस्त्रहरणमहापदः श्रीकृष्णप्रसादेन त्राणमवाप। साधूक्तं च गीतायां "तमेव शरणं गच्छ सर्वभावेन भारत। तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्"।

अथ भक्तेः शरणागतेश्च प्रवर्धनस्य सुशिक्षा तावदपेक्ष्यते। सुशिक्षया शीघ्रं चित्तशुद्धिर्भवति समदर्शनत्वं च जायते। इदमेव समदर्शनत्वं खलु सर्वेषां भूतानामात्मनि दर्शनम् आत्मनश्च सर्वभूतेषु दर्शनं सुखं साधयति। निष्कामकर्मयोगो भक्तियोगो ज्ञानयोगश्चानेन प्रकारेण निर्बाधमस्माकं जीवनस्य चरममुद्देश्यं संसाध्य "आत्मनो मुक्तिर्जगद्धितं चेति" संघप्रतिपाद्यं सत्यमविनयं प्रतिपादयति, जगति शान्तिं मैत्रीं सुखं समृद्धिं परमानन्दं च वर्धयति। अत्रैवास्माकं श्रेयः प्रेयश्च, मुक्तिरतिमुक्तिश्च विराजते। नान्यत् किञ्चिदस्ति, नान्यत् किञ्चिदपेक्ष्यते।

ओं शिवमस्तु

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाराणसेय-संस्कृत-विश्वविद्यालये संस्कृताध्ययननिर्देशकः पण्डित-बलदेव-उपाध्यायाः इत्येतेषां भाषणस्य सारः ।

धर्मतत्त्वविमर्शः

अद्य खलु विवेकानन्द-संस्कृत-विद्वद्गोष्ठीप्रसङ्गे विश्वबन्धुत्व-संस्थापन-निदानायमान-वेदान्तधर्म - प्रतिष्ठातॄणां धर्मजातिनिरपेक्षं ईश्वरबुद्ध्या मानवसेवातत्पराणां स्वामिविवेकानन्दानां वैदिकधर्म-विषये स्वविचारप्रकाशनार्थं सादरं समाहूतोऽस्मि इत्यतितरां सप्रमोदमस्मन्मानसम् । तत्रापि स्वामिनां हृदये देवभाषां प्रति महानादरोऽभूदिति युक्तमेवाद्यतन-संस्कृत-गोष्ठी-समायोजनम् ।

अथ धर्मस्य स्वरूपं तद्वैशिष्ट्यं प्राणिनां कृते तदुपयोगं च व्याख्यास्यामः । धृ-धातोर्निष्पन्नोऽयं धर्मशब्दो धारणार्थमभिव्यनक्ति । विश्वस्मिन् जगति सर्वेषां पदार्थानां द्रव्याणां च संयोजनेन एकत्र धारणेन च जीवननिर्वाहः । तदर्थं धर्मः प्रभवति । सूर्यश्चन्द्रमास्तारामण्डलं पृथिवी च परस्परोपकारकोपकार्यभावेन सहधृतानि परमेश्वरेण निर्दिष्टानि स्वविशिष्टानि कार्याणि कर्तुं प्रभवन्ति । समाज एव मानवानां स्वोत्कर्षसाधनायै सन्ततमपेक्ष्यते तज्ज्ञैः । विभिन्नमानस-वृत्तीनां व्यष्टिभूतानां मानवानामेकत्र स्थित्यापादनेनैव समाजस्य समाजत्वं नाम । अत एव समाजस्य धर्म एव प्रतिष्ठा । न केवलं मानव-समाजस्य, प्रत्युत विश्वस्य जगतः प्रतिष्ठा धर्म एव । तथा च श्रुतिवचनं समुपजृम्भते 'धर्मो विश्वस्य जगतः प्रतिष्ठा, इति ।

चोदनालक्षणोऽर्थो धर्मः । चोदना नाम वेदप्रतिष्ठितमन्त्रैः प्रति-पाद्यमाना विधिरूपा प्रेरणैव । धर्मस्य प्रतिपादकत्वं नाम वेदे एव मुख्यतयोपयुज्यते । अत एव वेदस्याकुण्ठितां शक्तिं सम्प्रदायविदो दर्शयन्ति । तथा च शाबरभाष्ये (१।१।२)—"चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अवगमयितुम्" इति। वेदस्य प्रामाण्यत एव स्मृति-लोकप्रसिद्ध्यादीनामपि प्रामाण्यं दुर्निवारम्। स्मृतेर्वेदमूलकत्वात् लोकप्रसिद्धेश्च तदुभयमूलकत्वाच्च। ततश्च अपौरुषेयेण वेदेन प्रतिपादितत्वात् धर्मस्यापि अपौरुषेयता दुर्निवारा। यथार्थतस्तु न हि देशेन न वा कालेन धर्मः परिच्छिद्यते। देशकालाभ्यामपरिच्छिन्नत्वं नाम धर्मत्वम्।

धर्मस्य लक्षणम् 'यतोऽभ्युदय-निःश्रेयससिद्धिः स धर्मः।' श्रुत्या यानि कर्माणि विधिरूपेण विहितानि, तानि धर्म इति कथ्यन्ते। यानि च कर्माणि निषिध्यन्ते श्रुत्या, तानि अधर्म इति मन्यन्ते। धर्माधर्मव्यवस्थायां वेदस्य परमप्रामाण्यात्। तथा च श्रीमद्भागवते व्यासस्य गम्भीरार्थप्रतिपादकं वचनम्—

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।
वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम॥
(भाग० ६।१।४०)

भगवत्प्रणीतत्वेन धर्मस्य ज्ञाता बोद्धा भगवानेक एव, न ऋषयो, न वा देवाः, न वा सिद्धाः, कुतो मनुष्या विद्याधरचारणादय इत्यत्र प्रतिपादितं श्रीमद्भागवते—

धर्मं तु साक्षाद्भगवत्प्रणीतं,
न वै विदुर्ऋषयो नापि देवाः।
न सिद्धमुख्या असुरा मनुष्याः,
कुतश्च विद्याधरचारणादयः॥ (भाग० ६।३।१९)

धर्मस्याश्रयणेनैव इहलोके प्राणिनामभ्युदयः संजायते, अमुष्मिन् लोके च निःश्रेयसरूपा मुक्तिश्चोपलभ्यते। धर्मस्य धारकत्वं श्रीवेदव्यासो नानावचनैर्महाभारते प्रतिपादयति—

धारणाद् धर्म इत्याहुर्धर्मेण विधृताः प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥
(महा० शान्ति १०९।११)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्मस्य वैशिष्ट्यम्—अधिकारिभेदस्वीकरणं प्रथमं तावत् वैशिष्ट्यं धर्मस्य। मानवानां बुद्धिस्वभावादीनां नितान्तं भिन्नत्वाद् न हि सर्वं एव मानवा एकस्यैव धर्मोपदेशस्यानुकूल्यं भजन्ते। योग्यतामनुसृत्य निर्दिष्टो हि धर्मः सर्वदा हितावहः श्रेयस्करश्च भवति। न हि मनुजाः समानयोग्यताभाजोऽवलोक्यन्ते सत्त्वादीनां च तत्स्थानां गुणानां तत्र तत्र परस्परमुपचयापचयत्वाद् हेतोः तेषां मानसवृत्तीनामनेकरूपत्वाच्च। कर्मसिद्धान्तस्वीकारश्च द्वितीयं वैशिष्ट्यम्। लोकेऽस्मिन् प्रत्यहमनुभूयमानदशावैषम्यस्य अनेनैव सिद्धान्तेन सामञ्जस्यं घटते। केचन आढ्याः सुखेनैव स्वं कालं यापयन्ति, अपरे च हीनाः क्लेशेनैव स्वं समयं नयन्ति। को हेतुरस्य दशावैषम्यस्य? न हि सर्वेषां जनके परमेश्वरे नैर्घृण्यं कल्पयितुं पार्यते। प्राणिनां कर्मानुकूल्यादेव दशाविपर्ययस्य विनिश्चेतुं सुशकत्वात्। वैशिष्ट्यद्वयसमाश्रयेण हि सर्वासां समस्यानां समाधानं कर्तुं पार्यते विद्वज्जनैः। अन्येषु मतेषु अधिकारिभेदस्वीकरणाभावात् समान एवोपदेशः तन्मतानुयायिनां निखिलानामुपयोगाय विधीयते। एष तु नितान्तमनौचित्यं भजते। न हि सर्व एव तन्मतावलम्बिनः समानबुद्धिवैभवशीला विलोक्यन्ते, येन उपदेशस्य सामान्यरूपमंगीक्रियेत। कर्मसिद्धान्तस्वीकाराभावे विश्वस्मिन् प्रत्यहं प्रतिक्षणं चानुभूयमानो व्यवहारभेदो न कथमपि सत्तर्केण समर्थयितुं पार्यते। अत एव वेदप्रतिपाद्यधर्मस्य माहात्म्यं विद्वज्जनैरुररीकरणीयमेवेति। धर्मोपदेशविषयेऽधिकारिभेदस्वीकरणात् कर्मसिद्धान्तसमर्थनाच्चेति दिक्।

वैदिकधर्मस्य अद्वितीयत्वम्—धर्मस्तु एक एव। स च चोदना-प्रतिपाद्यो वैदिको धर्मः। अन्ये तु धर्मशब्देन प्रायशो व्यपदिश्यमाना अपि सम्प्रदाया एव। सम्-प्रोपसर्गाभ्यां युक्तस्य दा-धातोः 'आतो युक चिण् कृतोः' (७।३।३३) इति सूत्रेण घञ्प्रत्यययोगेन निष्पन्नोऽयं सम्प्रदायशब्दः गुरुपरम्परागतसदुपदेशं शिष्टपरम्परागतोपदेशं च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्यग् व्यनक्ति। तथा च महाकविना माघेन सम्प्रदायशब्दोऽयं सुष्ठु प्रायोजि एतस्मिन् पद्ये—

सम्प्रदायविगमादुपेयुषी-
रेष नाशमविनाशि-विग्रहः।
स्मर्तुमप्रतिहतस्मृतिः श्रुती-
र्दत्त इत्यभवदत्रिगोत्रजः॥ (शिशुपालवध (१४।७९)

एवं च केनापि विशेषगुणगौरवशालिना आचार्येण कालिकदैशिक-दशामनुरुध्य कस्मिन्नपि विशिष्टे भूभागे क्रियमाणः सदुपदेशः सम्प्रदाय-शब्देन व्यवह्रियते विद्वद्भिः। सार्वभौमत्वं सार्वकालिकत्वं अद्वितीयत्वं च यथा धर्मस्य द्योतकं तत्त्वम्, तथैव देशकालसम्बन्धतः कादाचित्क-त्वमनुभवन् सम्प्रदाय इति तयोः पार्थक्यरेखाविभागः। 'रिलीजन'-शब्दः सम्प्रदायमेव स्ववाच्यत्वेनाभिधत्ते। सम्प्रदायेष्वेव हिब्रू-ख्रिष्टीय-माहम्मदीयादीनि विश्रुतानि धार्मिकमतानि अन्तर्भवन्तीति सुधीभि-र्निभालनीयम्। त एतेऽनेके सम्प्रदायाः सनातनवैदिकधर्मस्यैवाङ्गभूताः तद्विवृतैकदेशस्यैव प्राधान्येन उपदेशकरणात्। भ्रातृभावः, परस्परं मैत्रीभावना, प्राणिनां परस्परप्रेमानुबन्धिनी सेवा इत्यादयो निखिल-मतेषूपलभ्यमाना धर्मगुणाः सनातनधर्मस्यैवाङ्गभूताः। एते सम्प्रदाया अपि परमपुरुषार्थभूतमोक्षस्य साधकत्वेन यदि धर्मशब्देन लोके व्यवह्रियन्ते, तत्तु उपलक्षणमात्रम्, परम्परया मोक्षसाधकत्वात् तेषु धर्मशब्दो ह्युपचरितवृत्तिर्द्रष्टव्यः।

वैदिकधर्मस्य निखिलमतोपजीव्यत्वम्—वैदिकधर्म एव विश्वेषा-मपि मतानां सम्प्रदायानां च जनकः। सत्यास्तेयशौचादि-सदाचार-स्याङ्गानामुपलब्धिरेव नैतत्सिद्धान्त-स्वीकरणे हेतुरूपतामाधत्ते अपि तु तत्स्वीकृत-परमेश्वरस्याभिधानमपि वेदादेव गृहीतमिति तुलनात्मकभाषा-विज्ञानपद्धतिमनुरुध्य ध्रुवं सत्यापयितुं पारयामः। तथा च हिब्रू-मते (यस्य प्रतिपादनं 'ओल्डटेस्टामेन्ट' नाम्ना प्रख्यातो बाइबिलग्रन्थस्या-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दिमो भागः विशदं विधत्ते) परमेश्वरस्य' 'यहोवा' 'यह्वे' इत्यादिविविधाकारैः समुदीर्यमाणमभिधानं वेदेषु देववाचक 'यह्व'-नामैव सर्वात्मनानुसरतीति भाषासमीक्षणसिद्धान्तः। 'यह्व'-शब्दस्य प्रयोगः ऋग्वेदीयविविधमन्त्रेषूपलभ्यते—

विश्पतिं यह्वमतिथिं नरः (ऋग्वेद ३।३।८)
प्रवो यह्वं पुरुणां विशां देवयतीनाम्।
अग्निं सूक्तेभिर्वचोभिरामहे यं सीमिदन्य इडते ॥ (ऋ. १।३६।१)

वैदिकोऽयं यह्व-शब्दः निघण्टौ (३।३) 'महन्नामसु' पठितो महदित्यर्थं सूचयति। 'यह्व इति महतो नामधेयम्। 'यातश्च हूतश्च भवतीति' निरुक्तं (८।८) तदेव समर्थयति। 'या' 'ह्वे' इति धातुद्वयसंयोगात् 'गेहे कः' (३।१।१४४) इति सूत्रेण बाहुलकात् भूते क-प्रत्ययो ह्वयतेः सम्प्रसारणाभावश्चेति वदति स्कन्दस्वामी। यातश्चासौ प्रार्थिभिर्हूतश्चेति तदर्थः। तथा च याजकैर्देवोऽयं सर्वथा गम्यते प्रार्थनास्वीकरणार्थं च बहुशो हूयते इति महत्त्वावच्छिन्नता तस्मिन् ध्रुवं जागर्ति।

हिब्रूमते परमेश्वरस्याभिधानं रोमनलिप्या Jehovah इति यत् विश्रुतम्, तत्र J इत्यस्योच्चारणं यकार एवेति भाषाविदः। आदौ नितान्तं पावित्र्याधानहेतोः परमेश्वरस्य नामोच्चारणं न कस्यापि समुचितमासीत्। परन्तु गच्छता कालेन तस्याभिधानं 'यह्वे' 'यह्वेद्' इत्येव बभूव। अस्य नाम्नोऽर्थः परममहानित्येव। अस्य शब्दस्य व्युत्पत्तिविषयेऽपि सन्दिह्यते विद्वद्भिः। 'हावाह' हीवूधातोर्निष्पन्नोऽयं शब्दः स्वयम्भूरित्यर्थं प्रकटयति (Howah to be, to axist, the self-existent) परन्तु व्युत्पत्तिरियं न हि सर्वैः भाषाविद्भिरनुमन्यते। वैदिक 'यह्व' शब्द-प्रतिरूपकोऽयं शब्द इति ममाभिप्रायः।

ख्रिष्टीयमते परमेश्वरस्याभिधानं 'गाड्' इति। शब्दोऽयं प्राचीनट्यूटानिक-भाषायां प्रयुक्तात् 'घूतोम्' (ghuto-m) शब्दान्निष्पन्नः। 'घूतो-म्' शब्दस्तु संस्कृत-'हूत'-शब्दान्निष्पन्न इति वदति प्रामा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

णिकमूर्धन्यः महनीय-आक्स-फोर्ड-आङ्ग्ल-भाषा-कोशः (Great Oxford English Dictionary)। होमादिभिर्यो हूयते, प्रार्थना-स्वीकरणार्थं च य आहूयते साधकैरित्यर्थमभिव्यञ्जन्नयं शब्दः 'हु ह्वे' इत्युभयधातुभ्यां स्वनिष्पत्तिं भजते। इत्थं 'गाड्' शब्दस्य मूलभूतो ऽर्थो विद्यते 'यज्ञेनोपास्यो देवः' 'हवनादिभिः पूजितः परमेश्वर' स्वमनोरथपूर्तिकामुकैः सेवितः सर्वशक्तिमान् भगवानिति। आङ्ग्ल-शार्मण्य-भाषादिषु 'गाड्' शब्दस्यादिममक्षरं गकार इति प्राचीन-ट्यूटीनिकभाषायां घकारं स्वनिष्पत्तिवर्णत्वेन परिगृह्णाति। स च संस्कृतभाषायां हकरादेव निष्पन्नः। संस्कृते हूतम् अथवा हुतम् प्राचीन-ट्यूटानिक-भाषायां 'घूतोम्' आङ्ग्लभाषायां गाड्, जर्मनभाषायां गात् इति। इत्थं च वर्णपरिवर्तनप्रणाली भाषाशास्त्रिभिर्नितान्तम-भिमताऽस्य समीकरणस्य हेतुरूपेति भाषाविद्भिर्निपुणं विवेचनीयम्।

अयमत्र निष्कर्षः। परमेश्वरवाचकः हिब्रू-भाषायां 'यह्वे' - शब्दः ख्रिष्टीयधर्मे च प्रयुक्तो 'गाड'-शब्दः उभावप्येतौ संस्कृतमूलादेव निष्पन्नौ इति निरुक्तशैलीमनुरुध्य वक्तुं पारयामो वयं यदेतावपि वैदिकत्वेन भासमानौ सम्प्रदायौ परमेश्वरस्य महनीयाभिधानहेतोः वैदिकशब्दावेवाधारत्वेन स्वीकुरुतः। इत्यहो जागर्ति वैदिकभाषायाः तुलनात्मक-धर्म-समीक्षणविषये कोऽपि महिमा।

वैदिकधर्मस्य शिक्षा-स्वरसः—नानाविधेषूपदेशेषु धर्मस्य पुरुषार्थ-चतुष्टयस्य सामञ्जस्यं हि नाम मूर्धन्यतामाप्नोति। त्रिवर्गे धर्मार्थ-कामरूपे धर्मस्यैव प्राधान्यमङ्गीकुर्वन्ति धर्मशास्त्रविदो मनीषिणः। धर्मानुकूलः कामो धर्मानुकूलोऽर्थश्च वैदिकधर्मे समीहितौ। न हि धर्मेण विरुद्धोऽर्थः कामो वा साफल्यं भजते। धर्मानुकूलः कामस्तु साक्षात् भगवद्विभूतित्वेन परिगण्यते श्रीभगवद्गीतासु—'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ' ७।११ इति वदता श्रीकृष्णेनापि। लोको-पकारित्वात् जीवननिर्वाहसाधकत्वात् निखिलमानवाभीष्टत्वाच्च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अर्थकामौ न कथमपि वर्जनीयतामाप्नुतः, परन्तु धर्मेणाविरुद्धावेव सन्तौ अभ्यर्हणीयतां भजत इति शास्त्रकाराणां हार्दम् । अत एव धर्मार्थकामानां परस्परोपकारित्वादेव संतुलिताचरणे शास्त्रस्य तात्पर्यम्, न तु तेषां विरुद्धाचरणे । तथा च व्यासस्य वचनम्—

धर्मार्थकामाः सममेव सेव्या
यो ह्येकसक्तः स नरो जघन्यः ।
तयोस्तु दाक्ष्यं प्रवदन्ति मध्यं
स उत्तमो योऽभिरतस्त्रिवर्गे ॥

सममित्यस्यार्थः अनासक्तिभावेन परस्पर-संतुलितरूपेणेति । स नरो जघन्यो भवति यः खलु एकस्मिन् कस्मिन्नपि-धर्मेऽपि यदि आसक्तः स्यात् । अर्थकामौ विहाय धर्मासक्तिरपि नो स्वीकार्या मानवैः । अर्थकामाभ्यां साकमविरुद्धभावेन धर्मस्याचरणे शास्त्रकाराणामाग्रहः, न तु अर्थकामाभ्यां वर्जिते धर्माचरणे इति निपुणं शास्त्रमर्म निभालनीयं भव्यैः । वर्तमानकाले अर्थकामौ धर्मेण नितान्तं विरुद्धौ साक्षात् क्रियेते । अत एव तौ त्याज्यौ, धर्माविरुद्धौ चेत् तु नितान्तं ग्राह्यौ इति वैदिकशास्त्राणां स्पष्टं तात्पर्यम् ।

आधुनिकः साम्यवादो भारतीयधर्मानुकूल एव । अन्योपमर्दनपूर्वकं स्वाभीष्टार्थोपलब्धिर्हि साम्प्रतिकी व्यवस्था लक्ष्यते पाश्चात्यदेशेषु साम्प्रत्रम् । परन्तु नैषा स्थितिः साम्यवादेन साकमौचित्यं भजते । एतद्विषये श्रीमद्भागवतस्य वचनमेतन्नितान्तं महत्त्वमाधत्ते—

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥

एषा स्वत्वमीमांसा । यावता द्रव्येण प्राणिनामुदरं भ्रियेत तावति एव द्रव्ये तेषामधिकारः, उदरपूरणार्थकत्वात् द्रव्यस्य । ततो योऽधिकं स्वत्वमभिमन्यते, स स्तेनः चौर एव । स च समाजे दण्डमर्हति । अनधिकृतस्य द्रव्यस्य स्वात्मापादनं हि चौर्यं नाम । तत्तु स्वोदरपूर्ति-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समधिकद्रव्येऽधिकारमानिनि पुरुषेऽपि नितान्तं समन्वेति। अत एव चौर्यभावो दुर्निवारः। एषा स्वत्वमीमांसा नैसर्गिकी औचित्यपूर्णेति सैव साम्प्रतमादरणीया मानवैः। यथार्थतः साम्यवादस्तु भारतवर्ष एव स्ववास्तविकं स्वरूपमाधातुं प्रभवति, नान्येषु भेद-प्रभेद-वादिषु पाश्चात्त्यदेशेषु। इत्थं च धर्मानुकूलत्वे अर्थकामयोः न हि कुत्रापि कंन-चित् संघर्षः, न वा क्वापि मतविरोधः इति हेतोस्तौ नूनमुपास्यौ। कर्तव्यस्य पालनं, न तु अधिकाराय संघर्षः; मानवानां मिथो भ्रातृ-भावः, न तु परस्परं वैमनस्यम्, युद्धानामुपशमः, न तु पारस्परिकः कलहः,—एतत् सर्वं साम्प्रतं वैदिकधर्मादेवोपगन्तुं पार्यते, नान्यतः कस्मादपि धर्माभासरूपात् सम्प्रदायात्। इति हेतोः स एवोपास्यः। तस्योपासनेन सर्वेषां मानवानामैहिक-फलस्योदयः आमुष्मिक-कल्याण-स्योपलब्धिर्नूनं भविता। अतो वैदिको धर्मो भजनीयः इति दिक्।

श्रोतव्यः सौगतो धर्मः कर्तव्यः पुनरार्हतः।
वैदिको व्यवहर्तव्यो ध्यातव्यः परमः शिवः॥

ॐ तत्सत्।

विद्वद्गोष्ठी-सभायां प्रथमदिवसे सभापतयः वाराणसेय-संस्कृत-विश्वविद्यालयस्य उपकुलपतयः श्रीसुरतिनारायणमणि-त्रिपाठि-महो-दयाः इत्येतेषां भाषणस्य सारः।

श्रीविवेकानन्द-स्वामिनां देवभाषां प्रति अतिमहानादरोऽभूत्। आर्यभूमेर्भारतस्य सांस्कृतिकी, आध्यात्मिकी सामाजिकी राष्ट्रिया चोन्नतिः संस्कृत-भाषायाः अध्ययनं तथा तस्याः प्रचुरप्रचारमवलम्बते इति तेषां दृढविश्वास आसीत्। तमेवार्थमनुसृत्य एतदाश्रमस्थाः कार्यकर्तारः स्वामिनः संस्कृतभाषाप्रचारार्थं प्रयत्नशीला इति अतीव प्रमुदिता वयम्।

अद्याहं श्रीस्वामिविवेकानन्दपादानां जन्ममहोत्सव-समारोहे समायोजितायाः संस्कृतविद्वद्गोष्ठ्याः सभापतित्वे नियुक्तः काशीस्थ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीरामकृष्णाद्वैताश्रमस्यैतस्य विश्रुत-संस्थानस्य अध्यक्ष-श्रीमदपूर्वानन्दस्वामिमहाभागानां भृशमाभारान् आवहामि। एतेषां स्वामिमहोदयानां संस्कृतभाषां प्रति किमपि नैसर्गिकं प्रेम परिलक्ष्यते। एतैन केवलं श्रीरामकृष्णपरमहंसमहाभागानां श्रीविवेकानन्दस्वामिपादानां च उपदेशान्वितं जीवनचरितं सुबोधसंस्कृतवाण्या संस्कृतज्ञानां ज्ञानवर्धनाय निबद्धम्, अपि तु प्रत्यब्दमेषा संस्कृतविद्वद्गोष्ठी अपि वेदान्तधर्मस्य तत्त्वपरिज्ञानाय संस्कृते छात्राणां विपश्चितां च रुचिपरिवर्धनाय संयोज्यते। एतदर्थं सर्वेऽपि धर्मतत्त्वजिज्ञासवो विद्वज्जनाः स्वामिमहाभागानामुपकारततिं नितान्तमातन्वते।

"धर्मो विश्वस्य जगतः प्रतिष्ठा"। धर्मस्य हि निखिलस्य विश्वस्य धारकत्वेन जागर्ति कोऽपि विश्रुतो महिमा। धर्मो हि निखिलानां कल्याणानां मङ्गलानां च जन्मभूमिः। ऐहिकानाम् आमुष्मिकाणां च भोगानामपवर्गाणां चाविर्भावस्थली। धर्मस्य प्रतिपादकः अपौरुषेयो वेद एव। "चोदनालक्षणोऽर्थो धर्मः" इति प्रतिपादयन् जैमिनिर्धर्मस्य साक्षात् सम्बन्धं भगवत्या श्रुत्यैव संस्थापयति। अत एव सर्वसम्प्रदायविदो वेदस्य अकुण्ठितां शक्तिं दर्शयन्ति। तथा च शाबरभाष्ये "चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोति अवगमयितुम्"। वेदमूला श्रुतिरत एव सा प्रामाण्यं भजते। वैदिको धर्मो न देशेन व्यवच्छिन्नः न वा कालेन। अत एव अयमन्येभ्यो देशकालाभ्यां परिच्छिन्नेभ्यो धर्माभासेभ्यः नितरां विलक्षणो निखिलानां प्राणिनां च हितोपदेशकत्वेन सर्वथा उपकारकृत् वर्तते।

अनादिकालादारभ्य न कुत्रापि सनातनधर्मस्यास्य परम्परा विच्छिन्ना जाता। उपनिषत्सु, पुराणेषु, रामायणमहाभारतादिषु काव्यग्रन्थेषु, मनुयाज्ञवल्क्यपाराशरादिस्मृतिषु स एव वैदिको धर्मः स्वीयां विशुद्धां विवृत्तिं भजते। अवैदिकैश्चार्वाकबौद्धादिभिर्बहुशो हन्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मानोऽयं कुमारिलभट्ट-भगवच्छङ्कराचार्यादिभिर्यथाकालं भृशमुपचरित इति न परोक्षं प्रेक्षावताम् ।

वैदिकधर्मोऽयं न केवलं निःश्रेयसाय कल्पते, अपि तु लौकिक-पारलौकिकाभ्युदयायापि । स्वार्थपरमार्थयोः, ऐहिकामुष्मिककल्याणयोः समः सिद्धिप्रदो वैदिको धर्मः । धर्मार्थकामरूपे त्रिवर्गे धर्म एव प्रामुख्यं भजते इति तु सत्यम्, परन्तु नायं धर्मो अर्थकामौ विहाय वर्तते इति ध्रुवं विचारणीयं पण्डितैः । भारतीया संस्कृतिः धर्मार्थकामानां परस्परं सन्तुलनमाश्रित्यैव विजृम्भते । भारते अर्थो धर्मानुकूलो भूत्वैव साफल्यं भजते । तथैव कामोऽपि धर्माविरुद्धो भूत्वैव स्वमहिमानमाविष्कुरुते । अत एव भगवद्गीताया विभूतिविवरणप्रसङ्गे "धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ" (७.११) इति भगवद्वाक्यं संगच्छते । इदमेव तथ्यं श्रीवेदव्यासेन महाभारते बहुशः प्रत्यपादि । तथा चात्र विषये वेदव्यासस्यैतद्वचो निपुणं निभालनीयं जिज्ञासुभिः ।

"धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः ।
तयोस्तु दाक्ष्यं प्रवदन्ति मध्यं स उत्तमो योऽभिरतस्त्रिवर्गे" ॥

अर्थात् त्रयोऽपि धर्मार्थकामाः सममेव अनासक्तिभावेन सेवनीया भवन्ति । यो हि एकस्मिन् आसक्तो भवति स निन्दनीय एव । एषु द्वयोर्दाक्ष्यसम्पन्नो नरो मध्यमो भवति । त्रिवर्गे अभिरतः पुरुष एव मानवसमाजे उत्तमो भवतीति महर्षेर्वेदव्यासस्य हार्दम् ।

साम्प्रतं विश्वस्मिन् जगति राष्ट्राणां देशानां मानवानां च यः खलु नितान्तक्षोभकरो भीषणः संघर्षः साक्षात्क्रियते तत्र को हेतुरिति विचारयन्तु । कर्तव्यनिरसन-पूर्वकं अधिकारलिप्सैव तत्र मुख्यं निदानम् । सर्वे एव मानवाः स्वाधिकारायैव प्रयतन्ते, स्वकर्तव्येषु मन्दादरा एते स्वाधिकाराणामभिलब्धय एव नित्यमुद्युक्ता वर्तन्ते । अयमेव वर्तमानकालिकराष्ट्रकलहस्य सर्वत्र साक्षात्क्रियमाणो हेतुः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वैदिकधर्मस्तु मानवानां कर्तव्यमेव सातिशयमुपदिशति। कर्तव्य-परायणा एव जनाः स्वाभीष्टाधिकारानपि स्वत एवोपलब्धुं पारयन्तीति धर्मस्य रहस्यम्। अधिकारचिन्तनं विहाय कर्तव्यनिष्ठायामेव मानवानां कल्याणं समुपजृम्भते इति तदुपदेशसंक्षेपः।

निखिलप्राणभृतामाधारो नारायण उच्यते। प्राणिष्वपि विशेषतो नररूपनारायणस्य सेवायामाग्रहो वर्तते वैदिकधर्मस्य। प्रत्यक्षभूतं नारायणं परित्यज्य अप्रत्यक्षभूते नारायणे कः खलु प्रवर्तताम्। नर एव नारायणः, तस्यैव सेवा महते फलाय कल्पते। यद्यपि "आपो नारा इति प्रोक्ताः" इति मनूक्त्या संस्कारराशिः नारशब्देन प्रोच्यते तथापि नराणां समूहो नारम्। नारमेव अयनं यस्येति व्युत्पत्त्या नारायणस्य नराश्रितत्वमपि स्वतः सिद्ध्यतीति सुधीभिः स्वयं निभालनीयम्। इत्थं यदि जनताजनार्दनस्य सेवैव राष्ट्राणामादर्शो भवेत् तर्हि किं मानवानां संग्रामे एतावान् जनसंक्षयः भविष्यति ? स्वत्वविषये श्रीमद्भागवतस्योपदेशं सावधानेन मनसा शृण्वन्तु स्वार्थपरायणा अपि मनुष्याः।

"यावद् भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति॥"

स्वेनार्जितेऽपि धनराशौ कियत् स्वत्वम् अधिकारो वर्तते देहिनामिति प्रश्नः। यावता द्रव्येण जठरं भ्रियेत, उदरपूर्तिः संजायेत, तावत्येव स्वामित्वं पुरुषस्येति तदुत्तरम्। यः तस्मादपि अधिके धनराशौ स्वामित्वं मन्यते, स तु स्तेनः चौर एव। स तु समाजे दण्डनीयः। अन्यार्जितधनापहरणं नाम चौरत्वम्। अत्रापि अन्याभिलषितद्रव्यापहरणे कथं चौरत्वं न परिस्फुरतु ? इत्थं स्वत्वमीमांसां विदधता महर्षिणा वेदव्यासेन साम्प्रतं समुपजृम्भमाणस्य साम्यवादस्य मूलतत्त्वं समुन्मीलितम्। साम्यवादस्तु जनानां समत्वे प्रतिष्ठते। स तु वैदिकधर्मे एव मूलरूपेण विद्योतते, इत्थं विश्वस्मिन् जगति सर्वेषां मान-

६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वानां स्वाधिकारप्राप्ति-साधनत्वेन कर्तव्यनिष्ठामुपदिशन् धर्मानुकूल-कामार्थौ सेवितव्याविति प्रतिपादयन्, मनुष्याणां परस्परप्रेमाभि-वृद्धये साम्यभावं विवृण्वन् महनीयोऽयं वैदिको धर्मः समुपजृम्भते। सर्वेषां मतानां समन्वयप्रतिपादकोऽयं श्लोकः प्रसङ्गेऽस्मिन्साधु स्मर्तव्यः—

श्रोतव्यः सौगतो धर्मः कर्तव्यः पुनरार्हतः।
वैदिको व्यवहर्तव्यो ध्यातव्यः परमः शिवः॥

अस्यैव सर्वप्राणिहितकरस्य वेदान्तधर्मस्य विपुलः प्रचारः, प्रचुरोपदेशो विहितः श्रीविवेकानन्द-स्वामिचरणैः। साम्प्रतं जगति परिदृश्यमानविपुलमहिम्नः साक्षात्क्रियमाण - विमलयशोराशेर्वैदिक-धर्मस्य तस्य जिज्ञासायां पाश्चात्त्यानां यः खलु भृशमादरोऽवलोक्यते, तस्य प्रधानं कारणं वर्तते वेदान्तधर्मोपदेशपराणां श्रीस्वामिचरणानां अमेरिका-आंग्लदेशादिनाना-देशेषु वेदान्ताश्रमाणां संस्थापनं नाम। रामकृष्णसेवाश्रमोऽयं मानवानां कियतीमुपकारततिं विधत्ते इति वयं सर्वे जानीमः। पाश्चात्त्यदेशेष्वपि तद्देशीया नानाभाषाः परिशील्य तत्रस्थ-जनानां धर्माभिवृद्धये कल्याणाय च विवेकानन्दस्वामिपादानां शिष्याः तद्भाषाभिः स्ववैदिकसिद्धान्तान् कियता कौशलेन कियता तर्केण च साम्प्रतं प्रचारयन्ति इति जिज्ञासवो विद्वज्जनाः 'HINDUISM invades America' इति आंग्लभाषा-निबद्धं ग्रन्थं स्वैरं परिशीलयन्तु इति मदीया मनीषा। इत्थं परमहंस-रामकृष्णमहाभागानां विवेकानन्दस्वामिपादानां चोपदेशं जगति विशेषतो भारते वर्षे प्रचारयन्नयमुद्युक्तो भूत्वा समुपजृम्भतामिति मम भगवतः श्रीभूत-भावन - विश्वनाथस्यान्तिके प्रत्यहं प्रार्थना विलसति॥

ॐ शान्तिः शान्तिः शान्तिः।

—::o::—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवेकानन्द-संस्कृत-विद्वद्गोष्ठीप्रसङ्गे प्रथमदिनकार्यसमाप्त्यनन्तरं साहित्याचार्य - एम० ए० पं० टी० ए० भण्डारकर-इत्येतैः प्रदत्त-काव्यमय-धन्यवाद-प्रकाशनस्य सारः।

वेदान्ततत्त्वमुपदिश्य नवप्रकाशं
विश्वं तमः प्रसरसङ्गतमुद्दिधीर्षुः।
यः सप्रभं सुकृतवान्कृतवांश्चिदात्म-
स्नेहान्वितो विजयते स विवेकदीपः ॥१॥

शकटी भारपूर्णापि शूर्पं संवोढुमर्हति।
तथा क्षणविलम्बोऽयं क्षन्तव्यः क्षमयान्वितैः ॥२॥
काशीराज-कृपादृष्टि-सुवृष्टि-वशतोऽद्य किम्।
शिष्टानामिष्ट-सान्निध्यसुभिक्षं समजायत ॥३॥

सदःसरस्यामिह काशिकेश-
विभूतिनारायणसिंह - भानोः।
शुभोदयांशुच्छुरितं विकासं,
वृन्दं गतं कोविदपङ्कजानाम् ॥४॥

काशीसंस्कृत-वाग्विश्वविद्याभूपकुलाधिपान्।
हित्वा कोऽलमलंकर्तुं सभापतिपदं महत् ॥५॥
विश्वविद्यालयेभ्यश्च प्रमुखा दानकारिणाम्।
अध्यापकनरेन्द्राणां 'धर्मसारो' महीयते ॥६॥
सुधियः संस्कृताधीति - निर्देशकपदान्विताः।
अहो ! महोत्सवेऽत्र श्रीबलदेवाः समागताः ॥७॥

मीमांसारत्न - विज्ञातसुब्रह्मण्य - सतां सताम्।
न्यायमाला - विचारेण निर्णयः सर्वसम्मतः ॥८॥

प्रयातु च्छात्रपाण्डित्यवचनस्वर्णसंहतिः।
परीक्षा-कष-संघर्ष - निर्णयो हर्ष - हेतुताम् ॥९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूजितव्याः पुरस्कारैर्मिलिताश्छात्रपण्डिताः ।
भगिन्यो भ्रातरश्चैते वर्धयन्ति सदः प्रभाम् ॥१०॥
सर्वानेतान्प्रतीदानीं माननीयान्मनीषिणः ।
धन्यवादप्रकाशेन धन्यान्मन्यामहे स्वयम् ॥११॥
ये कारणवशादद्य नागताश्छात्रपण्डिताः ।
तेऽप्यर्हन्ति समायातुं श्वश्चतुर्वादनान्तरे ॥१२॥
भाषणान्यवशिष्टानां विदुषां प्रतियोगिनाम् ।
श्वोऽपराह्णे भविष्यन्ति चतुर्वादनकालतः ॥१३॥
पुनः सर्वान्प्रतीदानीं गोष्ठीशोभा-प्रवर्धकान् ।
साधुवादसुमैः स्नेहात्पूजयामः पुनः पुनः ॥१४॥
ॐ शान्तिः शान्तिः शान्तिः ।

भाषणप्रतियोगितायां प्रथमस्थानाधिकृत-श्रीविश्वेश्वरभट्टाचार्य-काव्य-व्याकरणतीर्थ बी० ए० तृतीयवर्षम्, ,". हिन्दुविश्वविद्यालयः वाराणसी इत्येतस्य भाषणस्य सारः ।

माननीयाः सभापतिमहोदयाः, उपस्थिता विद्वांसः, जनन्यो भगिन्यश्च !

अद्याहं अत्रभवतः स्वामि-प्रवरस्य श्रीमतो विवेकानन्दमहोदयस्य युगाचार्यत्व-विषये किञ्चिद्वक्तुं समादिष्टोऽस्मि । अतः समयस्य स्वल्पतया सर्वथा दीर्घप्रस्तावनां परित्यज्य अत्रभवतो युगाचार्यत्व-प्रतिपादनाय किञ्चिद्वक्तुमिच्छामि । आचार्यस्तु स एव भवितुमर्हति यः पथिप्रदर्शकः पथिकृद्वा ।

श्रीमता विवेकानन्देनैतद्दर्शितम्—यद् विश्वेऽस्मिन् बौद्ध-जैन-मोहम्मद्-ख्रिस्त-प्रभृतयो ये खलु धर्मा विद्यन्ते ते वेदधर्मा एव । यतो वेदधर्मो ह्यद्वैतद्वैतद्वैताद्वैत-भेदेन त्रिधा, जगति यानि षट्सप्तति-संख्याकानि धर्ममतानि तत्रभवता दृष्टानि सर्वाणि वेदधर्म एवान्तर्भवन्ति । यतः खलु पूर्वोक्ताद्वैत-द्वैतद्वैताद्वैतातिरिक्तं किमपि धर्ममतं नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतत् सम्यग् विचार्य तत्रभवता सर्वां लौकिकीं बाधां दूरीकृत्याकुण्ठित-चित्तेन वेदधर्मः प्रकाशितः। उदात्तो वैदिकधर्मः सर्वासां बाधानामुपरि वर्तते। अस्मिन् सर्वेषामेव जनानामधिकारो विद्यते। जैन-बौद्धधर्माभ्यु-त्थानात्प्राक् वैदिकधर्मे सर्वेषामेवाधिकार आसीत्, किन्तु कालपर्यायेण स्वोऽधिकारः सर्वथा निरस्तः। तदानींतना ब्राह्मणा बौद्धधर्माभ्युत्थान-समये संकुचितचित्तवृत्ताः सन्तः, संकुचितचित्तवृत्त्या च ते वैदिकधर्म-रक्षणाय यत्नपरा अभवन्। तस्य परिणतिमचिन्तयित्वैव ते तथा कृतवन्तः। तद्वंश्या वयमपि तदनुसृत्य वर्तामहे। प्रागैतिहासिकयुगे घोषा-मदालसा-गार्गी-मैत्रेयी-प्रभृतिस्त्रीणामपि वैदिकधर्मेऽधिकारोऽस्माभिर्दृष्टः। वेदधर्मस्त्वौपनिषदिकं ज्ञानम् यद्वेदान्त इति कथ्यते, वेदान्तज्ञानं तु वेदपठनात् पश्चादेव भवति स्मेति वैदिक-साहित्यादेवावगम्यते। विद्या-र्थिनां बुद्धिषु परिपक्वासु सतीष्वेव वेदान्तज्ञानोपदेशो दीयते स्म। 'अयमात्मा ब्रह्म' 'सर्वं खल्विदं ब्रह्म' 'तत्त्वमसि' इत्यादि-वेदान्तशास्त्रोक्त-महावाक्यानुसारेण सर्वे एव वेदान्त-दृष्ट्या तुल्याः, वेदान्तोपदेशग्रहणे च सर्वे समानांशभागिनो नात्र विद्यते कश्चित्संशयः। संकुचित-चित्तवृत्त्या-चेदं पश्यन्तोऽपि नापश्यन्। किन्तु तत्रभवता स्वामिवर्येणैनद् दृष्टम् विचारितं च तत्रभवता मनस्यैतच्चिन्तितम्, यत्सर्वेषां तुल्याधिकार-सत्त्वेऽपि समाजस्य मुष्टिमेयाः कतिपयाः जना इमं वैदिकधर्मं स्वगुप्त-धनमिव रक्षितुं प्रयत्नशीला अभवन् इत्येतन्नोचितम् प्रत्युत सर्वेभ्यः स्वस्वाधिकारार्पणमेव धर्मः। पुनश्च वैदिक-धर्मोपदेशद्वारा सर्वेभ्यो मोक्षमार्ग-प्रदर्शनमपि महान् धर्मः। इत्यतो महात्मना विवेकानन्देन कालपाकाल्लुप्तं वैदिकधर्मं पुनः समुन्नमयितुं तारस्वरेणोक्तम्–'उत्ति-ष्ठत, जाग्रत, प्राप्य वरान्निबोधत।' तत्रभवतः तारस्वरेणाहूता जना दिग्भ्यः समागत्य तं समाश्रितवन्तः, कृतकृत्याश्चाभवन्। एवं तत्रभवता स्वामि-विवेकानन्देन वेदान्तधर्म-साधन-रहस्यं केवलं केषाञ्चिदेव विशिष्टजनानां कृते विहितं विद्यते इति नियम-समुल्लंघन-पूर्वकं वेदान्तधर्मद्वारा मोक्षप्राप्तिद्वारं सर्वेषामपि विश्ववासिनां कृते समुद्धा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

टितमिति यथार्थमेव स यति श्रेष्ठः 'वेदान्तधर्म-प्रतिष्ठाता युगाचार्यः' आख्यायते। इत्यलं पल्लवितेन।

ॐ शान्तिः शान्तिः शान्तिः

द्वितीयस्थानाधिकृत—कुमारी - कृष्णा - वन्द्योपाध्याया एम० ए० (इंग्लिश फाइनल) इत्यस्या भाषणस्य सारः।

"वेदान्तधर्मप्रतिष्ठाता युगाचार्यो विवेकानन्दः" इति अद्यतन-आलोचनविषयस्य भूमिका भवितुमर्हति। सर्वज्ञान-पराकाष्ठारूपः, सर्वमानवानामादर्शभूतः अपौरुषेयो वेदान्त इति धर्मः स्वे महिम्नि प्रतिष्ठित एव, किन्तु यदा यदा कुसंस्कारपूरिते अविद्या-भ्रमजाल-कवलिते मानवहृदये तस्य भाः म्लानिमानं गच्छति, तदा तदा दैवशक्ति-संवलित-महापुरुषा अवतीर्य धरायां युगोपयोगिन्या रीत्या एतस्य सनातनधर्मस्य पुनः प्रतिष्ठां विदधति।

को वै स वेदान्तधर्मः ? धर्मेण येन लोकचित्तमध्यात्मभावेषु धार्यते, जनाः धर्मेण येन मोहादुत्थितान् विभेदान् विस्मृत्य समस्त-जाति-कुलवर्ग-वर्णसम्प्रदायादिनिर्विशेषेण मानवैः सह संमेल्य आब्रह्मस्तम्बपर्यन्तभुवने सच्चिदानन्दमेकमनुभूय परां शान्तिमाप्नुवन्ति, समदृष्ट्या च परस्परं प्रति विलोकयन्ति, स हि वेदान्तधर्मः, तस्यैव अवतार आसीत् श्रीपरम-हंसदेवः, तस्यैव च धर्मस्य प्राच्यप्रतीच्यदेशेषु जीर्णोद्धारं कर्तुं स्वामी विवेकानन्दः स्वगुरोर्निर्देशं शिरसि कृत्वा अस्मिन् धर्मविपर्यस्ते युगे युगाचार्यत्वं स्वीचकार।

शिकागोधर्ममहासभायां स्वामिनः विवेकानन्दस्य ओजस्वि-भाषणं महतीं युगक्रान्तिं सूचयति। तस्मिन्भाषणे स्वामिनः मूलवक्तव्यं तेन गीतोपनिषदः समुद्धृते श्रीभगवतोक्ते श्लोकेऽस्मिन्संग्रहेण कथितम्—

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥"

इति। श्रीभगवतः एव विधानेन पूर्वार्जितसंस्कारवशात् रुचियोग्यतानुसारं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मानवः विविधोपायैः एकेन परमात्मना सह सम्मिलनमेव प्रार्थयते, अत एव विभिन्नधर्मेषु विरोधो न भवितुमर्हति। उक्तं च शिवमहिम्नः स्तोत्रे- "रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव।"

प्राचीनऋषिभिरुद्गीतायां वेदवाण्यां यत्तत्त्वदर्शनमास्ते, तदेव उपनिषत्सु वर्तते, एवं तदेव 'सोऽहं' 'तत्त्वमसि' 'अयमात्मा ब्रह्म, 'सर्वं खल्विदं ब्रह्म' इति चतुर्षु महावाक्येषु जगत्सृष्टिस्थितिलयाधारभूतस्य परब्रह्मणः हिरण्यगर्भ-सूत्रात्मतैजसादि-रूपैः सर्वव्यापकत्वं प्रतिपादयति। औपनिषद्सन्निहितमेतत्तत्त्वदर्शनं मूलवेदान्त इत्युच्यते। 'एकं सद्विप्रा बहुधा वदन्ति'—इति यदद्वैतज्ञानमाहृतं प्राचीनार्यबुधैः, तस्यैव द्वैतविशिष्टाद्वैते द्वे शाखे परवर्तिनि काले विभिन्नदेशेषु ईसाई-मुस्लिमादिधर्मानुद्भावयामासतुः। वेदान्तस्य विश्वजनीनतायाः विषये स्वामिनः मतमुल्लेख्यम्। स उवाच—"सर्वे धर्माः वेदान्ते निहिताः सन्ति, वेदान्तदर्शनस्य द्वैतम्, विशिष्टाद्वैतम्, अद्वैतं च इतीमानि त्राण्यपि मतानि तिसृणां कक्षाणामथवा भूमिकानामन्तः सन्ति, तथा एकमपरेणानुगम्यते। इमानि त्रीण्यपि मनुष्यस्याध्यात्मिकोन्नतेः तिस्रा भूमिकाः। एषां प्रत्येकस्य प्रयोजनमस्ति। वेदान्तधर्मस्य प्रथमं सोपानं द्वैतवादः, यूरोपजातीयानां ईसाईधर्मरूपेण जातः। स एव सेमेटिकजातीयानां मुस्लिमधर्मरूपेण परिणतो बभूव। अद्वैतवादः योगानुभूतिरूपेण बौद्धधर्म इति परिवृत्तिं गतः। इदानीं तु 'धर्म' इत्युक्ते 'वेदान्त' एव प्रतीयते।"

अस्मद्देशेऽपि वर्णाश्रमव्यवस्थया सञ्चालिते जीवनयात्राप्रकरणे सगुणदेवपूजनं, गुर्वर्चना चेत्यादयः द्वैताभासिकधर्माः पुराणप्रख्याता हिन्दुरिति वेदान्त-प्रसूनस्य धर्मस्यैकस्य अंगानीव समजायन्त। परन्तु विदेशीयसभ्यतासु समागतासु विजातीयशासकाः, कूटकौशलेन धर्मध्वजिनश्च एकमखण्डं मानवधर्मं शतखण्डीकृत्य धर्मान्धताया वर्ग-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विद्वेषस्य च कलङ्केतिहासस्य सूचनां चक्रुः। अस्माकं देशेऽपि शाक्तशैव-वैष्णवादिधर्मसंघानां मध्ये स्वार्थसेविभिः धर्मजालकैर्विरोधो जातः। तस्यैव अस्पृश्योऽयं व्रात्योऽयं, विधर्मी जनोऽयमिति विषफलमद्यापि भुञ्ज्महे। अस्य कोऽत्र निवारकः ? स्वामी विवेकानन्दोऽब्रवीत्, यत् वनस्य वेदान्तं गृहमानीय हि तस्य प्रतिकारं कर्तुं शक्नोति जनः।

सर्वधर्मस्वरूपिणः अवतारवरिष्ठस्य श्रीपरमहंसदेवस्य पूतचरित्र-मेव तस्याग्रे ज्वलदुदाहरणमिव विरराज। सर्वभूतेषु आध्यात्मिक-समत्वदर्शनं श्रीरामकृष्णदेवस्य निःश्वास आसीत्। विभिन्नधर्माणा-मापात-वैचित्र्यमनुमोदयन् ईसाई-सूफी-मुस्लिमादि-धर्मानाचरन् तेषा-मान्तरिकतमेषु गूढभावेषु सम्प्रविश्य स इदमुपालभत, यत् सर्वे धर्मा एकस्यैव सामग्रिकधर्मस्य भिन्नानि रूपाणि। तस्य विषये स्वामिना कथितम् -"सर्वेषां भावानामेतादृशः समन्वयः संसारस्य इतिहासे अन्यत्र कुत्रापि अन्वेषणेनापि न लक्ष्यते।" अन्यत्र तेन लिखितम्— "रामकृष्णावतारे ज्ञान-भक्ति-प्रेम्णामानन्त्यम्। अनन्तं ज्ञानं भक्तिः प्रेम च। जीवान्प्रति अनन्ता करुणा च आसीत्।...सम्पूर्णापि हिन्दुजातिः युगसहस्रेण यं विचारमकरोत् श्रीरामकृष्णः किल एकस्मिन् जीवने तस्य सर्वानपि भावानुपालभत। तस्य जीवनं सर्वजातिवेदानां जीवित-व्याख्यारूपम्।"

मानविकतायाः पूर्णविकासः, धार्मिकसहनशीलता, व्यावहारिक-जीवने ब्रह्मज्ञानस्य सज्ञान-प्रयोगः—इतीमानि सन्ति स्वामिना विवेका-नन्देन पुनरुज्जीवितस्य वेदान्तधर्मस्यामृतफलानि। वैष्णवधर्मस्य जीवेषु दयायाः प्रसङ्गे एकदा श्रीरामकृष्णः भावाविष्टो भूत्वा जगाद,— "जीवेषु दया, दया ? कीटानुकीटोऽसि त्वम्, जीवेषु कथं दयां करिष्यसि ? त्वं कोऽसि दयाकर्ता ? न हि, जीवेषु दया न, शिवज्ञानेन जीवसेवा।" भावाविष्टचेतसा श्रीपरमहंसदेवेन—"शिवज्ञानेन जीवसेवाया यः परम-मन्त्र उच्चारितः तेनैव वेदान्तभित्तौ ज्ञानभक्तिकर्मणां समन्वयः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कर्तुं शक्यते; तस्य पथा वनस्य वेदान्तः गृहमानेतुं शक्यते; तस्मिन्नेव नरनारायणसेवायाः सर्वधर्मसमन्वयवेदमन्त्रे निहितमस्ति साम्य-मैत्री-भावानां बीजम्। गीतायां च श्रीभगवानुवाच –

"यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥"

अत एव वेदान्तज्ञानी—"सर्वतोक्षिशिरोमुखम्' जीवरूपमीश्वरं तद्गतभावनया पूजयेत्, तस्मादेव महती कल्याणशक्तिः सम्भविष्यति। व्यष्टिजीवने यद् ब्रह्मज्ञानं अपरान्प्रति आत्मीयां समत्वबुद्धिं प्रदास्यति, जागतिकव्यापारेष्वपि अध्यात्मदृष्टिमुन्मीलयिष्यति, समष्टिजीवने तदेव विश्वहितकार्यसाधनाय लोकान्प्रेरयिष्यति, विश्वभ्रातृत्वभावनां प्रबोधयिष्यति, विश्वशान्तिं च दृढां करिष्यति। त्रितापखिन्नस्य जीवन-युद्धे पराभूतस्य मानवस्य हेतवे स्वामिविवेकानन्दस्य हृदयं सदा रुरोद, मानवस्य कल्याणार्थं विश्वधर्म-स्थापनार्थं च निरवच्छिन्नसमाधिं तिरस्कृत्य वारं वारं जन्म ग्रहीतुमाग्रहान्वित आसीत्। ईदृश आसीत्तस्य महानुभावस्य लोकोत्तरमहिमा।

अद्येदं संस्मृत्य संस्मृत्य हर्षः सञ्जायते यत् विश्वबन्धुत्वस्य अग्रणीः, तत्त्वदर्शी, सर्वथा अनन्यः महापुरुषोऽयं विवेकानन्दः अस्माकमेव देशे जन्म लेभे, यः अद्यापि मानवधर्मस्य मूर्तिरिव 'पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः।'

विशेषस्थानाधिकृत-कुमारीगीता-वन्द्योपाध्याया मध्यमाद्वितीय-खण्डम्, आनन्दमयी-कन्यापीठम् वाराणसी इत्येतस्या भाषणस्य सारः।

वेदान्ततत्त्वमुपदिश्य नवप्रकाशं,
विश्वं तमःप्रसरसंगतमुद्दिधीर्षुः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यः सप्रभं प्रकृतवान् कृतवांश्चिदात्म-
स्नेहान्वितो विजयते स विवेकदीपः ॥

अयि माननीयाः सज्जनाः—

अद्य आयोजितायां सभायां पूजनीय-स्वामि - विवेकानन्दविषये यत्किञ्चिदुक्त्वा स्वरसनापवित्रीकरणस्य यन्मया शुभावसरः प्राप्तः एतेन मम मानसं अतीव प्रमोदपरम्परया पूरितं जायते। श्रीरामकृष्ण-परमहंसस्य श्रेष्ठतमशिष्यं स्वामिविवेकानन्दं को न जानाति ? न केवलमासेतुहिमाचलं तस्योज्ज्वलं यशो व्याप्तमपि तु संसारस्य सर्वेषु देशेषु तत्कृतोच्चतमकार्यस्य प्रशंसा मुक्तकण्ठं क्रियते। अद्य भाषणस्य विषयः 'वेदान्तधर्म - प्रतिष्ठाना युगाचार्य - स्वामि-विवेकानन्दः' इति निश्चितः अस्ति।

सनातनधर्मः—आर्यधर्म एव वेदान्तधर्म-शब्देन उच्यते। 'हिन्दु-धर्म' इति शब्दस्तु प्रमादात् ईसापूर्व-तृतीयशतके भारते आगतस्य अलकसान्द्रस्य अनुयायिभिः प्रथमं प्रचारितः, सिन्धुनदतटस्था जनास्तै-र्हिन्दव इति शब्देन सम्बोधिताः। वस्तुतस्तु अत्रत्या आर्यशब्द-वाच्याः सनातनधर्मीया वा ग्राह्याः। आर्याणां धर्म आर्यधर्मः। अनादिकालादयं धर्मः प्रचलितः, अत एव अयं सनातनधर्म इत्यपि उच्यते।

किं स्वरूपमेतादृश - सनातनधर्मस्य ? आब्रह्मस्तम्बपर्यन्तं सर्वत्र सर्वव्यापिनः ईश्वरस्य सत्ता, सर्वे प्राणिनः तस्यैव सर्वव्यापिनः ब्रह्मणोंऽशभूताः। अन्ते च सर्वेऽपि तस्मिन्नेवेश्वरे प्रविशन्ति। अतः ईश्वर-प्राप्त्यर्थं सर्वेषां प्राणिनां समानोऽधिकार इति अस्य धर्मस्य प्रधानतमं तत्त्वम्। एतत्खलु उपनिषत्सु भगवद्गीतायां ब्रह्मसूत्रेषु च समीचीनतया निरूप्यते। उपनिषदस्तु चतुर्णां वेदानामन्ते महर्षिभिः प्रणीताः। अत एव अयं सनातनधर्म आर्यधर्मो वा वेदान्तधर्म-नाम्ना प्रसिद्धः।

इह भारते, आगतान्सर्वानपि बाह्यदेशीयान् आत्मसात्कर्तुं सनातन-धर्मः समर्थ आसीत्। बाह्यदेशेभ्यः ग्रीकाः, यवनाः, शकाः, पल्लवाः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हूणाः इत्यादयः असंख्यजना अत्रागत्य भारतीयैः सह सम्मिलिताः। किमस्य कारणम् ? अयं भारतीयानां वेदान्तधर्मस्य प्रभाव एव। परं मोहम्मदानुयायिनां मूर्तिमन्दिर-भञ्जकानां आक्रमणसमये दुर्दैववशात् वेदान्तधर्मानुयायिन आर्याः स्वधर्मतत्त्वानि न केवलं विस्मृतवन्तः, अपि तु आंग्लशासनावसरे सर्वे स्वकीयमुच्चतमधर्मतत्त्वं विस्मृत्य केवलं भारतीयाः परानुकरणपरा अभवन्। एतस्मिन्नेव समये विस्मृतवेदान्त-धर्मेभ्यो भारतीयेभ्यः पुनरपि धर्मतत्त्वस्य स्मरणं दातुं अनेके महात्मानः समुद्भूताः। तेषु यत्प्रशंसनीयं कार्यं श्रीपरमहंसशिष्येण विवेकानन्देन कृतं तत्सर्वश्रेष्ठम्।

जन्माभूदस्य १८६३ ईशवीयजनवरीमासस्य द्वादशतारिकायां कृष्णपक्षस्य सप्तम्यां तिथौ कलिकातायाम्। जनकोऽस्य श्रीविश्वनाथ-दत्तः, जननी च श्रीभुवनेश्वरी देवी। कमनीयकान्तिमान् देवतुल्य-शिशुरसौ क्रमशः प्रियदर्शनः प्रतिभामण्डितः शौर्यवीर्यपराक्रमनरशार्दूल-तुल्य-सौरभमयतरुणयूनः रूपेण यदा रूपान्तरितोऽभवत् तदानीमपि केनापि न ज्ञातम्, यदयमेव नरेन्द्रनाथदत्तः कालान्तरे विश्ववरेण्य-स्वामिविवेकानन्दनाम्ना विश्रुतो भविष्यति इति। अष्टादशवार्षिकं नरेन्द्रनाथं प्रथमतः पश्यन्नेव श्रीरामकृष्णदेवः पर्यचिनोत्। स परि-ज्ञातवान् यत्कोऽयं नरेन्द्रनाथः ? कथं च जन्म गृहीतवान् ?। सहैव तदीययोगदृष्टिसम्मुखे नरेन्द्रनाथस्य सम्पूर्णमपि जीवनचरित दिवा-प्रकाशवत्प्रकाशितमभूत्। श्रीरामकृष्णदेवः यदा नरेन्द्रनाथं संन्यास-धर्मे दीक्षितमकरोत् तदानीं तस्यावस्था चतुर्विंशतिर्षदेशोया आसोत्। श्रीरामकृष्णदेवस्य देहपरित्यागानन्तरं वराहनगरमठे आनुष्ठानिक-भावेन तेन संन्यासदीक्षा गृहीता। पश्चादयं आसेतुहिमाचलं पर्यटनं चकार।

१८९३ ईशवीयजुलाईमासस्य षोडशदिवसे अयं शिकागोनगरं गतवान्। तत्र धर्ममहासम्मेलनमभूत्। १८९३ ईसवोयसितम्बर-मासस्य एकादशदिनं सोमवासरो. जगतो धर्मेतिहासस्य एकं स्मरणीय-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दिनम्—प्राच्यप्रतीच्ययोर्मिलनदिनम् सर्वस्मिन्नेव जगति विश्वभ्रातृत्व-प्रतिष्ठायाः सूत्रपातनम्। स्वामिविवेकानन्दं यन्त्ररूपेणावलम्ब्य विश्वस्य धर्ममहासम्मेलने प्राचीनभारतस्य वेदान्तधर्मः सर्वोच्चासने प्रतिष्ठितो जातः। तत्र ख्रिष्टीयधर्मस्य यहूदीधर्मस्य हिन्दुधर्मस्य जैनधर्मस्य बौद्धधर्मस्य चीनदेशीय - कान्फ्युशियनधर्मस्य जापानदेशीय शिन्टो-धर्मस्य इस्लामधर्मस्य जुरोथ्रुष्ट-इत्यादीनां सर्वेषां धर्माणां प्रतिनिधयः सम्मिलिता बभूवुः। परंतु स्वामिविवेकानन्दो न कस्यापि धर्मसम्प्रदाय-विशेषस्य, किन्तु स एव समग्रभारतस्यैव सनातनधर्म-प्रतिनिधिरासीत्। तेन स्वामिपादेन विभिन्नदिनेषु द्वादशभाषणानि दत्तानि। स पृथिव्याः प्राचीनतम-संन्यासिसम्प्रदायस्य नाम्ना सर्वधर्मस्य जनक-रूपो यः सनातनवैदिकधर्मः तस्य प्रतिनिधिरूपो भूत्वा पृथिव्याश्च यावतां हिन्दुजातीयानां सर्वेषां हिन्दुसम्प्रदायानां कोटिकोटिसंख्याकनर-नारीणां मुखरूपो भूत्वा आर्यऋषीणां नाम्ना सभामभ्यर्थयामास। स जगतां सर्वधर्मस्य जनकरूपेणैव सनातनहिन्दुधर्मं सभायां उपास्थापयत्। स एवं चावदत्—"यः धर्मः पृथिवीं चिरं समदर्शनं सर्वविधमतग्रहणं च शिक्षयति अहं तस्यैव धर्मस्यान्तर्वर्तीति स्वं गौरवान्वितं मन्ये। वयं तु न केवलं भिन्नधर्मावलम्बिनं समदृष्ट्या पश्यामः, अपि तु सर्वस्मिन्नपि धर्मे सत्यरूपेण वयं विश्वसिमः"।

विभिन्नधर्माणां गन्तव्यस्थानमेकमेवेति स्वामिमहोदयेनोक्तम्। गीतायां च भगवता श्रीकृष्णेनोक्तम्—"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्। मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः"। अस्य भावार्थः—हे अर्जुन! यत्किमपि धर्ममतमाश्रित्य कोऽपि आगच्छतु तद्भावेनैवाहं तमनुगृह्णामि। महिम्नः स्तोत्रेऽप्युक्तम्—"रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां, नृणामेको गम्यस्त्वमसि पयसामर्णव इव"। अस्य भावार्थः—हे प्रभो! नानापथगामिनीनां नदीनां सागर इव विभिन्नरुचिवशात् सरलकुटिलादि-नानापथ-चारिणां जनानां त्वमेव एकं गन्तव्यस्थानम्। स्वामिमहोदयस्य उक्तिरासीत्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"यावन्ति मतानि तावन्त एव पन्थानः"। स्वामिना विश्वधर्ममहासम्मेलने वेदान्तधर्मस्य यत् श्रेष्ठत्वं प्रतिपादितं तन्न कदापि म्लानतां गमिष्यति। तस्य सम्मेलनस्यानन्तरं स्वामिमहोदयः अमेरिकामहादेशस्य विभिन्नस्थानेषु पर्यटन् अनेकभाषणानि दत्तवान्। स इंग्लंडमपि गतवान्। एवम् अमेरिकायां स 'न्यूयार्क-वेदान्त-समितिं' संस्थापयामास। तेन इंग्लण्डे तथा अमेरिकायामक्लान्तपरिश्रमेण वेदान्तधर्मप्रचारो विहितः। तस्य मतेन "सर्वे धर्माः वेदान्ते निहिताः सन्ति। वेदान्तधर्मस्य द्वैतं विशिष्टाद्वैतं अद्वैतं चेमानि त्रीण्यपि मतानि मनुष्यस्याध्यात्मिकोन्नतेः तिस्रो भूमिकाः सन्ति। एतेषां प्रत्येकस्य प्रयोजनं विद्यते। इदमेव धर्मस्य वक्तव्यम्। भारतस्य जातीयानां आचारव्यवहाराभ्यन्तरे प्रयोगफलस्वरूपतः वेदान्तदर्शनं यद् रूपमगृह्णात् तदेव यथार्थहिन्दुधर्मः वेदान्तधर्मो वा। वेदान्तधर्मस्य प्रथमं सोपानं द्वैतवादः पाश्चात्त्यदेशीयानां ईसाईधर्मरूपेण परिणतो जातः।

इदानीं धर्म इत्युक्ते वेदान्त एव प्रतीयते। विभिन्नजातीयानां विभिन्नप्रयोजनैः पारिपार्श्विकतया तथा अन्योन्यावस्थानुसारं तस्य प्रयोगः विभिन्नरूपेण अवश्यमेव भविष्यति। मूलं दार्शनिकतत्त्वमेकमस्ति। तथापि शाक्तशैवादिसांप्रदायिकाः स्व-स्व-विशेषधर्ममतस्य अनुष्ठानपद्धतेः अभ्यन्तरे तस्यैव वेदान्तस्य रूपं प्रायच्छन्"।

सोऽन्यत्रावदत्—"अद्यावधि संसारे यावतां धर्माणामभ्युदयो जातः ते सर्वे वेदान्तधर्ममूलका एव, अथवा वेदान्तधर्मस्य विभिन्नशाखाः सन्ति। तेषां शाखासमष्टिरूप एव वेदान्तधर्मः। भविष्यत्यपि कियतामपि धर्माणामभ्युदयः कुतो न भवेत्, सर्वे वेदान्तमूलका एव भविष्यन्ति। द्वैतं, विशिष्टाद्वैतमद्वैतमितीमानि त्रीण्यपि मतान्यतिलंघ्य किमपि धर्ममतमुत्पन्नं न भवेत्। श्रीरामकृष्णः तस्यैव वेदान्तधर्मस्य मूर्तिरस्ति। स सर्वभावमयो सर्वधर्मस्वरूपो वर्तते"।

स्वामिविवेकानन्देन न किमपि नूतनं धर्मतत्त्वं प्रवर्तितम्, परं प्राचीनकाले श्रीशंकराचार्येण यः धर्मः प्रचारितः स एव विस्मृत-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सनातनधर्मः स्वामिना जगति पुनः प्रचारितः। अतः अस्माभिः स 'वेदान्तधर्म-प्रतिष्ठाता' इति नाम्ना सम्बोध्यते। पाश्चात्त्य-देशेषु स आसीत् भारतस्य हिन्दुसंन्यासी तथा तस्य वाणी आसीद्धर्मस्य वाणी—वेदान्तवाणी। इत्थं भारते स आसीत् भारतस्य देशप्रेमी साधुस्तया स्वाधीनताया ऋत्विक् संन्यासी स्वामी विवेकानन्दः। दुःस्थानां पद-दलितानां प्रपीडितानां रुग्णानां तथा मूर्खाणामुद्धारं कृत्वा मनुष्यत्वे प्रतिष्ठापनकारिणी आसीत् तस्य वाणी। स सर्वान् शिष्यानवदत्—"मातृदेवो भव। पितृदेवो भव। दरिद्रदेवो भव। मूर्खदेवो भव"। अस्य मतेन सेवैव परमो धर्मः। तेनोक्तम् यत्—आब्रह्मकीटपरमाणु-पर्यन्तं सर्वभूतेषु तदेव प्रेममयं ब्रह्म विराजते। सखे! मनः प्राणान् शरीरं च तस्मै एव समर्पय। तव सम्मुखे विविधरूपेण ईश्वरस्तिष्ठति, तं परित्यज्य कुत्र त्वं अन्वेष्यसि ईश्वरम्। यः जीवेषु प्रेम करोति स एव परमेश्वरसेवा-समर्थः' सर्वभूते प्रेममयः ईश्वर एव विद्यमानः।

स्वामी विवेकानन्द एकाधारेण वेदान्तधर्मप्रतिष्ठाता, करुणावतारः, अतिपण्डितः, गाढस्वदेशप्रेमी, मानवबन्धुश्चासीत्। तदीयं पुण्यजीवनं सर्वदेशेषु सर्वकालेषु चानुशीलनार्हं विद्यते। अन्ते श्रीस्वामिचरण-वन्दनेन विरमामि।

"स्यात्तमःप्रसराच्छन्नं यज्जगद्भेदबुद्धिनः।
सप्रकाशं शान्तिपूर्णं विवेकानन्दवर्त्मना॥
ॐ शान्तिः शान्तिः शान्तिः।

———

मीमांसारत्न-श्री-पं० सुब्रह्मण्यशास्त्रि-मीमांसावेदान्ताचार्य-प्राध्यापक-संस्कृतमहाविद्यालयः, काशी-हिन्दुविश्वविद्यालयः, इत्येतेषां भाषणस्य सारः।

'अस्माकं वीरा उत्तरे भवन्तु।"

सुविदितमेवैतत्समेषां विदुषां चराचरेऽस्मिन्वैरिञ्चे प्रपञ्चे केन-चित् अंशेन भगवान् करुणावरुणालयः भूमण्डलेऽवतीर्य, तात्कालिकीं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थितिं समीक्ष्य, वैदिकं सनातनधर्मम् आध्यात्मिकभावनां च संस्थापयति, भारतीय-जनता-जनार्दनं च धर्मे पथि स्थापयति, दुर्जनानां दुर्भावनां च दूरीकरोतीति, गीताचार्यवचनमप्यमुमेवाऽर्थम् उपोद्बलयति।

यथा—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ इति

तादृशेषु महापुरुषेषु प्रातःस्मरणीयचरितः तत्रभवान् स्वामिविवेकानन्दोऽपि युगाचार्य इत्यत्र नास्ति संशीतिलेशोऽपि। इदं च भारतवर्षस्य पैतृकं धनमिति निश्चप्रचम। यथाहुरभियुक्ताः—

"स्नातं तेन समस्ततीर्थसलिले दत्ता च सर्वावनिः
यज्ञानां च कृतं सहस्रमखिलाः देवाश्च सम्पूजिताः।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्यो ह्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात्।"

अहं च मन्ये उपरि-निर्दिष्टं पद्यम् एतादृशमेव पुरुषधौरेयम् आर्यधुरन्धराणामन्यतमं लक्ष्यीकरोतीति।

यथा सम्पुष्पितस्य वृक्षस्य गन्धः बहुदूरं प्रकर्षेण वाति तथा एवं पुण्यस्य कर्मणः धार्मिकाध्यात्मिकोपदेशरूपः सुगन्धः सर्वत्र प्रसरीसरीति। अयं च करुणामूर्तिः भारतीयप्राचीनसभ्यतायाः संस्कृतेश्च मूर्तिमान् वीरः धीरः निर्भयः क्रान्तिकारी देशभक्तः युगाचार्यः सर्वेष्वपि प्राचीनाचार्येष्वन्यतमः। तस्य प्रसन्नवदनगम्भीरा वाणी अनितरसाधारणवाग्वैभवं सकलजनमनस्समाकर्षताम्।

तस्य समग्रं जीवनमपि समग्राया भारतीयजनतायाः, किं बहुना, जगतीतलवर्तिनां समस्तजनुष्मताम् उपदेशात्मकमेवासीदिति वक्तव्यं नावशिष्यते, तच्चरित्रविमर्शकानां पुरस्तात्। बालानाम्, ब्रह्मचारिणाम्, यूनाम्, गृहस्थानाम्, संन्यासिनां च बहुमूल्याः अमृतस्यन्दिनः उपदेशाः अस्य मुखकमलात्प्रवर्तन्ते स्म। यैर्भारतीयजनतायां नवीना

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जागर्तिः समुत्पादिता। नव्यनानाविधचमत्कृतेः साम्प्रतिके वैज्ञानिके युगे भौतिकवादस्य आध्यात्मिकवादनिरपेक्षस्य नग्नताण्डवरूपदावानलस्य प्रत्यहमुपचीयमानस्यास्यामृतमयोपदेशेन निर्वापणमकारि। तत्रैकैकं विषयमवलम्ब्य महान्निबन्धः बहुभिः व्यलेखि, लिख्यन्ते, लिखिष्यन्ते च। तत्रास्मिन् शुभावहे जयन्तीमहोत्सवे तैः छात्राणां कृते यः उपदेशः प्रादायि तानधिकृत्यात्र लेखनी व्यापार्यते।

छात्राणां कृते उपदेशः

छात्राणां कृते मनस्संस्काराय ब्रह्मचर्यमावश्यकम्। तेन च मनोबलम्, आत्मबलं च लभेरन् छात्राः। एवमेव सद्वदनम्, परोपकारता, दुःखिषु दीनेषु च दया, विनयसम्पत्तिः, आचार्येषु श्रद्धा, प्राचीनेष्वाप्तोपदेशेषु विश्वासः, मितव्ययिता, बाह्याडम्बरेष्वनासक्तता, असूयाराहित्यम्, शान्तिः, विनीतता, सत्कर्मणि आसक्तिः, जनताजनार्दनस्य सेवा, सायंप्रातः भगवद्ध्यानं चेत्यादयः उपदेशाः अन्तेवासिभिर्नूनमवधेयाः।

एतैः उपदेशैः नरः नारायणो भवितुमर्हति। तादृशानां योग्यानां छात्राणां सञ्जीकरणेनैव प्राचीनभारतवर्षस्य गौरवं प्रसृतं भवेदिति। जनन्या जन्मभूमेः मातृभाषायाश्च समादरः सर्वथा कर्तव्य इति। स एव मानवः श्लाघ्यः यस्य मनः द्रवति दीनान् दरिद्रान् दृष्ट्वा, इति।

हे छात्राः! युष्माभिः ईश्वरः सर्वदा स्मर्तव्यः, भवतां जीवनम् ऐहिकानां वैषयिकाणां भोगाय न भवति, किन्तु सर्वेषां दीनानाम् उपकारकरणायेति यूयं न विस्मरध्वम्, धीराः, निर्भयाः 'अहं भारतीयः' इत्यात्मानमभिमन्यध्वम्, समाद्रियध्वं च एते मम सहोदराः, एताश्च मम सहोदर्य इति समादरेण सर्वान्पुरस्कुरुध्वम्। अज्ञः, अगतिकः, यः कोऽपि वा भवतु, स मम सहोदर इति भावयत। भारतीया देवता ममोपास्यदेवताः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

...मानवमात्रं नारायणोऽस्ति। अहं मम च भ्राता एक एव। सर्वेषां देशानां सर्वासां जातीनां च कृते इदं सत्यं समानरूपेण वरीवर्ति, स्वामिमहाभागस्येयं वाणी व्यावहारिकक्षेत्रे दैनिकजीवने प्रयुक्ता सामूहिकैकतायाः सम्पूर्णविश्वभ्रातृत्वस्य बीजं प्रतीयते। अनेनैव मन्त्रेण अयं महाभागः आवि भारतं आजुवाह। भारतस्य जनसाधारणदुर्गतिम् अवलोक्य तदीयं विशालं हृदयम् अत्यन्तं भाराक्रान्तम् अभूत्। अतः कारणात् स भारतभाग्यभूतान् नवयुवकान् गण्संविदं जागरयितुं समाह्वयति स्म। स इदं बोधयामास, भगवान् कुत्राऽन्विष्यते? 'सर्वं खल्विदं ब्रह्म' इति-श्रुतिवचनम्। दरिद्राः, दुःखिनः, दुर्बलाः, अबलाः, घृणिताश्च किं देवाः न संन्ति? प्रथमं तेषामेव पूजनं किं न क्रियते? हे छात्राः, मामकं वचनं कर्णे किञ्चित्कुरुत। मानवेषु प्रतिव्यक्ति ब्रह्मशक्तिर्जागर्ति। नारायणः अनन्तकोटिब्रह्माण्डनायकः, दरिद्रनारायणस्य हृदये स्थितस्सन् अस्माकं सेवां लब्धुमिच्छति। अहं तु एतादृशमेव धर्ममभिलषामि, योऽस्मासु आत्मविश्वासजनने जातीयमर्यादाबोधोद्भावनेऽकिञ्चनसाधारणजनानां क्षुधानिरसने, शिक्षणप्रदाने च समर्थः स्यात्। यदि परमेश्वरं प्राप्तुमोहध्वे तदा जनसेवां कुरुध्वम्। संस्कृतभाषा युष्माभिः अवश्यं अभ्यसनीया। संस्कृतशिक्षया संस्कृत-शब्दानामुच्चारणमात्रेणैव भारतीयजातौ गौरवस्य शक्तेश्च भावः जागृतिमेष्यति।

संस्कृतभाषाभ्यन्तरे सर्वाणि सत्यानि निगूहितानि सन्ति। अतस्तस्या अध्ययनेन प्रत्यहमनुष्ठीयमानधर्मसंस्कृतिशिक्षणेन परिणामः शुभः सम्पत्स्यत इत्यवधारयत। भो भारतभाग्यभूताः छात्रदेवताः, वर्तमानशिक्षापद्धतौ केचन समीचीनाः विषया अवश्यमेव सन्ति, परन्तु तदपेक्षया बहवः हानिकरा दोषाश्च विद्यन्ते। शिक्षाया एतस्याः कुकर्मप्रस्तुतीकरणायैव प्रवृत्तिः। वर्तमानशिक्षापद्धतेः कुफलं सुदूरं प्रसरति। तेन श्रद्धा-विश्वासयोरतितरां लोपस्सञ्जायते। अतः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदमेव शिक्षास्वरूपं भवद्भिस्सर्वैरप्यवधारणीयम्, येन आत्मसाक्षात्कारः स्यात्। यया शिक्षया मनुष्यत्वस्य विकासः, चरित्रस्य निर्माणम्, यया बुद्धिर्विकासमाप्नोति, मनुष्याः स्वावलम्बिनो भवितुं शक्नुयुः, पाश्चात्य-विज्ञानेन सह वेदान्तस्य समन्वयकरणशक्तिर्जायेत, यस्याः शिक्षायाः ब्रह्मचर्यम्, आत्मविश्वासः, श्रद्धा मूलमन्त्राः भवन्ति—इति। अतः इममेव पन्थानं यूयमनुसरतेति। किञ्च भो विद्यार्थिनः! इदं मनसि कुरुध्वम्—'दानमेकं कलौ युगे' इति।

तच्च दानं चतुर्विधम्—धर्मदानम्, विद्यादानम्, प्राणदानम्, अन्नदानञ्चेति। एवं दानधर्मप्रवर्तनेन जनताजनार्दनस्य सेवां कुरुध्वम्। श्रूयते—'मातृदेवो भव' 'पितृदेवो भव' इति, तत्रेदमपि योजयध्वम्—'दरिद्रदेवो भव' 'मूर्खदेवो भव' इति। वर्तमानभारतस्य उद्धरणायेदं युष्माभिरवश्यं मनस्यवधेयम्, मानवजातेराध्यात्मिकभावेन प्रबोधनमेव भारतस्य मूलं जीवनव्रतम्। पशुश्रेणीकानां मनुष्याणां मनुष्यदेवेषु परिणमनम्। अनेनैव भारतवर्षस्य समुन्नतिस्सम्भाव्यते, इदं युष्मास्वेवायतते। अतः 'शिवज्ञानेन जीवसेवा' इति सूत्रं शब्दतः, अर्थतश्च मनसि निधाय नरनारायणसेवां कुरुध्वम्। संकल्पं पठत "जनताजनार्दनस्य सेवां करिष्यामः" इति।

भारतीया देवता ममोपास्यदेवताः, भारतभूरेव मम स्वर्गभूमिः, मोक्षभूमिश्चेति मन्यध्वम्। प्रायशः भारतीयाः बुद्धमारभ्य, ब्रह्मसमाज-स्थापक-राज-पदभूषित-राममोहनरायपर्यन्तं "जातिवादः, मतवादश्च भारतवर्षस्योन्नतौ प्रतिबंधकः" इति मत्वा तस्य विनाशायातितरां प्रयतन्ते स्म। परन्तु स च मतवादः ईश्वरीयः केनाऽपि निरसितुं न शक्यते, अतः जातिवादो मतवादश्च भारतवर्षस्योन्नतये कल्पत इत्ययं स्वामी विवेकानन्दः महानुभावः मन्यते स्म। सर्वत्र स धर्मकर्मसु आध्यात्मज्ञाने च सेवारूपत्वमुपदिदेश। धर्मानुष्ठानम् अन्तःकरणस्य शुद्ध्यै परिकल्पते। तेन च मानसिकः सङ्कोचः अपगच्छति। स्वच्छे मनसि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ईश्वरः स्वयं सन्निधत्ते, अनुगृह्णाति च 'ईश्वरः सर्वभूतानाम्' इति गीता-वचनात्। अतः सर्वेषु जनेषु ईश्वरो निवसति, इति निश्चित्य जनता-जनार्दनस्य सेवा कर्तव्या, तेन चेश्वरः प्रसीदति। जनता पुनः समुन्नतिशिखरं प्राप्स्यति।

अतो युष्माभिः धैर्येणेश्वरभावनया स्वार्थमुत्सृज्य सेवाबुद्ध्या क्रियमाणं कर्म भवतां भारतीयसमाजस्य समग्रस्यापि देशस्य समुन्नतये भविष्यतीत्यमृतमयैः उपदेशैः सर्वाञ्छात्रानन्वग्रहीषुः।

मन्येऽस्य जयन्तीमहोत्सवस्येदमेव फलम्, अत्रोपस्थिताः सर्वे छात्राः तदुपदिष्टमार्गमवलम्ब्य, ब्रह्मचर्यपरिपालनपुरस्सरं 'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्', इति न्यायेन विद्यामधीत्य सेवाबुद्ध्या यदि कर्म कुर्युः तदैव एतस्या जयन्त्याः सार्थकता।

अतः अयं परमहंसपरिव्राजकाचार्यवर्यः महानुभावः वैदिकधर्म-प्रवर्तनेन अध्यात्मोपदेशेन चाभूतपूर्वां विचित्रां काञ्चन जागृतिम-वनीतलेऽस्मिन् सञ्चारयामासेति सर्वथा पूजार्होऽयम्महानुभावः।

अन्ते चायमेवोपदेशः महाभागस्य छात्राणां कृते—

'शिवं प्रजायै, शिवमस्तु मह्यम्, सभेयो युवास्य यजमानस्य वीरो जायताम्, युवा स्यात्साधु युवाध्यायकः, आशिष्ठो द्रढिष्ठो बलिष्ठः।
उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत' इति।

—*o*—

काशी-हिन्दुविश्वविद्यालयस्य कुलपतयः जस्टिस् श्री एन. एच. भगवतीमहोदया इत्येतेषां भाषणस्य सारः।

अत्र समुपस्थिता गिर्वाण-वाणी-निपुणा विद्वांसः सज्जनाः सुनार्यश्च!

विषयः—वेदान्तधर्मप्रतिष्ठाता युगाचार्य-विवेकानन्दः।

परममान्यस्य श्रीमतो विवेकानन्दस्वामिनः चतुरधिकशततमजन्म-महोत्सवं समुपलक्ष्य कश्चन स्मारकाख्यः निबन्धः प्रकाशयितुमिष्ट इति महतः सन्तोषस्य विषयः। चिरन्तनकालादारभ्य उपनिषदादिभिः प्रति-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पादितो वेदान्तधर्मः जगतीतलवर्तिनां सर्वेषां मानवानां हृदयंगमया शैल्या विवेकानन्दस्वामिना सर्वत्र प्रचारितो वेदान्तधर्मः निखिले प्रपञ्चे एकैकोऽपि जनसमुदाय एकैकं राष्ट्रं प्रत्येकं मतं च मनुष्येऽव्यक्ततया वर्तमानस्य सर्वशक्तिमत्तत्त्वस्य अभ्युपगममाधारीकुर्यात्। जीवनस्य परमार्थ-निष्ठतां परममुद्देश्यमनुसृत्य सर्वेषां मानवानां हितानि संपादनीयानि इति वेदान्तधर्मसारः। 'एकं सद्विप्रा बहुधा वदन्ति' 'एको देवः सर्वभूतेषु गूढः' इत्यादि-वेदवाक्यानि वेदान्तधर्ममूलभूतानि। चिकागोनगरे प्रवृत्तायां सर्वमतस्य प्रतिनिधिसभायां भाषणारम्भे 'अमेरिका-निवासिनो भ्रातरो भगिन्यश्च' इति संबोधनमात्रेणैव अध्यात्मैक्यं वेदान्तसारसर्वस्वं सूचयन् सर्वेषां सभ्यानां मनांसि श्रीविवेकानन्दस्वामी विद्युद्वेगेनावर्जयामासेति प्रसिद्धम्। वेदान्तधर्मस्य स्फुटावगमाय पुराणादिषु बहूनां महात्मनां चरितानि वर्णितानि परमार्थनिष्ठादूराणां शैवशाक्तादीनां मतानाम् अन्यथाभावायथार्थरूप-प्रसारेण कलुषीकृते वेदान्तधर्मे श्रीशंकराचार्यः प्रादुर्भूय वेदान्तधर्ममेव पुनः प्रचारयामास। ततः सहस्राधिकसंवत्सरानन्तरं समवतीर्णः विवेकानन्दस्वामी तमेव धर्मं पुनरुज्जीवयामास। यत् हिन्दूनां ब्रह्म, यो जरथुस्त्रमतानुवर्तिनामहुरमज्द, बौद्धानां बुद्धः, यहूदीनां जिहोवा, क्रैस्तानां स्वर्गस्थः पिता, स एकः भवतां शक्तिं ददातु। एकैकोऽपि इतरमतस्य तत्त्वांशं संगृह्णातु। स्वयं पृथक्त्वं रक्षन् वृद्धिनियमानुसारं वर्धताम्। पवित्रता, शुद्धिः, जितेन्द्रियता च नैकस्य मतस्य साधारणं स्वम्। एकैकस्मिन्नपि मते परमोच्चगुणभरिताः पुमांसः स्त्रियश्च संजाताः। मतानि न परस्परमुपरोधं कुर्युः, सहायकरणमनुपरोधस्य परिवर्धनमविनाशकसामरस्यं, शान्तिः, अवैमत्यं च सर्वधर्मीयध्वजेषु अंकितानि भवेयुः इति सुस्वरमुद्घोषितं विवेकानन्दस्वामिना।

धर्मस्तावन्न शब्दमात्रम् संप्रदायविशेषो वा, अपि तु तत्त्वसाक्षात्कारफलः मार्गविशेषः। 'आत्मा वा अरे द्रष्टव्यः' इति श्रुतिरपि तत्त्वसाक्षात्कारमेव परमोद्देश्यं वदति। कर्मयोगः, भक्तियोगः राजयोगः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्ञानयोग इति चत्वारि यथा योगसाधनानि। न केनापि कर्म त्यक्तुं शक्यम्, अतः परमोद्देश्यानुगुणं कर्म कर्तव्यम्। अविश्रान्तं कर्म कुरु। अहंतां ममतां च त्यज। यदि कर्मफलमभिलषसि शिक्षामप्यङ्गीकुरु। यदि शिक्षाया दूरीकारमिच्छसि तर्हि फलाभिलाषं त्यज। एवं तत्र परं न साधनम्। इदमेव कर्ममार्गसर्वस्वम्। आत्मनि प्रेम सर्वस्य प्राणिनः सहजः स्वभावः, तेनैव प्रेम्णा सर्वप्राणिषु भगवद्दर्शनं भक्तियोगः। यदि सर्वत्र भगवद्दृष्टिः न शक्यते कर्तुं तर्हि यद् भवतोऽत्यन्तमिष्टं तत्र भगवन्तं पश्य। तत्र दृष्टिः यदि दृढा ततोऽन्यत्रापि तां कुरु; एवं क्रमेण सर्वत्र भगवद्दृष्टिं कर्तुं शक्नोषि। अशक्तैः भगवति परमं प्रेम न लभ्यते। अतः कायेन मनसा शीलेन च बलवद्भिः भाव्यम्। प्रेमैव लोके सर्वेषां संयोजकं चालकञ्च, यदन्तरेण प्रपञ्चो विशकलितो भवेत्। निरुपाधिकं परमं प्रेमैव भगवतः स्वरूपम्। भगवता पतञ्जलिना योगसूत्रेषु राजयोगः स्पष्टीकृतः। यमनियमाद्यष्टांगयुक्तोऽयं न सुलभः सुसाध्यश्च। ज्ञानयोगस्तु तत्त्वसाक्षात्कारः। विवेकशालिना मनसा सुनिपुणं गवेषणे चिरं क्रियमाणे सति अन्ते सर्वस्यान्तर्जीवभूत-सर्वसाररूपस्य तत्त्वे पारमार्थिके ऐक्ये पर्यवसानं भवति। सर्वस्यापि मानवस्यैतत्प्राप्तौ यत्नेऽधिकारोऽस्ति। ऐक्यदृष्ट्या बोधकथा विवेकानन्दस्वामिना प्रोक्ता। वेदान्तेन सर्वत्र ब्रह्मदर्शनमुपदिष्टम्। 'ब्रह्माहमस्मि' इति स्वयमनुभूय सर्वत्रापि तदेव व्यापकं तत्त्वमनुस्यूतमिति अपरोक्षानुभूतिरेव वेदान्तरहस्यम्। 'सर्वेष्वपि प्राणिषु ईश्वरबुद्धिपूर्वकं जीवसेवा कर्तव्या' इयमेव यथार्थतः ईश्वराभ्यर्चना। एवं जनताजनार्दनं पूजयित्वा सर्वत्र साम्यमैत्री-भ्रातृभावानां प्रचारः कर्तव्य इत्यपि स्वामिनः उपदेशः। 'ईश्वर-बुद्ध्या जीवसेवा' इत्यस्मादधिकमुन्नततरं वेदान्तस्य तत्त्वं न विद्यते।

कश्चित्प्रेयान्प्रेयसीगृहं जगाम, द्वारं पिहितमासीत्। आघातं चकार। द्वारमनुद्घाट्यैव प्रेयसी कस्त्वमिति पप्रच्छ। अहमित्युत्तर-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यामास प्रेयान्, नोद्घाटितवती द्वारम्। एवं पुनरपि प्रश्नः उत्तरं च बभूवतुः। तृतीयवारं कस्त्वमिति प्रश्ने प्रेयान् त्वमेवाहमित्युत्तरितवान्। द्वारमुद्घाटयामास प्रेयसी! एवं सर्वत्र परमप्रेम्णा अभेददृष्टिव्यवहारोऽपि शान्तिं सुखं च ददाति। एतादृश-सुखशान्ति-लाभार्थं 'तत्त्वमसि' इति महावाक्यस्य व्यावहारिकक्षेत्रे स्पष्टीकरणार्थं स्वामिना इदमेवोदाहरणं दत्तमासीत्।

बुभुक्षूणां प्राणिनां शरीरपोषणायान्नदानं कार्यम्। विवेकवृद्धये विद्यादानं कर्तव्यम्। आध्यात्मिकतत्त्वज्ञानसम्पत्तये ज्ञानमपि देयम्। सर्वत्र भगवद्दृष्ट्या सर्वेषां हितावहं कार्यमाचरेत्। अन्ते च तत्त्वं साक्षात्कृत्य कृतार्थो भवेत्। एष सर्वहितकारी पन्था युगाचार्यविवेकानन्दस्वामिना प्रदर्शित इति।

—*०*—

विवेकानन्द-संस्कृत-विद्वद्गोष्ठी-प्रसङ्ग-समाप्त्यवसरे साहित्याचार्य-एम० ए० पं० टी० ए० भंडारकर इत्येतैः प्रदत्त-काव्यमय-धन्यवाद-प्रकाशनस्य सारः।

प्राची तु विस्मृत-निजात्ममय-स्वरूपा
रूपादिबाह्यविषयैकपरा प्रतीची।
इत्थं विलोक्य तमसावृतशुद्धभावां
भावप्रभावमलिनां कलिना धरित्रीम् ॥१॥

संस्थाप्य निर्मलमतिं नवभिक्षुसंघं
निःस्वार्थभावमिह धर्मसमन्वयार्थम्।
सेवा नरस्य परमा परमेश्वरस्य
सेवेति सिद्धमकरोत् स यतिर्विवेकः ॥२॥

श्रुतवन्तोऽत्र विदुषां
वाणीं पीयूषवर्षिणीम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ममापि श्रूयतां किञ्चि-
दाभारस्य प्रदर्शनम् ॥३॥
यैरन्तरायसम्पूर्णे निजकर्तव्यसागरे।
पारं नीता न्यायविद्भिर्विश्वविद्यालयस्य नौः ॥४॥
तान् काशी - विश्वविद्यासन्मदिरोपकुलाधिपान्।
विहाय केऽत्र युक्ताः स्युरध्यक्षपदवीपदे ॥५॥
चन्द्रोज्ज्वल-प्रकाशानां रामचन्द्राख्य-शास्त्रिणाम्।
महाविद्यालयेशानां भाषणं भूषणं महत् ॥६॥
सुब्रह्मण्येति विदुषां वचोमाधुर्यमीदृशम्।
पायं पायं यदद्यापि न हि विस्मर्यते रसः ॥७॥
अपूर्वानन्द-सन्दोह - दायिनीयं शुभा सभा।
यदाभूषणतामेति मान्या पण्डित - मण्डली। ८॥
रामकृष्णाश्रमाध्यक्ष-महोदय-कृते कृतम्।
आभारावेदनं तस्या अहोभाग्य - मिद मम ॥६॥
विवेकानन्द - सम्पूज्य-स्वामिनां प्रेरणावशात्।
संस्कृतस्य प्रचारेऽसावाश्रमोऽविरतं रतः ॥१०॥
एतादृश - सभागोष्ठी लेख - व्याख्यानयोजनैः।
प्रति संवत्सरं तज्ज्ञा आहूयन्ते विपश्चितः ॥११॥
सर्वानेतान्प्रतीदानीं माननीयान्मनीषिणः।
हार्दाभारप्रकाशेन धन्यान्मन्यामहे स्वयम् ॥१२॥
ऐतिहासिक - कालात्प्रागप्यस्मिन्भूमिमण्डले।
आश्रमाः स्थापिता आसन्नार्यधर्मोपदेशकैः ॥१३॥
एतेभ्यो धर्मकेन्द्रेभ्यः पृथिव्यां सर्वमानवाः।
स्वं स्वं धर्ममशिक्षन्त मनुनापीदमीरितम् ॥१४॥
प्रियदर्शिप्रेषितैः किं शान्तिसंदेशवाहकैः।
न धर्मः शिक्षितः सद्भिः प्राक्प्रत्यग्देशवासिषु ? ॥१५॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदैवैतद्धर्मकार्यमार्यैः संकोचिद्दृष्टिभिः ।
परित्यक्तं तदैवासीदाक्रान्तं भारतं परैः ॥१६॥

घोर-घोरी - समाक्रान्तं किमर्थं भारतं पुरा ।
तुग्लग्लोदोमोगलैश्च साम्राज्यं स्थापितं कथम् ॥१७॥

सोमनाथोऽप्यनाथोऽभूद् गझनीपार्थिवाऽऽहतः ।
चेंगीजतैमुरादीनामागमे किं च कारणम् ? ॥१८॥

विवेकानन्द - सन्दिष्टाध्वना निःस्वार्थभिक्षुभिः ।
पुनश्च तत्परैर्भाव्यं धर्मप्रसृतये क्षितौ ॥१९॥

द्वैतं जापानशिन्तोः सुगतमतमतो दुःखनाशः सशून्यो
जैनानां केवलित्वं गगनगतपिता ख्रैस्तलोकस्य पूज्यः ।
कौराणोऽल्ला दयार्द्रोऽप्यहुर इति महाझेन्दगाश्चीनतावो
सर्वं वेदान्तधर्मे यदि भवति पुनः कोऽन्यधर्मावकाशः ? ॥२०॥

सच्चिज्जीवेशसेवा, गुणित्रिगुणि - पुनर्द्वैतमद्वैतमेशं
रूपं मार्गानुरूपं विविधमभिदधद्भ्रातृता मानवानाम् ।
सामञ्जस्यं समेषामनिशमिह पथां शान्तिसौख्यस्वरूपः
सत्याहिंसाप्रधानो जगति विजयते विश्ववेदान्तधर्मः ॥२१॥

सर्वधर्मप्रसूरेष. वेदान्तः स्वामिसम्मतः ।
रामकृष्णः स्वयं यस्य विग्रहो मूर्तिमानिव ॥२२॥

सम्मेलनैर्विबुधमण्डलमण्डनाङ्कै-
रेतादृशैरनिशमाहितदिव्यशोभैः ।
वृद्धिं प्रयातु महतीं सुरभारतीयं
यावत्सुधाकर-विभाकर-भासिता भूः ॥२३॥

करौ पुनः समानीय माननीयानयं जनः ।
वन्दतेऽत्र सभाशोभावर्धकान्परमादरात् ॥२४॥

—ॐ तत्सत्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परिशिष्टम्

सनातन-हिन्दुधर्मविषये स्वामि-विवेकानन्द-वाणी-रचनावल्याः संकलितानि कानिचिद्वचनानि—

१ "यूयं दिव्याः" इति स्वबालकान् शिक्षयत। धर्मस्तु विधिस्वरूपः कोऽपि, न निषेधात्मकं मौर्ख्यम्। न स पारतन्त्र्ये दुःखानुभव-स्वरूपः, अपि तु व्यापकः आत्मस्वरूपाविष्कारः (व्यापिका आत्म-स्वरूपाविष्कृतिः)।

२ हिन्दुधर्मः न मतविशेषे विश्वासात्मकः, द्वन्द्व-संघर्षरूपो वा, अपि तु साक्षादनुभवात्मकः। एवम् आत्मनो दिव्यस्वरूपानुभूतिः, स्वपूर्णताप्रकाशः, ईश्वरलाभः, ईश्वरदर्शनम्, ईश्वरतुल्यपूर्णतानु-भवो वा हिन्दुधर्मः।

३ "धर्मो न केवलं पुरातन-महानुभावानुभववर्णनात्मकः, अपि तु साक्षात्तादृशानुभव-स्वरूपः। एतादृशानुभवयुक्तो मनुष्य एव धार्मिकः" इति योगशास्त्राचार्या मन्यन्ते। यदि ईश्वरो नाम विद्यते कश्चित् स द्रष्टव्य एव, यदि आत्मापि नाम विद्यते भवतु सोऽपि अनुभवविषयः। अन्यथा अस्मिन्विषये केवलं श्रद्धा निष्फला।

४ अस्ति कोऽप्यनादिरात्मा ? ईश्वरोऽपि विद्यते न वा ? सम्पूर्ण-विश्वस्य संचालिका सर्वातिशायिनी शक्तिरस्ति न वा ? एतादृशाः प्रश्नाः न कदापि केवलं तर्कसहायेन समाधेयाः।

५ यावज्जीवनं वावदूकानां तर्कप्रसितानां वास्माकं सत्यस्यांशतोऽपि ज्ञानमसम्भवम्। साक्षादनुभवं विना केवल-भैषज्य-शास्त्रग्रन्थानां पुरः स्थापनेन न कोऽपि चिकित्सको भवितुमर्हति। देशदर्शनो-त्कण्ठा तत्तद्देशमानचित्रदर्शनेन न शाम्यति, अपि तु प्रत्यक्षदेश-दर्शनेन। मानचित्राणि देशदर्शनोत्कण्ठावर्धकानि। एतस्मा-दधिको न तेषामुपयोगः।

६ साक्षादनुभव एव धर्मः। अन्यदखिलव्याख्यानश्रवणं, ग्रन्था-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ध्ययनं, तर्कसमाश्रयो वा, न धर्मः। एतानि योग्यतालाभार्थं साधनानि केवलम्। बौद्धिकारोहावरोहौ न धर्मलक्षणम्।

७ यथा इन्द्रियज्ञानमिन्द्रियसंयोगजन्यं तथा धर्मतत्त्वज्ञानमपि बलवदान्तरिकेन्द्रियाधीनम् इति योगिनो मन्यन्ते। ईश्वरात्मस्वरूपज्ञानात्मको धर्मः न बाह्येन्द्रियसंयोग ज्ञानविषयः। तर्कपद्धतिस्तु न कदापि निर्णयमवगाहते। यावज्जीवं तर्कप्रसक्ता अपि वयं धार्मिकतत्त्वस्य सिद्धये तत्खण्डनाय च न समर्थाः। अनुभवात्मकं लक्ष्यं तु इन्द्रियजन्यज्ञानादतिदूरमेव।

८ मनुजः साक्षादिन्द्रियजन्यज्ञानं तर्कजन्यज्ञानं वाऽतिशेते। मानवे काचिदलौकिकी शक्तिः बुद्धिबलमपि अतिक्रामति। सा शक्तिस्तु सर्वेष्वपि जीवेषु विद्यते। एतादृशी शक्तिर्योगाभ्यासेन समुत्पद्यते; ततश्च मनुजः साधारण-तर्कमर्यादां समुल्लंघ्य अलौकिकवस्तुज्ञानलाभसमर्थो भवति।

९ सम्प्रदायविशेषो मतविशेषविश्वासो वा न धर्मः। ग्रन्थानामध्ययनं सम्प्रदायविशेषे श्रद्धा वा न महत्त्वपूर्णा, अपि तु प्रत्यक्षानुभवमात्रम्।

१० जीवात्मनि ईश्वरज्ञान-(कूटस्थज्ञान)-मेव सर्वधर्माणामन्तिमं साध्यम्। तत्तु अखिलग्रन्थेभ्यः तथा सर्वसम्प्रदायेभ्योऽपि परम्। अयमेव स्वात्मनि ईश्वरसाक्षात्कारः।

११ मनुष्यः सर्वेष्वपि जगति विद्यमानेषु धर्मेषु विश्वसितु, स अद्य यावल्लिखितान् सर्वानपि धर्मग्रन्थान् कण्ठगतान्करोतु, भूतले विद्यमानासु सर्वास्वपि नदीषु स्नात्वाऽऽत्मानं पुनातु (अघमर्षणं करोतु) वा, परं ईश्वरसाक्षात्कारं विना स नास्तिकतम एव इति मन्ये। अथ च यदि कश्चिच्चैत्यमन्दिरादि-प्रवेशं विनापि, संस्कारविशेष-विधानं विनापि वा स्वान्तःस्थितमीश्वरमनुभवेत्तेन च स्वात्मानं संसारासारतया उपरि स्थापयेत्, एतादृशो मनुष्यः साधुः सत्पुरुषः इत्यभिधानमर्हति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१२ "धर्मो, न चक्षुषा, न कर्णाभ्यां, नापि बुद्ध्याधिगम्यते। धर्मग्रन्था नास्मान्धार्मिकान्विदधति। जगति विद्यमानानां सर्वेषामपि धर्म-ग्रन्थानामध्ययनेनापि न वयं धर्मज्ञानमीश्वरज्ञानं वा लब्धुमर्हाः। जीवनपर्यन्तं विवदमानानामप्यस्माकं न किञ्चिद्धर्मज्ञानसम्भवः। अधिगतसर्वश्रेष्ठबुद्धिवैभवा अपि वयं ईश्वरविषयकज्ञानेऽयोग्या एव स्याम।

१३ "धर्मः केवलं निःसारशब्दानां वावदूकत्वम्" इति केचिद्वदन्ति, केचित्तु "धर्म सिद्धान्तविशेषाणां सम्प्रदायः" इति भाषन्ते, अपरे तु "धर्मोपदेशकानामुपदेशवचःसु विश्वास एव धर्मः" इत्यभि-दधति; अन्ये तु "अस्माकं पुर्वपुरुषैर्यस्मिन्मार्गविशेषे विश्वासः कृतः स एव धर्मः" इति मन्यन्ते, इतरे तु राष्ट्रिय-अन्धविश्वास-पर-म्पराश्लेष एव 'धर्मः' इति वदन्ति। सर्वानप्येतान्वावदूकान्वय-मतिक्रमितुमर्हामः।

१४ धर्मस्तु सत्यवस्तुस्वरूपो न तु केवलं वचनात्मकः। आत्मविश्ले-षणं कृत्वा तत्र किं तत्त्वमिति विचारणीयम्। तादृशतत्त्वस्य बोध आवश्यकः। कियदवधिश्चायं बोधो जात इत्यपि विचार्यम्। केवलं वचनसम्भारो धर्मनिर्माणं कर्तुं नालम्।

१५ धर्मस्योपरि आक्रमणकारिपु बहव एव मनुष्याः स्वमनोविश्लेषणं न कुर्वन्ति। न वा सत्यवस्तुज्ञाने प्रयत्नशीला भवन्ति। एतेषां धर्मविरोधप्रमाणं तथैवाकिञ्चित्करं यथा कस्यापि जन्मान्धस्य "सूर्यस्यास्तित्वे विश्वासपराः सर्वेऽपि मूर्खाः" इति वचनं न प्रमाणम्।

१६ धर्मः खलु अतीन्द्रियभूमिकामवलम्बते, न तु इन्द्रियाणां क्षेत्रम्। धर्मस्तर्कमर्यादामप्यतिशेते, अत एव स बुद्धिक्षेत्राद्बाह्यः। धर्मः दिव्यदर्शनरूपः, दिव्यप्रेरणामयः, कस्मिन्नपि अज्ञाते अज्ञातव्ये

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च तत्त्वे निमज्जनम्। स अज्ञेयं तत्त्वं अधिकाधिकं ज्ञातं कर्तुमलम्; यदयं नित्याज्ञेयस्वरूपः।

१७ धर्मो न ग्रन्थेषु, न कल्पनासु, न मतेषु, नापि वचःसु, नापि तर्केषु विद्यते, अपि तु अस्तित्वे तन्मयीभावे च। हे सुहृत्तमाः, यावत्कालं भवन्तः ऋषिस्वरूपाः आध्यात्मिक-सत्तात्वदर्शन-समर्थाश्च न भवथ तावत्कालपर्यंतं भवत्कृते न धर्मारम्भसम्भवः। यावच्च इन्द्रियातीततत्त्वस्य द्वारं नोद्घाट्यते तावत् धर्मः केवलवचनमात्रं केवलमुद्योगमात्रम्।

१८ ये स्वकीयां महतीमाकर्षणशक्तिं जगति प्रवेशयन्ति, येषामात्मबलं शतशः सहस्रशो वा जनेषु प्रेरणादानतत्परं विद्यते, येषां च जीवनं अन्यानात्मप्रकाशपूर्णान् करोति—एतादृशा जगच्चालका जनास्तादृशाध्यात्मिकशक्तियुक्ताः सन्तीति दृश्यते, तेषामियं प्रेरणाशक्तिर्धर्मादुत्पद्यते।

१९ धर्मानुशीलनमत्यन्तमावश्यकमिति मन्ये। मानवहृदयेषु प्रेरणासञ्चारार्थमिदं धर्मानुशीलनं महत्तमा शक्तिः। न कोऽपि अन्यं आदर्शोऽस्मासु चेतनाशक्तिसञ्चयसञ्चारं कर्तुमलं यथायमाध्यात्मिकादर्शः।

२० अयमाध्यात्मिकादर्शोऽस्मभ्यं सर्वश्रेष्ठमानन्दं वितरति— यथा यथा समाजस्याधोगतिस्तथा तथा इन्द्रियजन्यसुखमेव उच्चतमं प्रतिभाति। सारमेयादन्यो वृकादन्यो वा स्वभोजनमात्यन्तिकसुखभावनयानुभवति।

२१ केवलं मन्दिर-प्रवेशः, भालप्रदेशे तिलकादि-लक्ष्मधारणम्, वेशविन्यासविशेषो वा न धर्मः। स्वशरीरमिन्द्रधनुषि विद्यमानैः सर्वैरपि वर्णैरलंकरोतु भवान्, परं यदि तवेश्वरसाक्षात्कारो न जातः सर्वं तवालङ्करणं निष्फलम्। एतदर्थं तु हृन्मन्दिरद्वारोद्घाटनमावश्यकम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२२ धर्मो ग्रन्थेषु, बौद्धिकविश्वासे तर्केषु वा न विद्यते। तर्कपद्धतिः, कल्पनाः, प्रतिज्ञालेखाः, मतमतान्तराणि, ग्रन्थाः, धार्मिकसंस्कारा वा धर्मसाधनस्वरूपाणि, धर्मस्तु केवलमनुभवात्मकः।

२३ योऽस्मभ्यं अनाद्यनन्तस्य अपरिवर्तनशीलस्य ज्ञानं ददाति स एव धर्मः। एतादृशो धर्मो मनुष्यमात्रस्य कृतेऽस्ति। योऽतीन्द्रियसत्यमनुभवति, यः स्वान्तःस्थितमात्मानमनुभवति, यः सर्वत्र आत्मसाक्षात्कारं करोति, सर्वत्रैवेश्वरदर्शनं करोति स एव धर्मज्ञः। यदा भवान् ऋषिस्वरूपो भवति तदैव तव धार्मिकजीवनमारभते, तत्पूर्वं सर्वं साधनमात्रम्।

२४ मानवस्तावदीश्वरं जानीयात्, अनुभवेत् पश्येच्च। अयमेव धर्मः। सर्वेऽपि प्राचीनग्रन्थाः शास्त्राणि च साक्षादनुभवयुक्तैर्महर्षिभिः प्रणीतानि। अस्मिन्नेव जन्मनि एतादृशज्ञानलाभः सम्भवः, तथा सर्वोऽपि तं प्राप्तुमर्हति। एतादृशानुभवशक्तेरुत्थानमेव धर्मस्य प्रारम्भः—इति मन्ये।

२५ धर्मस्तु अनुभवात्मकः। सञ्जातानुभवमेव भवन्तमीश्वरपूजकं मन्ये। तत्पूर्वं, सर्वं वर्णविन्यासमात्रम्। इयमनुभवशक्तिरेव धर्म इत्युच्यते। कियन्तोऽपि धार्मिकोपदेशा दर्शनतत्त्वानि वा भवतां मस्तिष्के प्रवेशितानि रचनात्मकानुभवं विना फलदायकानि न भवेयुः।

२६ 'मानवो न कदाप्यसत्यात्सत्यमधिगच्छति, अपि तु एकस्मादवरात् सत्यादपरं उच्चतरं सत्यं प्रयाति' इति हिन्दूनां विश्वासः। तन्मतेन भूतप्रेतादिपूजास्वरूपान्निम्नतमादुच्चतमब्रह्मोपासनापर्यन्तं सर्वेऽप्युपायाः अनाद्यनन्तं (सत्यं) अधिगन्तुं ज्ञातुं च जीवात्मनामवस्थानुसारं विविधप्रयत्नस्वरूपाः सन्ति। एतेषु प्रत्येकोऽपि मार्गं उत्तरोत्तरमुन्नतिं दर्शयति। जीवात्मा तु नवजातगरुत्मानिव अधिकाधिकमुच्चैर्गच्छन् बलवत्तरतां च लभमानः (क्रमशः) भास्वरं भास्करमुपैति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

२७ जीवात्मसु विद्यमानस्येश्वरस्य साक्षात्कार एव सर्वेषामपि धर्माणामन्तिमं लक्ष्यम्। एतादृशसाक्षात्कार एव सर्व-धर्मेषु विद्यमान-सर्व-सामान्य-व्यापकं सत्यम्। आदर्शकल्पनास्तथोपायस्वरूपा मार्गा भिद्यन्तु नाम, परमेतदेव सर्वत्र केन्द्रीभूतं तथ्यम्। भवन्तु नाम (वृत्तस्य) सहस्रशो भिन्नास्त्रिज्याः, परन्तु सर्वा अपि ता एकमेव केन्द्रं समापतन्ति; इदमेव केन्द्रमीश्वर-साक्षात्कार-स्वरूपम्। तत् खलु इन्द्रियविषयीभूताज्जगतो 'यावज्जीवेत्सुखं जीवेत्' इत्यादि-बालिश-वचनेभ्योऽसदाभास-स्वार्थपरिपूरितायाः सृष्टेः अतिदूरं वर्तते।

२८ ईश्वरेण सह सायुज्यमेव विश्वमानवतायाः सर्वेषां धर्माणां वा अन्तिमं लक्ष्यम्। अयमेव मानवप्रकृतिस्वरूपया दिव्यतया सह तादात्म्यभावः।

२९ ईश्वर-साक्षात्कृतिरेव निखिलधर्माणामन्तिमसाध्यम्। यद्यपि धर्मग्रन्था आपाततो विविधविरोधिविधानपरा दृश्यन्ते, तथापि सर्वेऽपि ते एकमेव सत्यं प्रकाशयन्ति; यतस्तेष्वखिलेष्वपि अद्वितीयस्य अनाद्यनन्ततत्त्वस्यैव वर्णनं विद्यते।

३० विविधधर्मग्रन्थाः विश्वप्रेम-स्वातन्त्र्य-शौर्य-निःस्वार्थ-परोपकार-रूपादर्शानामधिगमार्थं विभिन्नस्वरूपान् मार्गानुपदिशन्ति।

३१ यानि आधारस्वरूपाणि तत्त्वानि अस्मद्धर्मः शिक्षयति तान्येव अपरेऽपि धर्मा उपदिशन्ति। एतादृशधर्मोपदेशो भारतीयारण्येषु दीयेत ख्रिस्तजगति वा दत्तो भवेत्, सर्वेषामपि धर्माणां मूलतत्त्वमेकमेव।

३२ प्रतीकरूपाणि ईश्वरनामधेयानि जगतीतले सर्वत्र उच्चैः क्रियन्ते पूज्यन्ते च। ज्ञानतोऽज्ञानतो वा मानवाः प्रतीकभूतानामीश्वर-नाम्नां महिमानं ज्ञातवन्तः।

३३ प्रायः सर्वेष्वपि धर्मेषु त्रीणि प्रधानतत्त्वानि विद्यन्ते यानि वयमी-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्वरपूजार्थमुपयुक्तमः—प्रतीकानि, नामानि, अवतारिपुरुषाश्च ।

३४ सर्वेषामपि धर्माणामियं महत्त्वपूर्णा उक्तिः यत् मानवमानसं कदापि क्षणेन केवलमिन्द्रियावच्छिन्नतां अपि तु तर्कमर्यादामप्यतिवर्तते । तदा तत् मानसं इन्द्रियाविषयीभूतस्य तर्कातीतस्य च सद्वस्तुनः साक्षात्कारं कुरुते । एतादृशोऽनुभव एव जगति सर्वधर्माणामाधारभूतः ।

३५ 'अस्मदभ्यन्तरे कापि एकता विद्यते' अयं तु सर्वैरपि धर्मैरङ्गीकृतः सिद्धान्तः । दिव्यतेजसा सहास्माकमैक्यमिति यावत् । अस्मिन् विषये नाधिका प्रगतिः शक्या ।

३६ जगति प्रचलिताः सर्वेऽपि प्रधानधर्मा "ईश्वरवचांसि वा अलौकिकमहापुरुषाणामुक्त्या इति वा मत्वा तत्तद्धर्मग्रन्थेषु श्रद्धां कुर्वन्ति । एते ग्रन्था एव तत्तद्धर्माणामाधारस्वरूपाः सन्तिः ।

३७ विविधाधर्मग्रन्थाः विश्वप्रेम-स्वातन्त्र्य-वीरता-निःस्वार्थसेवारूपानादर्शानधिगन्तुमुपायस्वरूपाः सन्ति । प्रत्येकसम्प्रदायः प्रायः अपरेण सह पुण्यपापविषये मतभेदं दर्शयति, तथा प्रधानलक्ष्यं विहाय पुण्याधिगम-पापनिवारणमार्गार्थं कलहायमानो दृश्यते ।

३८ अन्यसाध्यापेक्षया ईश्वररूपलक्ष्यार्थमेव अधिको रक्तपातोऽजायत; यतः मानवा न कदापि मूलस्रोतोऽन्वेषणे रताः । ते केवलं स्व-पूर्वजानामाचारविचारान्प्रति बाह्यविश्वासं प्रदर्शयन्ति, अपरेऽपि तथैव कुर्युरिति प्रतिपादयन्ति च ।

३९ धर्मविषये विवदमानौ कावपि प्रष्टव्यौ—अपि त्वया साक्षात्कृत ईश्वरः ? अपि त्वया प्रत्यक्षीकृतानि एतानि वस्तूनि ? तयोरेकोऽभिदध्यात् "ख्रिस्तं विहाय नास्त्यन्यः कोऽपि सत्पथप्रदर्शकः" इति । परं स यदि पुनः पर्यनुयुज्यते—दृष्टस्त्वया स ख्रिस्तः ? तव जनकेन वा दृग्गोचरीकृतः ? स किल वदेत्— 'न हि न हि" ।

"तर्हि तव पितामहेनावलोकितः किम् ?"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"तेनापि नावलोकितपूर्वः" ।

तर्हि किमर्थमयं वृथा कलहो भद्रमुख ! ?

पिटकस्थानि सर्वाण्यपि फलानि गर्ते पतितानि । केवलं पिटकार्थमेप कलहो व्यर्थ एव !!

४० सर्वानपि एकमतावलम्बिनः कर्तुं न शक्यते । यथार्थमेतत्, यदर्थं परमेश्वर एव धन्यवादार्हः । एतादृशो मतभेद एव मानवान् विचारशीलान् विधातुं शक्नोति । वयं चेत्समानविचारास्तर्हि चित्रवस्तुसंग्रहालयस्थमिस्रदेशीय-सुरक्षित-मृतशरीरा इव शून्यदृशा परस्परमुखावलोकनपरा जायेमहि ! नाधिकं किञ्चित् ।

४१ विविधा धर्मा ईश्वरीयेऽर्थशास्त्रे मानवकल्याणे रता विभिन्नाः शक्तयः खलु इति मन्ये । एतासु शक्तिषु मध्ये नैकापि विनाशशीला (विलुप्ता) भवितुमर्हति । यथा यूयं कामपि प्राकृतिकशक्तिं न न शयितुं शक्नुथ तथैव न कोऽपि किमपि धर्मरूपाध्यात्मिकबलं नाशयितुमलम् ।

४२ यथा यथा सम्प्रदाया भिद्यन्ते तथा तथा मानवानां धर्मलाभस्याधिको योगः (सम्भवः)। विविध-भोज्यवस्तु-परिपूर्णे भोजनालये प्रत्येकमनुष्यस्यापि रुच्यनुसारं क्षुधाशान्तिसम्भवः । अतः सर्वेष्वपि देशेषु सम्प्रदायां वर्धन्तामित्यभिलषामि, येन जना अधिकाधिकमाध्यात्मिकतानुरागिणो भवेयुः ।

४३ धर्ममात्रे एकं वैशिष्ट्यं विद्यते, यत्तस्य धर्मस्य आत्मस्वरूपम् । मनुष्यमात्रे एतादृशादर्शस्य मूर्तिरिवास्ते । तव कापि अन्या हानिर्जायताम् यावत्कालपर्यन्तं तवायमादर्शो न नश्यति—इदं ते वैशिष्ट्यं सुरक्षितं विद्यते, न किमपि त्वां नाशयितुं समर्थम् । इदमेव धर्मविषयेऽपि वक्तुं शक्यते, सर्वेषामपि प्राचीनधर्माणामद्यावधि अस्तित्वेन सिद्धं भवति; यत् तैः सर्वैः स्ववैशिष्ट्यं सुरक्षितम् । प्रमादेषु सत्स्वपि, अन्तरायेषु विद्यमानेष्वपि, कलहेषु

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जायमानेष्वपि, प्रतीक-विग्रहाद्यावरणेषु भवत्स्वपि तेषां धर्माणां सप्राणं स्पन्दनपरमान्तरं (हृदयं) वलवत्तरं विद्यते। एतैर्धर्मैः स्वकीयादर्शो न परित्यक्तः।

४४ जगति प्रचलिता विविधधर्मा वस्तुतो न परस्परविरोधिनः संघर्षपरा वा विद्यन्ते, ते तु एकस्यैव विश्वधर्मस्य भिन्नानि रूपाणि। अयं विश्वधर्मो मानवजीवनस्य विविधावस्थासु भिन्नजातीयमानसिकविचारानुसारमुपयुज्यते।

४५ न कोऽपि "मम धर्मस्तव धर्मो वा" विद्यते; न वा कोऽपि "मम राष्ट्रियधर्मस्तव राष्ट्रियधर्मो वा"। न कदापि धर्मबहुत्वमासीत्। अनाद्यनन्त एक एवाद्वितीयो धर्म आसीत् भविष्यति च। अयमेक एव विश्वधर्मः देशभेदेन विविधानि रूपाणि प्रकटीकरोति।

४६ कुत्रास्ते इयं भेदशून्या मानवता? यदाहं कमपि कृष्णवर्णं गौरवर्णं वा पुरुषं नारीं वा पश्यामि तदा सर्वेषामपि मुखमण्डलेषु सर्वसाधारणी मानवता मया परिदृश्यते। एतादृशीमेकतामिन्द्रियविषयीकर्तुं साक्षात्कर्तुमसमर्थो भवेयं नाम परं तस्या अस्तित्वं ध्रुवमिति मन्ये। यद्यहं कस्मिन्नपि विषये संदेहशून्योऽस्मि, तर्हि अस्यामेव अस्मासु विद्यमानायां साधारणमानवतायामेव। एवं सर्वधर्मानुस्यूतविश्वधर्मविषयेऽपि ज्ञेयम्। एतादृशविश्वधर्मस्यास्तित्वं सनातनमिति निश्चितम्। "अहं सर्वेष्वप्येतेषु मुक्ताफलेषु स्यूतं सूत्रमिवास्मि"; प्रत्येकं मुक्ताफलं तु धर्मः तदन्तर्गत-सम्प्रदायविशेषो वा।

४७ अतीतकालादारभ्य विद्यमानान्सर्वानपि धर्माननुसरामि, तथा येन केनापि रूपेण तैरीश्वरोऽभ्यर्चितस्तेनैव रूपेण अहमपि तं समर्चयामि। अहं मोहम्मदीयानां मस्जिदभवनं प्रवेक्ष्यामि, खिस्तीयानां गिरिजागारं वा प्रविश्य पुण्यक्रॉसचिह्नस्य पुरतो जान्वाच्य स्थास्यामि, बौद्धमन्दिरमपि प्रविश्य भगवन्तं बुद्धं तस्य धर्मं च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(प्रति) शरणं गच्छामि। एवमरण्यमनुप्रविष्टः सन् मानवहृदय-प्रकाशकर-दिव्यज्योतिर्दर्शनार्थमुद्यतैर्हिन्दुभिः सह ध्यानस्थोऽपि भविष्यामि। न केवलमहं सर्वानप्येतान्मार्गाननुसरेयम्, अपि तु भविष्यति काले उत्पत्स्यमानेतरमार्गार्थमपि मम हृदयमन्दिरद्वार-मुद्घाटितं स्थास्यति।

४८ वेदः, बाइबलपुस्तकं, कुराणग्रन्थः, अन्ये पवित्रधर्मग्रन्थाश्च केवलं विश्वधर्ममहाग्रन्थस्य विविधानि पृष्ठानि! अद्यापि (भविष्यति काले) असंख्यानि एतादृशानि पृष्ठानि उद्घाटितानि भवेयुर्नाम। तेषां सर्वेषामपि कृते मम मनोद्वारं निरन्तरमपावृतमिवास्ते।

४९ उच्चतमदार्शनिकविचारैः, निम्नतमदर्शनाभासैर्वा, महत्तम-पौराणिकादर्शैस्तादृश - कुत्सितकल्पनाभिर्वा, सर्वोत्तमसंस्कार-विशेषैर्नीचकोटिक - भूतपिशाचादि - साधनाभिर्वा भवतु प्रत्येक-सम्प्रदायः, जीवः, राष्ट्रं, धर्मो वा ज्ञानतोऽज्ञानतो वा ईश्वर-प्राप्त्यर्थमग्रगामितामनुसरति। मनुष्यमात्रेणानुभूतानि यावत्सत्य-दर्शनानि ईश्वरसाक्षात्कार-स्वरूपाणि नापरं किञ्चिदन्यत्।

५० करकलितविविधपात्रा वयं सलिलावाप्तये सरसी-तीरमुपसरामः। कोऽपि स्वहस्तधृतलघुजलपानपात्रो भवेत्, अपरः कश्चित् स्वकरयोः कामपि कलसीं करोतु, इतरः कश्चन महतीं जलद्रोणीं वा धारयतु; परं सर्वे वयं स्वपात्राणि पानीयपूर्णानि विधातुं प्रयत्नशीलाः स्म। स्वभावतः सर्वमपि तज्जलं स्वस्वभाजनस्याकारमङ्गीकुरुते। धर्मविषयेऽपि अयमेव न्यायः। अस्मन्मानसानि जलपात्राणीव विद्यन्ते। ईश्वरश्च सलिलसदृशं तानि मनःपात्राणि स्वस्वरूपेण पूर्णानि विदधाति, स च तत्तत्पात्राकारेण परिणमति। तथापि स एक एवाद्वितीयः यः सर्वत्रापि प्रतिभासते। अस्मदनुभूतमिदमेव तस्य सर्वव्यापित्वम्।

५१ "अस्तु नवनिर्माणं यथासम्भवं सहायं वा, न कस्यापि विनाशः, भङ्गः अधःपातनं वा" इति सदाचारनियमसूत्रानुसरणार्थमहं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वप्रथमं मानवमात्रमभ्यर्थये । उपकारकरणेऽसमर्थस्य ते मा भवतु कस्याप्यपकारः । अपरं स्वावस्थास्थितं मनुष्यमवलम्ब्य स उत्तरोत्तरोन्नतिपथं नेतव्यः ।

५. जीवात्मा स्वरूपतो दिव्यः । अन्तर्बाह्येन्द्रिय-प्रकृतिनियमनपूर्वकं एतस्याः दिव्यतायाः विकास एव मानवमात्रस्य परमं लक्ष्यम् । कर्मणा, उपासनया, चित्तवृत्तिनिरोधेन, ज्ञानमार्गेण वा–एतेषु केनचिदेकेन, अनेकैः, सर्वैरपि वा साधनैरिदं विधाय मुक्तो भवेः । इदमेव धर्मसर्वस्वम् ।

मार्गाः, मतमतान्तराणि, संस्काराः, मन्दिराणि, धर्मग्रन्थाः, प्रतीकानि सर्वाण्येतानि गौणानि ।

उपदेशवचनानि समाप्तानि ।

ॐ शान्तिः शान्तिः शान्तिः

—:o:—

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8391

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वामि-अपूर्वानन्द-लिखित-संस्कृत-ग्रन्थाः

१—वेदमूर्तिश्रीरामकृष्णः '(पञ्चदशस्तोत्रैस्तथा श्लोकवद्धोपदेशद्विशत्यादिभि· समलंकृतः श्रीरामकृष्ण-श्रीसारदादेव्योर्युग्मजीवनी-स्वरूपः)

—शतवार्षिकजयन्तीप्रकाशनम् । —मूल्यम् ३·००

२—युगाचार्यविवेकानन्दः (षोडशस्तोत्रैः, श्लोकवद्धोपदेशद्विशत्या श्रीस्वामिविरचितकतिपयनिवन्धैश्च समलंकृतो जीवनीग्रन्थः)।

—शतवार्षिकजयन्तीप्रकाशनम् । —मूल्यम् ३·००

हिन्दी ग्रन्थ—

१—धर्मप्रसङ्ग में स्वामी शिवानन्द प्रथम भाग— १.३५

२—धर्मप्रसङ्ग में स्वामी शिवानन्द द्वितीय भाग— २.३५

३—माँ शारदा (जीवनचरित्र)— ४·५०

४—श्री [illegible] और श्री माँ [illegible] ३·४०

५—युगप्र[illegible]

[illegible] जयन्ती प्रकाशन २.५०

प्राप्तिस्थान—

अध्यक्ष—श्रीरामकृष्ण-अद्वैताश्रम,

वाराणसी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तन्नो हंसः प्रचोदयात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi